[८] प्रथमाधिकारोऽयम्] em.; प्रथमादिकरोऽयम् N, O

॥ द्वितीयाधिकारः[1] ॥

[६. शिवपूजामहिमा]

[६.१. आत्मार्थशिवपूजामहिमा]

शम्भो स्वामिन् महादेव साम्बमूर्ते प्रसीद मे ।
सर्वथा[2] सर्वदा सत्यं[3] शरणं ते पदाम्बुजम् ॥ १ ॥
आत्मार्थशिवपूजायाः क्रमोऽस्माभिर्निगद्यते[4] ।
संग्रहेऽपि च साकल्यात्सम्प्रदायपुरस्सरम् ॥ २ ॥
अविज्ञाय शिवार्चाया[5] माहात्म्यं[6] कर्तुमक्षमम् ।
अत एवादितः शम्भोः पूजाया महिमोच्यते ॥ ३ ॥

[६.२. शिवपूजामहिमा]

शिवधर्मे –

अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।

---

[1] द्वितीयाधिकारः] em.; omits N, O

[2] सर्वथा] O; सर्वदा N

[3] सत्यं] em.; सत्य N, O

[4] क्रमो०] N; कमो O

[5] शिवार्चाया] O; शिवार्चाय N

[6] माहात्म्यं] Npc; महात्म्यं Nac, O

शिवलिङ्गार्चनस्यैते कोट्यंशेनापि नो[१] समाः ॥ ४ ॥

सदा यजति यज्ञेन[२] सदा दानं[३] प्रयच्छति ।

सदा स वायुभक्षः[४] स्यात्सदा योऽर्चयते शिवम् ॥ ५ ॥

यः शिवं पूजयेन्नित्यं प्रणमेद्वापि भक्तितः[५] ।

तस्य भोगञ्च मोक्षञ्च शिवः प्रीतः प्रयच्छति ॥ ६ ॥

[६.२.१. भिन्नवेलाकृतशिवलिङ्गपूजाफलम्]

यः कुर्यादर्चनं मासमेकाहारो जितेन्द्रियः ।

स यत्फलमवाप्नोति न तत्सर्वैर्महामखैः ॥ ७ ॥

यः प्रदद्याद्गवां[६] लक्षं दोग्ध्रीणां वेदपारगे[७] ।

एकाहमर्चयेल्लिङ्गं तस्य पुण्यं ततोऽधिकम् ॥ ८ ॥

†.....................................†

मासे मासे तु योऽश्नीयाद्यावज्जीवं द्विजोत्तमः ।

यश्चार्चयेत्सकृल्लिङ्गं[८] सममेव न संशयः ॥ ९ ॥

---

[१] ०नापि नो] O; ०...पि ...I N

[२] यज्ञेन] N; येज्ञेन O

[३] सदा दानं] O; सदानं N

[४] वायुभक्षः] em.; वायुभक्ष N, O

[५] भक्तितः] N; भक्तिदः O

[६] यः प्रदद्याद्गवां] em.; यत्प्रदद्याद्गवां N, O

[७] वेदपारगे] Opc; वेदपारगैः N, वेदपारके Oac

[८] यश्चार्चयेत्सकृल्लिङ्गं] N, Opc; यश्चार्च...त्सकृल्लिङ्गं Oac

यः पुनः[१] सङ्गमुत्सृज्य शिवमब्दं प्रपूजयेत्।
नैरन्तर्याच्छतगुणं पुण्यं तस्य प्रवर्धते॥ १०॥
पञ्चाशद्गुणितं पुण्यमब्दार्धं योऽर्चयेच्छिवम्।
ऋतावृतौ तदर्धं स्यान्मासे मासे[२] तदर्धकम्॥ ११॥
मासार्धमपि यो लिङ्गं नैरन्तर्येण पूजयेत्[३]।
पुरुषोत्तमः स विज्ञेयो[४] नैरन्तर्यं हि दुष्करम्[५]॥ १२॥
प्रातरुत्थाय यो लिङ्गं[६] भक्त्या पूजयते सकृत्।
सम्पूर्णां पृथिवीं दत्वा यत्फलं[७] तदवाप्नुयात्॥ १३॥
मध्यं दिनकरे प्राप्ते यः शिवं सम्यगर्चयेत्।
कपिलानां शतं दत्वा यत्पुण्यं तदवाप्नुयात्[८]॥ १४॥
वारुणीमाश्रिते सूर्ये यः शिवं सम्यगर्चयेत्।
गवां शतसहस्रस्य दत्तस्य[९] फलमाप्नुयात्॥ १५॥

---

[१] यः पुनः] N; यः पुनः स्० O

[२] मासे मासे] em.; मासो मासे N, O

[३] पूजयेत्] N; प्रपूजयेत् O

[४] सविज्ञेयो] Npc, O; सविज्ञेया Nac

[५] दुष्करम्] em.; मुष्करम् N, O

[६] प्रातरुत्थाय यो लिङ्गं] O; प्रातरुत्थाय N

[७] यत्फलं] N; यत्पलं O

[८] तदवाप्नुयात्] em.; न दवाप्नुयात् N, O

[९] दत्तस्य] N; दक्तस्य O

यो लिङ्गमर्धरात्रे तु शुचिर्भूत्वा प्रपूजयेत्।
अग्निष्टोमसहस्रस्य धर्मतो लभते फलम्॥ १६॥
एवं सर्वासु वेलासु लिङ्गस्थं परमेश्वरम्।
सम्पूजयेन्नरो[१] भक्त्या सर्वान् कामानवाप्नुयात्॥ १७॥

[६.२.२. प्रतिदिनकृतलिङ्गपूजायामहिमा]

शिवलिङ्गं महापुण्यं सर्वदेवनमस्कृतम्।
यः[२] स्पृशेदपि पाणिभ्यां न स पापैः प्रलिप्यते॥ १८॥
इत्यादिवचनैः शम्भुपूजैवाभीष्टदायिनी[३]।
तस्मात्कुर्यात्सकृद्वापि शिवपूजां दिने दिने॥ १९॥
अथ पूजादिकार्यादौ[४] निर्वृत्यादित्यपूजनम्[५]।
पूर्वोक्तवर्त्मनाऽथो[६] तद्भावनाविनिवृत्तये॥ २०॥
पुनश्चाचम्य वै भस्मधारणं चाम्बुना विना।

4–18. These verses are quoted from the *Śivadharmaśāstra*, pp. 44-46: verses 4-7 are *Śivadharmaśāstra* 7:2-5; verses 8 and 9 are 7:22-23; and verses 10-18 are 7:25-33.

---

[१] सम्पूजयेन्नरो भक्त्या] em.; सपूजयेन्नरो भक्त्या N, O

[२] यः] em.; यत् N, O

[३] शम्भु०] O; शम्भुः N

[४] ०कार्यादौ] O; ०कथ्यादौ N

[५] निर्वृत्या०] N; निर्वत्त्या० O

[६] ०वर्त्मना०] O; ०वार्त्मना० N

कृत्वा तु[1] सकलीकृत्य कराङ्गन्यासवर्त्मना[2] ॥ २१ ॥

अथोपविश्य सौम्यास्यः सामान्यार्घ्यं प्रकल्पयेत् ।

तद्यथा हेतितः पात्रं[3] सम्प्रक्षाल्य निधाय तत् ॥ २२ ॥

निरीक्ष्य प्रोक्ष्य सन्ताड्याभ्युक्ष्याद्भिः[4] पूरयेद्धृदा ।

बैन्दवामृतमाकृष्य पूरकोऽङ्कुशमुद्रया[5] ॥ २३ ॥

हृदा तदप्सु निक्षिप्य पुष्पैः पत्रैश्च वाऽर्चयेत् ।

तद्यथा दशधा सप्तधाथवा प्रणवेन तत् ॥ २४ ॥

अभ्यर्च्यैत्यभिमन्त्र्यैतत्कृत्वा तालत्रयं[6] ततः ।

बध्वावकुण्ठ्य[7] धेन्वन्तमीक्षणाद्यष्टसंस्कृतम्[8] ॥ २५ ॥

---

[1] तु] N; omits O

[2] कराङ्गन्यास०] Opc; करङ्गन्यास० N, Oac

[3] हेतितः पात्रं] em.; हेदितः पात्रं N, O

[4] सन्ताड्याभ्युक्ष्याद्भिः] Opc; सन्तास्याभ्युक्षाद्भिः N, Oac

[5] ०ङ्कुशमुद्रया] N; ०...शमुद्रया O

[6] तालत्रयं] O; तालत्रत्रं N

[7] बध्वावकुण्ठ्य] O; बध्वावकुण्ठ N

[8] ०क्षणाद्यष्टसंस्कृतम्] N; ०क्षणा...संस्कृतम् O

[७. द्वारपूजा]

[७.१. द्वारपूजाविधानम्]

सामान्यार्घ्यं प्रकल्प्यैवमथ[1] द्वारं यजेत् कथम् ।
द्वारार्चां पश्चिमे कुर्यादात्मार्थे प्राचि वाथवा ॥ २६ ॥
दक्षिणे †चेत्तदा द्वारं[2]† नोत्तरस्यां तु गोमुखम्[3] ।
श्रीमन्मकुटतन्त्रोक्तिर्लिख्यते द्वारनिर्णये ॥ २७ ॥

[७.१.१. द्वारस्थाननिर्णयः]

मकुटे –

द्वारं तु दक्षिणं[4] श्रेष्ठं चतुर्वर्णस्य मुख्यतः ।
पूर्वद्वारं प्रशस्तं स्याद्ब्राह्मणानां महेश्वर ॥ २८ ॥
क्षात्रं तु दक्षिणद्वारं वैश्यानामुत्तरं शुभम्[5] ।
शूद्राणां पश्चिमद्वारं विशेषेण महेश्वर ॥ २९ ॥
दक्षिणद्वारपूजायामुत्तरे नालं दोषकृत् ।

28–29. Quoted from *Makuṭa*, 3:82-83, which has different readings:
द्वारन्तु दक्षिणं श्रेष्ठञ्चातुर्वर्ण्यमनुक्रमात् । पूर्वद्वारं प्रशस्तन्तु ब्राह्मणानां महेश्वर ॥
क्षात्रन्तु दक्षिणद्वारं वैश्यानामुत्तरं शुभम् । शूद्राणां पश्चिमद्वारं विशेषं तु महेश्वर ॥

---

[1] प्रकल्प्यैव०] O; प्रकल्प्येव० N

[2] चेत्तदा द्वारं] O; चेत्तदारं N

[3] गोमुखम्] em.; गोमुखात् N, O

[4] दक्षिणं] conj.; दोषकृत् दक्षिणे N, दक्षिणे O

[5] क्षात्रं तु दक्षिणद्वारं वैश्यानामुत्तरं शुभम्] conj.; omits N, O

यां दिशं समनुप्राप्तस्तां प्राचीं परिकल्पयेत्॥ ३०॥

कामिके च –

यस्यां दिशि भवेद्द्वारं[१] तां प्राचीं परिकल्पयेत्।

अंशुमति च –

पश्चिमं पूजयेद्द्वारं[२] शेषद्वाराणि घट्टयेत्॥ ३१॥

इत्युक्त्या स्वार्थपूजायां[३] पश्चिमद्वारमुत्तमम्।

अथवा प्राच्यवाच्यां वा द्वारं ग्राह्यं यथोचितम्॥ ३२॥

महत्तथा हि सर्वत्र प्रमाणं शाम्भवं[४] वचः।

आगमोक्तप्रकारेण विदधीत[५] शिवार्चनम्॥ ३३॥

[७.१.२. द्वारेऽर्च्याः सप्तदेवताः]

अथ द्वारन्तु[६] सम्प्रोक्ष्य सामान्यार्घ्येण हेतितः।

31ab. Quoted from *Pūrva-Kāmika*, 4:20ab.
31cd. Untraced in the *Aṃśumat*, but cf. *Somaśambhupaddhati* IV, 2:118cd, प्रविशेत्पश्चिमद्वाराच्छेषद्वाराणि घट्टयेत्।

---

[१] भवेद्द्वारं] em.; भवेद्वारं N, O

[२] पूजयेद्द्वारं] em.; पूजयेद्वारं N, O

[३] स्वार्थपूजायां] Npc, O; स्वार्थपूजार्थं Nac

[४] शाम्भवं] N; …भ… O

[५] विदधीत] N, Opc; विदधीचत Oac

[६] द्वारन्तु] N; द्व… O

द्वारेशास्तत्र सम्पाच्र्यास्ते के गणपवाग्रमाः[१] ॥ ३४ ॥
द्वारोर्ध्वे दक्षिणे वामे मध्ये तत्स्वदक्षिणे[२] ।
द्वारदक्षिणशाखायां[३] नन्दिगङ्गे[४] तदुत्तरे ॥ ३५ ॥
द्वारस्य वामशाखायां महाकालोऽस्य[५] वामतः ।
यमुनाच्र्या भवेदेषां सम्पानां[६] ध्यानमुच्यते ॥ ३६ ॥

[७.१.२.१. द्वारदेवतानां ध्यानानि]

[७.१.२.१.१. गणेशध्यानम्]

लम्बोदरं श्यामतनुं गणेशं कुठारमक्षस्त्रजमूर्ध्वगाभ्याम्[७] ।
सलड्डुकं दन्तमधःकराभ्यां वामेतराभ्यां च दधानमीडे ॥ ३७ ॥

[७.१.२.१.२. सरस्वतीध्यानम्]

शुक्लां शुक्लाम्बरामक्षमालापुस्तकधारिणीम् ।
सव्यवामकराभ्यां च सुप्रसन्नां सरस्वतीम् ॥ ३८ ॥

---

[१] गणपवाग्रमाः] O; गणपवाक्रमाः N

[२] तत्स्वदक्षिणे] O; तस्य स्वदक्षिणे N

[३] °शाखायां] em.; °शाखाया N, O

[४] नन्दिगङ्गे] em.; नन्दिगङ्गा N, O

[५] महाकालो°] Npc, O; महाकोलो° Nac

[६] भवेदेषां सम्पानां] N; भवेदे... O

[७] कुठारमक्षस्त्र°] N; कु...रमक्षसृ° O

वामदक्षकरोपात्तवीणावादनतत्पराम्[1] ।

[७.१.२.१.३. लक्ष्मीध्यानम्]

वामदक्षिणहस्ताभ्यां[2] दधतीं श्रीफलाम्बुजे ॥ ३९ ॥

हेमाभां[3] सघटेभाभ्यां प्लाव्यमानां[4] महाश्रियम् ।

[७.१.२.१.४. नन्दिकेश्वरध्यानम्]

रक्तं त्रिणेत्रं जटिलं सव्यवामकरद्वये ॥ ४० ॥

अक्षमालां त्रिशूलं[5] च दधानं नन्दिकेश्वरम् ।

[७.१.२.१.५. गङ्गाध्यानम्]

जह्नुकन्यां सितां सौम्यां मकरोपरि संस्थिताम् ॥ ४१ ॥

श्वेतचामरपीयुषकलशासक्तबाहुकाम्[6] ।

यजेदुत्तरतस्तस्य[7] नन्दिनः सर्वभूषणाम् ॥ ४२ ॥

[७.१.२.१.६. महाकालध्यानम्]

कृष्णं त्र्यक्षं महाकालं सव्यवामकरद्वये ।

---

[1] ०करोपात्त०] em.; ०करोपाक्त० N, O

[2] ०हस्ताभ्यां] Npc, O; ०सस्ताभ्यां Nac

[3] हेमाभां] em.; होमाभा N, O

[4] प्लाव्यमानां] N; प्लाव्यमा... O

[5] त्रिशूलं] em.; त्रशूलं N, ...त्रशूलं O

[6] ०बाहुकाम्] N; ०... O

[7] यजेदुत्तरतस्तस्य] N; ...स्तस्य O

कपालञ्च[1] त्रिशूलञ्च[2] दधानं विकटाननम्[3] ॥ ४३ ॥

[७.१.२.१.७. यमुनाध्यानम्]

श्यामां कूर्मस्थितां वामसव्यहस्तद्वये घटम् ।

नीलोत्पलं च बिभ्राणां[4] यमुनाञ्च विभावयेत् ॥ ४४ ॥

एवमाराध्य तान्सप्तद्वारपालान्यथाक्रमम् ।

द्वारमन्तर्मुखं विद्याद्वारपाला बहिर्मुखाः ॥ ४५ ॥

इति विज्ञाय पूज्यास्स्युरथवा पूजयेदिमान् ।

सर्वेभ्यो द्वारपालेभ्यो[5] नम इत्येकपुष्पतः ॥ ४६ ॥

प्राग्द्वारे दक्षिणद्वारे[6] स्ववामोर्ध्वे विनायकम् ।

तत्तद्वारोचितं[7] सर्वद्वारपालार्चनं[8] भवेत् ॥ ४७ ॥

37-41b and 43-44. Quoted from *Śivaliṅgapratiṣṭhāvidhi*, pp. 115–116.
45cd. Quoted without attribution in the *Prabhāvyākhyā* on the *Kriyākramadyotikā* (p. 47) and appears in the *Pūrva-Kāraṇa*, 102:23ab, but also in the *dvārapālavidhi* chapter of the *Aṃśumat* as transmitted in T. 158, p. 329.

---

[1] कपालञ्च] N; कपा...ञ्च O

[2] त्रिशूलञ्च] O; त्रशूलञ्च N

[3] विकटाननम्] N; ...कटाननम् O

[4] बिभ्राणां] em.; विभ्राणं N, O

[5] द्वारपालेभ्यो] N, Opc; द्वारपलेभ्यो Oac

[6] दक्षिणद्वारे] N; दक्षि...वारे O

[7] तत्तद्वारो॰] em.; तत्तद्वारो॰ N, O

[8] सर्व॰] em.; सप्त॰ N, O

[७.१.३. विघ्ननिवारणम्]

अथ मूलदृशालोक्य दिवि[1] विघ्नान्निवारयेत्।

सास्त्रनाराचकुसुमप्रक्षेपेणान्तरिक्षगान्[2] ॥ ४८ ॥

दक्षिणपार्ष्णित्रिघातेन भूविघ्नांश्च[3] निवारयेत्।

अथ दक्षाङ्घ्रिणा वामशाखामाश्रित्य देहलीम् ॥ ४९ ॥

अस्पृष्ट्वान्तः प्रविश्याथ[4] देहलीमध्यमेऽर्चकः।

[७.१.४. अस्त्रद्वारपालार्चनम्]

पश्चिमाभिमुखो भूत्वाथास्त्रद्वारपमर्चयेत् ॥ ५० ॥

चतुर्वक्त्रं चतुर्बाहुं प्रदीप्ताग्निसमप्रभम्[5]।

शिवस्याभिमुखं चाक्षशूलाभयवरान्वितम् ॥ ५१ ॥

जटामकुटसंयुक्तमर्धेन्दुकृतशेखरम्।

इति ध्यात्वा यजेदस्त्रद्वारपालं[6] ततः परम् ॥ ५२ ॥

---

[1] दिवि] Nac; दिव्य Npc, O

[2] सास्त्रनारा°] O; सास्त्रनार° N

[3] भूविघ्नांश्च] N; ...विघ्नांश्च O

[4] प्रविश्याथ] em.; प्रविश्याथो N, O

[5] प्रदीप्ताग्नि°] Npc, Opc; प्रदीप्तानि° Nac, प्रदीप्तावग्नि Oac

[6] यजेदस्त्र°] Npc, O; यजेष्टस्त्र° Nac

शिवं प्रदक्षिणीकृत्य मनसा न परार्थके ।

[८. वास्तुब्रह्मणार्चनम्]

देहलीदक्षिणे किञ्चिन्नैर्ऋते[१] वास्तुवेधसम् ॥ ५३ ॥

हंसस्थं तुन्दिलं[२] गौरं सश्मश्रुचतुराननम्[३] ।

दधानं[४] दक्षिणे वामे दण्डाक्षस्त्रुक्कमण्डलून्[५] ॥ ५४ ॥

[९. द्वाराभ्यन्तरे नन्दिसुयशार्चनम्]

अथ द्वाराविरोधेन द्वाराधिपधुरन्धरम्[६] ।

नन्दिकेशं यजेद्द्वाराभ्यन्तरे तद्यथोच्यते ॥ ५५ ॥

द्वाराभ्यन्तरतः स्थितञ्च[७] सुयशानाथं[८] तथा सन्निधौ

नन्दीशं श्रुतिहस्तमेकवदनं त्र्यक्षं भजे शोणकम्[९] ।

---

[१] किञ्चिन्नैर्ऋते] N; किञ्चिनैर्ऋते O

[२] तुन्दिलं] O; तुण्डिलं N

[३] सश्मश्रु] em.; सश्मश्रू N, सश्मश्रृ O

[४] दधानं] O; दधान N

[५] दण्डाक्षस्त्रुक्क०] em.; दण्डाक्षहत्क० N, दण्डाक्षस्त्रक्क० O

[६] ०धुरन्धरम्] em.; ०धुरम्धरम् N, O

[७] द्वाराभ्यन्तरतः] Npc, O; द्वाराभ्यन्तरौत० Nac

[८] सुयशानाथं] Npc, O; सुयशानाथौं० Nac

[९] भजे शोणकम्] conj.; भजे शोणगम् N, भ...शाणगम् O

गङ्गाचन्द्रधरं हृदञ्जलिकरं टङ्कं[1] दधानं मृगं[2]

हस्तैर्दक्षिणकूर्परे[3] क्षुरिकया हैमेन वेत्रेण च ॥ ५६ ॥

ओं ह्रीं श्रीं नन्दिकेशाय ततोऽभ्यर्च्य ततः परम् ।

तद्वामे सुयशां श्यामां सर्वावयवसुन्दरीम् ॥ ५७ ॥

नीलोत्पलकरां[4] ध्यायेत्प्रसारितकरामिति ।

ओं बीजं समुच्चार्य सुयशायै नमोऽस्त्विति ॥ ५८ ॥

[१०.१. द्रव्यविधानम्]

सम्पूज्य नन्दिनो देवीमथ द्रव्यावलोकनम्[5] ।

चतुश्शुद्धियुतान् कुम्भान् गड्डुकानस्त्रवस्त्रगान्[6] ॥ ५९ ॥

संहिताभिः[7] सकृज्जस्वा परा वा गायत्र्या[8] हृदा ।

---

56. Source unknown.

---

[1] टङ्कं] N, Opc; भालं Oac

[2] मृगं] em.; मृग N, O

[3] हस्तैर्दक्षिणकूर्परे] em.; हस्तैर्दक्षिणकोर्परे N, दक्षिलंणकोर्परेषु O

[4] ०करां] N, Opc; ०करं Oac

[5] ०लोकनम्] Npc, O; ०लोकलनम् Nac

[6] गड्डुकानस्त्रवस्त्रगान्] em.; ...कानस्त्रवस्त्रगान् N, गड्डुका...स्त्रगान् O

[7] संहिताभिः] em.; संहिताभि N, O

[8] परा वा गायत्र्या] em.; वरा वा गायत्र्या N, O

†पुरीतादाहृतान्† शिष्यैस्स्वेन वा स्वसमीपतः[१] ॥ ६० ॥
आनीयाधाय[२] पूजोपकरणद्रव्यौघं चिन्तयेत् ।
निधाय देवदक्षेऽथ[३] सुखासीनस्त्वनन्यधीः ॥ ६१ ॥
पाटलोत्पलपद्मार्ककरवीराण्युशीरकम्[४] ।

[१०.२. जलेनिक्षिप्यमाणानिपञ्चद्रव्याणि]

निक्षिपेदभिषेकाप्सु श्रीजलद्रव्यपञ्चकम् ॥ ६२ ॥
अथास्त्रप्रावृतिर्भाव्या वर्मणा वौषडन्ततः ।
परिखेति[५] धिया पूजास्थानं रक्षस्व[६] तत्परम् ॥ ६३ ॥
तत्स्थानं तु शिवीभूतं इति भाव्यं तथैव तत् ।

[११. शुद्धयः]

[११.१. भूतशुद्धिः]

तत्पश्चाद्भूतशुद्धिः स्यात्तत्क्रमः कथमुच्यते ॥ ६४ ॥
वातुलादौ[७] विविच्योक्तं भूतशुद्धिप्रयोजनम् ।

---

१ ०समीपतः] N, Opc; ०समीमपतः Oac

२ ०याधाय] conj.; याथाय N, O

३ देवदक्षे०] N; दे...दक्षे० O

४ ०पद्मार्क०] em.; ०पद्मार्द्रा० N, O

५ परिखेति] em.; परिकेति N, O

६ रक्षस्व] conj.; रक्षस्य N, O

७ वातुला०] Npc, O; वातुलं Nac

वातुले -

योवेत्ति पञ्च शुद्धीस्तु स पूजां कर्तुमर्हति ॥ ६५॥

तद्यथा -

भूतशुद्धिः[1] स्थानशुद्धिर्द्रव्यमन्त्रविशोधनम्।
लिङ्गशुद्धिस्तु पञ्चासां प्रथमं भूतशोधनम्॥ ६६॥
भूतशुद्धिरन्तरर्चाहवनध्यानसमाधयः।
एते पञ्चात्मशुद्ध्यर्थं प्रोक्ताः सिद्धान्तशेखरे॥ ६७॥

[११.१.१. भूतशुद्धिरप्रयोजनेति प्रश्नः]

अणुभूतानि चान्यानि दीक्षया गुरुणाणुभिः[2]।
कृतानि पूर्वमेतेषां[3] शुद्ध्या किं साध्यतेऽधुना॥ ६८॥

65cd. Untraced in the *Vātulaśuddha*, but appears in the *Ṣaṭsahasrakālottara*, T. 767, p. 65.
66-73b. Although the wording suggests a quotation from the *Siddhāntaśekhara* here, this passage appears instead to be a paraphrase of what is taught there on pp. 32-33, verse 2:99ff. Cf. *Siddhāntaśekhara*, 2:102ff:

प्रथमा भूतशुद्धिः स्यात्स्थानशुद्धिस्त्वनन्तरा। तृतीया द्रव्यशुद्धिः स्याच्चतुर्थी मन्त्रशोधिनी॥
पञ्चमी लिङ्गशुद्धिः स्यादुच्यन्ते शुद्धयः क्रमात्। क्रमान्ननु च भूतानि दीक्षया गुरुणाणुभिः॥
कृतानि पूर्वमेतेषां शुद्ध्या किं साध्यतेऽधुना। सत्यं भूतानि शुद्धानि द्विप्रकाराणि तानि तु॥
आभ्यन्तराणि बाह्यानि देहे चाभ्यन्तराणि च। षडध्वस्थानि बाह्यानि तानि शुद्धानि दीक्षया॥
देहस्थानि तु भूतानि शोध्यानि स्युर्दिने दिने। निःशेषदग्धपाशस्य भुक्तभोगस्य चात्मनः॥

---

[1] भूतशुद्धिः] em.; भूतशुद्धि N, O
[2] गुरुणा॰] N; गु...णा॰ O
[3] पूर्वमेतेषां] N; ...मेतेषां O

सत्यं भूतानि[1] शुद्धानि द्विप्रकाराणि तानि तु ।
आभ्यन्तराणि बाह्यानि[2] देहे त्वभ्यन्तराणि हि ॥ ६९ ॥
षडध्वस्थानि[3] बाह्यानि तानि शुद्धानि दीक्षया ।
देहस्थितानि भूतानि शोध्यानि[4] स्युर्दिने दिने ॥ ७० ॥
निःशेषदग्धपाशस्य[5] भुक्तभोगस्य चात्मनः ।
निर्दग्धसञ्चितागामि कर्मणो निर्मलात्मनः ॥ ७१ ॥
मातापितृमलोद्भूतदेह[6] स्थातुं न युज्यते[7] ।
तस्मान्मन्त्रमयः कायः कार्यो द्विः[8] प्रतिवासरम् ॥ ७२ ॥
धारणाशोधिते[9] देहे शिवः साक्षात्प्रदृश्यते ।
अहन्यहनि योगाग्निसम्पर्काच्छिवशक्तयः ॥ ७३ ॥

निर्दग्धसञ्चिताङ्गस्य कर्मणो निर्मलात्मनः । मातापितृमलोद्भूते देहे स्थातुं न युज्यते ॥
तस्मान्मन्त्रमयः कार्यः क्रियते प्रतिवासरम् । धारणाच्छोधिते देहे शिवः साक्षात्प्रदृश्यते ॥

---

[1] सत्यं भूतानि] O; सत्य...तानि N

[2] बाह्यानि] em.; साह्यानि N, O

[3] षडध्वस्थानि] em.; षडध्वस्थितानि N, O

[4] शोध्यानि] O; शो... N

[5] दग्ध०] Opc; दश्य Oac, N

[6] मातापितृमलोद्भूत०] em.; मात्रापितृमलोद्भूत० N, म...द्भूत० O

[7] युज्यते] N; यु...त O

[8] द्विः] conj.; द्वि N, O

[9] धारणाशोधिते] O; कारणाशोधिने N

नित्यं मन्त्राम्बुसंसिक्ता गच्छन्त्युपचयं[१] क्रमात्।
अभिव्यक्ताश्च सम्पूर्णा भवन्त्येव[२] न संशयः ॥ ७४ ॥
इत्युक्त्या प्रत्यहं भूतशुद्धिः[३] कार्येति निश्चिता।

[११.१.२. प्राणायामः]

प्राणायामत्रयं कार्यमोमा संहितयाथवा[४] ॥ ७५ ॥
रेचयेत्पूरयेद्वायुं[५] कुम्भयेत्पुर्णकुम्भवत्[६]।

[११.१.३. नाडीत्रयम्]

नासादक्षिणरन्ध्रस्था[७] पिङ्गलेडा तु[८] वामगा ॥ ७६ ॥
मध्या नाडी सुषुम्नाख्या एवं[९] नाडीत्रयं विदुः।

73c-74b. Quoted (with the attribution *āgama*) in *Jñānaratnāvalī*, GOML MS R 14898, p. 39.
75cd. Assume that *omā* is *tṛtīyā*.

---

[१] गच्छन्त्युपचयं] conj; गच्छन्त्युपद्वपद्वयं N, O
[२] भवन्त्येव] em.; भवत्येव N, O
[३] भूतशुद्धिः] N, Opc; भूताशुद्धिः Oac
[४] कार्यमोमा संहितयाथवा] N; कार्यमोमा संहि... O
[५] रेचयेत्पूरयेद्वायुं] em.; रोचयेत्पूरयेद्वार्यं N, रेचयेत्पूरयेद्वा... O
[६] कुम्भये] N; कु ...ये O
[७] दक्षिणरन्ध्रस्था] N, Opc; दक्षिणन्यरन्ध्रस्था Oac
[८] तु] N, Opc; तु म Oac
[९] सुषुम्नाख्या एवं] em.; सुषुम्नाढयादेवं N, O

[११.१.४. करन्यासम्]

अथ कृत्वा करन्यासं हृदञ्जलिकरद्वयम्[१] ॥ ७७ ॥

अथ गद्यगिरा[२] भूतशुद्धिमात्रमिहोच्यते ।

आहत्यैतावता श्लोकाः[३] चत्वारिंशद्वयान्विताः[४] ॥ ७८ ॥

[११.१.५. भूतशुद्धिप्रकारः]

अथ भूतशुद्धिप्रकार उच्यते। अथ प्रथमं[५] प्रणवेन संहितया[६] वात्र प्राणानायम्य पूर्ववत्करन्यासमात्रं विधाय हृदञ्जलिकरस्सन् भूतशुद्धिं मनसा कुर्यात्। तद्यथा पादाङ्गुष्ठद्वयादारभ्य यावद्बस्ति द्विरूपाम् ऊर्ध्वं[७] ब्रह्मबिलान्त-मेकरूपां हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेष्विडापिङ्गलाभ्यां संयुक्तां तेषु हृदयादि-स्थानेष्वधोमुखपद्ममुकुलयुक्तां पद्मतन्तुनिभां सुषिररूपां शरीरान्तराले विद्युल्लेखामिव भास्वरां सुषुम्नां सञ्चिन्त्य तस्या एवान्तर्बहिस्स्रवदमृतधारां[८] परमव्योमरूपिणीं बिन्दुशक्तिं विभाव्य सुषुम्नान्तर्हृदयकमलमध्ये[९] हूंकारं

---

[१] °द्वयम्] N; °द्व... O

[२] गद्यगिरा] conj.; गत्यशिरा N, O

[३] °श्लोकाः] em.; °श्लोका N, O

[४] °द्वयान्विताः] em.; °तथान्विताः N, O

[५] प्रथमं] N, Opc; प्रणवं Oac

[६] संहितया] Npc, O; संहितरद्वयं अथगत्य शिराभूतशुद्धिमात्रमिहोच्यते। आहत्यैतावताश्लोका या Nac

[७] ऊर्ध्वं°] em.; और्ध्वं N, ... ध्वं O

[८] °स्रवद°] N; °सृवद° O

[९] सुषुम्नान्तर्हृदयकमलमध्ये] N; सुषुम्न ... हृद ... मलमध्य O

ज्वलन्तं सञ्चिन्त्याथ वायुमापूर्य कुम्भयित्वा हूंकारे चित्तं निवेश्य मूलाधारादारभ्य वायुमूर्ध्वं विरेचयन् हुंफडिति[१] सन्ततोच्चारणेन हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रेष्वधोमुखावस्थितान्[२] पद्ममुकुलान् छोटिकया भिन्नग्रन्थिन् ऊर्ध्वमुखान्[३] निधाय प्रतिनिवृत्य वायुं दक्षिणनाड्या[४] विरेच्य[५] पुनः पूरकवायुना[६] समाकृष्टचैतन्यं[७] हृत्कमलाश्रितं[८] स्फुरत्तारकाकारं[९] सान्तबीजमयं हृदयसम्पुटितं[१०] जीवं हूंकारमूर्ध्नि विन्यस्य तदा बीजविग्रहं हूंकारशिखान्तस्थं[११] पुर्यष्टकोपेतं पुरुषं विभाव्य पश्चात्पुर्यष्टकोपेतं सूक्ष्मरूपं[१२] तृणाग्रजलबिन्दु-

---

The prose of this paragraph echoes that of the *bhūtaśuddhi* paragraph on pp. 56-57 of the *Kriyākramadyotikā*.

---

[१] विरेचयन् हुंफडिति] em.; omits N, विरोचयन् हुंफलिति O

[२] हंकारं……हुंफडिति सन्ततोच्चारणेन हृत्कण्ठतालुभ्रूमध्यब्रह्मरन्ध्रे०] O; omits N

[३] भिन्नग्रन्थिन् ऊर्ध्वं०] conj.; भिन्नग्रन्थिरूर्ध्व० N, O

[४] ०नाड्या] em.; ०नास्या N, O

[५] विरेच्य] O; विरोच्य N

[६] पूरकवायुना] O; पूरकवा… N

[७] समाकृष्टचैतन्यं] em.; समातुष्टचैतन्यं N, O

[८] हृत्कमलाश्रितं] O; हृत्कमलाश्रतं N

[९] स्फुरत्तारकाकारं] em.; स्फुरक्तारकाकारं N, …रक्त…कारं O

[१०] हृदयसम्पुटितं] O; हृदयं सम्पुटितं N

[११] हूंकारशिखान्तस्थं] O; हूंकारशिखा… N

[१२] सूक्ष्मरूपं] O; सूक्ष्मं N

रूपमेकाकिनं[१] निरामयं ध्यात्वा केवलकुम्भकं कृत्वा वायुमूर्ध्वं विरेचयेत्। संहारमुद्रया समादाय[२] ब्रह्मादिकारणत्यागक्रमेण एकोद्घातेन।

ओं हूं हां हं हां हूं आत्मने नमः।

इत्यात्मानं भोग्यकर्मोपभोगार्थं द्वादशान्ते शिवे संयोजयेत्। एवं बीजवृत्या शिवे लीनस्सन् सूक्ष्मदेहशुद्धये प्रातिलोम्येन स्वेषु स्वेषु कारणेषु पृथिव्यादिषड्विंशत्तत्त्वानि[३] बिन्दुपर्यन्तं लयं नयेत्[४]। तद्यथा गन्धे पृथ्वीं रसे जलं रूपेऽग्निं स्पर्शे वायुं शब्दे व्योम एतास्तन्मात्रास्तामसाहङ्कारे[५]। उपस्थ-पायुपाणिपादवागाख्यानि[६] कर्मेन्द्रियाणि[७] राजसाहङ्कारे घ्राणजिह्वाचक्षुस्त्वक्-श्रोत्राख्यानि[८] ज्ञानेन्द्रियाणि मनश्च सात्त्विकाहङ्कारे स च बुद्धौ सा गुणेषु गुणतत्त्वं प्रकृतौ सा रागविद्ये च कलायां पुंस्तत्त्वं कालो नियतिः[९] कला च

---

[१] तृणाग्र॰] em.; त्रिणाग्र॰ N, O

[२] समादाय] em.; तमादाय N, त...दाय O

[३] पृथिव्यादिषड्विंशत्तत्वानि] em.; प्रथिव्यादिषड्विंशक तत्वानि N, पृथिव्यादिषड्विंश...वानि O

[४] लयं नयेत्] em.; यं नयेत् N, O

[५] एतास्तन्मात्रास्तामसाहङ्कारे] Opc; एतास्तन्मात्रास्तामहङ्कारे N, ए एतास्तन्मात्रास्ताममहङ्कार Oac

[६] ॰पायु॰] N, Opc; ॰वायु॰ Oac

[७] कर्मेन्द्रियाणि] N; कर्मेन्द्रि... O

[८] घ्राणजिह्वाचक्षुस्त्वक्श्रोत्राख्यानि] em.; घ्राणत्वक्चक्षुश्रोत्राख्यां N, घ्राण...क्षुस्त्वक्श्रोत्राख्यानि O

[९] नियतिः] em.; नियतिं N, O

मायायां विलीनानि[१] विभाव्य शुद्धविद्यातत्त्वमीश्वरतत्त्वे तत्सदाशिवतत्त्वे तच्च शक्तितत्त्वे तच्च शिवतत्त्वे[२] तदप्यक्षुब्धरूपे बिन्दौ विलीनं भावयेत्।

अत्रोदाहरणं -

गन्धे भूस्सलिलं रसे हुतवहो रूपे मरुत्स्पर्शने
शब्दे स्यात् खमहंकृतौ[३] पुनरिमास्तन्मात्रिकास्तामसे।
कर्माक्षाणि च राजसे सह मनोबुद्धीन्द्रियैः सात्त्विके
बुद्धौ[४] सोऽपि गुणेषु सा गुणगणोऽव्यक्ते लयं गच्छति ॥ ७९॥
तद्रागविद्ये च कलां प्रयाति पुंस्त्वं च[५] कालो नियतिः कला च।
मायां सुविद्येशमसौ सदेशं सशक्तिमेषा शिवमेष बिन्दुम् ॥ ८०॥

Cf. *Ātmārthapūjāpaddhati*, T. 282, p. 132 and T. 1056, p. 162.

एवं बीजवृत्या शिवे लीनस्सूक्ष्मे देहशुद्धये संहारक्रमेण स्वेषु स्वेषु कारणेषु पृथिव्यादिनि तत्त्वानि विन्दुपर्यन्तं तत्त्वसमूहं लयं नयेत्। तद्यथा--- गन्धे पृथ्वीं रसे जलं रूपेऽग्निं स्पर्शे वायुः शब्दे व्योम एतास्तन्मात्रा- स्तामसाहङ्कारे वाक्पाणिपादपायूपस्थानि राजसाहङ्कारे श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि मनश्च सात्विकाहङ्कारे स च बुद्धौ सा गुणेषु गुणतत्त्वं प्रकृतौ सा रागविद्ये च कलायां पुंस्तत्वं कालो नियतिः। कला च मायायां विलीनानि विभाव्य शुद्धविद्यातत्वमीश्वरतत्वे तत्सदाशिवतत्वे तदप्यक्षुब्धरूपे विन्दौ विलीनं भावयेत्।

---

[१] विलीनानि] N, Opc; विरुलीनानि Oac

[२] शिवतत्त्वे] O; तत्वे N

[३] खमहंकृतौ] N; खमहंक... O

[४] बुद्धौ] O; बुद्धो N

[५] पुंस्त्वं च] conj.; पुंस्त्वंत्त्वं N, O

[११.१.५.१. संक्षेपतो वा भूतशुद्धिः]

यद्वा संक्षेपभूतशुद्धिविषये –

ब्रह्मणि स्पर्शशब्दौ च रसं वै केशवे त्यजेत्।
रूपगन्धौ त्यजेद्रुद्रे बुद्ध्यहङ्कारमीश्वरे ॥ ८१ ॥
मनोबिन्दू शिवे त्यक्त्वा[1] त्वेभिर्मुक्तः शिवं व्रजेत्।

इति विभाव्य तदनु[2] स्थूलदेहं विशोधयेत्। तद्यथा–

[११.१.६. पृथ्वीतत्त्वशोधनम्]

पार्थिवं मण्डलं पीतं कठिनं वज्रलाञ्छितम् ॥ ८२ ॥

चतुरश्रं ह्लां इति पार्थिवबीजेन सद्योजातेनाधिनायकेनाधिष्ठितं[3] ब्रह्मणा कारणेश्वरेण[4] युक्तं निवृत्तिकलारूपं पादादारभ्य[5] मूर्धान्तं[6] व्यापकं सञ्चिन्त्य

79-80. Quoted in the *Prabhāvyākhyā* on the *Kriyākramadyotikā*, p. 67. The pair are quoted together often, e.g. in the *Somaśambhupaddhatiṭīkā* (T. 170, p. 32), which attributes the verses to *asmadguru*. We can be sure that this refers to *Aghoraśiva* (and not *Jñānaśambhu*) since *Aghoraśiva* quotes them as his own ad *Sarvajñānottara* 4:10 (forthcoming edition of Goodall). Also *Siddhāntasāravali* (*Śaivabhāratīśodhapratiṣṭhāna, Varanasi*) p. 65, *Ātmārthapūjāpaddhati*, T. 282, p. 132 and T. 1056, p. 162.
81-82b. Cf. *Sārddhatriśatikālottara* 17:6.
82cd. Quoted from *Somaśambhupaddhati* I, 3:18ab, and also KSTS, 133ab.

---

[1] मनोबिन्दू शिवे त्यक्त्वा] N; मनोबिन्दू...त्त्वा O

[2] तदनु] em.; ततनु N, O

[3] ०केनाधिष्ठितं] Npc, O; ०केनाधिषष्ठितं Nac

[4] कारणेश्वरेण] N, Opc; कारणेश्वरणे Oac

[5] निवृत्तिकलारूपं पादादारभ्य०] conj.; निवृत्यकलादारभ्य N, O

[6] मूर्धान्तं] O; मूर्धा N

ओं ह्लां निवृत्तिकलायै हः हुं फट्।

इति पूरकपूर्वकं सुषुम्नायां[1] यावद्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्या विरेचयेत्। इति उद्घातपञ्चकेन गन्धरसरूपस्पर्शशब्दगुणानुत्सार्य पृथिवीं[2] शिवशक्त्याधिष्ठितस्वविरुद्धवायुनाभिभूतां[3] तदाकारां[4] चिन्तयेत्। उद्घातलक्षणम् -

[११.१.६.१. उद्घातलक्षणम्]

एवं पञ्चदश प्रोक्ताः प्राणायामास्तु भूतगाः।
वारुणस्य दश द्वे तैर्वारिभूतं[5] विशोधयेत्॥ ८३॥
तेजसो नव षड्वायोराकाशस्य त्रयो मताः।

The next paragraph to the above note, cf. *Kriyākramadyotikā*, pp. 57-58, and *Ātmārthapūjāpaddhati*, T. 1064, p. 164.

चतुरश्रं लं बीजं सद्योजातब्रह्मणा चाधिष्ठितं कारणेश्वरब्रह्मणा युक्तं हृदयमन्त्रेण सन्ततं निवृत्तिकलोपेतं पादादिमूर्धान्तं व्यापकं सञ्चिन्त्य ओं ह्लां निवृत्तिकलायै हः हुं फट्।

पूरकपूर्वं सुषुम्नायां यावद्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्या दक्षिणनाड्या विरेचयेत्। इति उद्घातपञ्चकेन गन्धरसरूपस्पर्शशब्दगुणानुत्सार्य पृथ्वीं शिवशक्तिविशेषाधिष्ठानबलेन शोधकत्वशक्तियुक्तेन स्वविरुद्धवायुनाभिभूतां तदाकारां चिन्तयेत्।

83. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 268.

---

[1] सुषुम्नायां] em.; सुषुम्नाय N, O

[2] पृथिवीं] O; प्रथीवीं N

[3] °विरुद्धवायुनाभिभूतां] O; °विरुद्धवाथ तथाभिभूतिं N

[4] तदाकारां] em.; तदाकारं N, O

[5] °द्वेतैर्वारिभूतं] N; °द्वे... ...ारिभूतं O

प्राणायामत्रयं[१] तस्मादेकोद्घातमिति स्मृतम् ॥ ८४ ॥

तस्मात्पञ्चोद्घातैः[२] पञ्चदशप्राणायामैः काठिन्यादिगुणं विहाय पृथिवीं पवनाकारां चिन्तयेत्। तदनु -

[११.१.७. जलाग्निवाय्वाकाशशोधनम्]

आप्यं मण्डलकं शुभ्रमर्धचन्द्रनिभं शुभम्।
अम्भोजलाञ्छितं सौम्यं द्रवद्रूपं स्वभावकम् ॥ ८५ ॥

ह्वीं इत्याप्यबीजेन[३] वामदेवेनाधिनायकेनाधिष्ठितं[४] विष्णुना कारणेश्वरेण युक्तं प्रतिष्ठाकलारूपं पादादारभ्य मूर्धान्तं व्यापकं विभाव्य।

ओं ह्वीं प्रतिष्ठाकलायै हः हुं फडिति।

पूरकपूर्वकं सुषुम्नायां[५] यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य[६] दक्षिणनाड्या विरेचयेत्। इति उद्घातचतुष्टयेन[७] रसादिगुणचतुष्टयमुत्सार्यापः[८] परशिवशक्त्याधिष्ठितस्वविरुद्धवह्निनाभिभूतास्तदाकाराश्चिन्तयेत्[९]। तदनु -

---

[१] त्रयं] N, Opc; त्रत्रयं Oac

[२] ०पञ्चोद्घातैः] O; ०पञ्चोत्सातैः N

[३] ०त्याप्यबीजेन] em.; ०त्यात्मविजेन N, O

[४] ०नायकेनाधिष्ठितं] Npc, O; ०नायकनाधिष्ठितं Nac

[५] सुषुम्नायां] em.; सुषुम्नया N, सुषुम्नाय O

[६] प्रतिनिवृत्य] O; प्रतिवृत्य N

[७] ०चतुष्टयेन] O; ०चतुष्टये N

[८] रसादिगुणचतुष्टयमुत्सार्यापः] em.; रसनादिगुणचतुष्टयमुत्सार्या N, रसादिगुणचतुष्टयमुत्सार्या O

[९] परशिव०] N; पशिव० O

आग्नेयं मण्डलं त्र्यश्रं रक्तं स्वस्तिकलाञ्छितम्[१]।

हूं इति वह्निबीजेनाघोरेणाधिनायकेनाधिष्ठितं[२] रुद्रेण कारणेश्वरेण युक्त+मुष्णवाक् क्रिया+स्वभावं विद्याकलारूपं पादादारभ्य मूर्धान्तं व्यापकं सञ्चिन्त्य। ओं हूं[३] विद्याकलायै हः हुं फडिति।

पूरकपूर्वकं सुषुम्नायां[४] यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा[५] प्रतिनिवृत्य दक्षिणनाड्यां[६] विरेचयेत्। इत्युद्घातत्रयेण रूपादिगुणत्रयमुत्सार्य[७] वह्निं शिवशक्त्यधिष्ठितस्वविरुद्धजलेनाभिभूतं तदाकारं चिन्तयेत्। तदनु[८] -

वायव्यमण्डलं कृष्णं षट्कोणं रसबिन्दुकम्।

ह्यैमिति वायव्यबीजेन तत्पुरुषेणाधिनायकेनाधिष्ठितमीश्वरेण कारणेश्वरेण युक्तं चलनक्रियास्वभावं शान्तिकलारूपं पादादारभ्य मूर्धान्तं व्यापकं सञ्चिन्त्य।

86ab. Quoted from *Somaśambhupaddhati* I, 3:22cd.

---

[१] कलाञ्छितम्] N; कलाञ्चितम् O

[२] ०नाधिष्ठितं] N; नाधिष्ठि… O

[३] हूं] em.; हूं N, हुजं O

[४] सुषुम्नायां] em.; सुषुम्नाया N, O

[५] प्रेरयित्वा] N; प्रेरयित्वाः O

[६] ०नाड्या] em.; ०नास्या N, O

[७] इत्युद्घातत्रयेण रूपादिगुणत्रयमुत्सार्य] N, Opc; इत्युद्घातद्वयेन स्पर्शशब्दगुणवत् Oac

[८] तदनु] N; तदनुं O

ओं ह्यौं शान्तिकलायै हः हुं फडिति।

पूरकपूर्वकं सुषुम्नायां[१] यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्या[२] विरेचयेत्। इत्युद्घातद्वयेन स्पर्शशब्दगुणावुत्सार्य[३] वायुं शिवशक्त्यधिष्ठितस्वविरुद्धपृथिव्याभिभूतं तदाकारं[४] चिन्तयेत्। तदनु---

आकाशमण्डलं[५] धूम्रं वृत्तं बिन्द्वेकभूषितम्॥८६॥

हौमिति[६] नभोबीजेनेशानमन्त्रेणाधिनायकेनाधिष्ठितं सदाशिवकारणेश्वरेण युक्तं निरन्तरमवकाशप्रदस्वभावं शान्त्यतीतकलारूपं पादादारभ्य मूर्धान्तं व्यापकं सञ्चिन्त्य। ओं हौं शान्त्यतीतकलायै हः हुं फडिति।

[११.१.८. दिव्यदेहभावना]

पूरकपूर्वकं सुषुम्नायां यावद्द्वादशान्तं प्राणवायुं प्रेरयित्वा प्रतिनिवृत्य दक्षिणनाड्या[७] विरेचयेदित्येकोद्घातेन[८] शब्दगुणमुत्सार्यानित्यत्वाशुद्धत्वादि-

---

[१] सुषुम्नायां] em.; सुषुम्नाया N, O

[२] °नाड्या] em.; °नास्या N, O

[३] °वुत्सार्य] em.; °युत्सार्या N, °वुत्सार्या O

[४] °भूतं तदाकारं] em.; °भूताकारां N, O

[५] °मण्डलं] O; °मण्डं N

[६] हौमिति नभो वीजेनेशान°] em.; हौं नभोमिति नभो बीजेशान° N, ओं हौमिति नभो बीजेनेशान° O

[७] °नाड्या] em.; °नास्या N, O

[८] °कोद्घातेन] em.; °कोद्घाते N, O

गुणं[१] विहाय वियद्[२] शिवशक्त्यधिष्ठितपरबिन्द्वभिभूतं शुद्धस्फटिकसन्निभं नित्यत्वशुद्धत्वव्यापकत्वादिगुणयुक्तं परमाकाशस्वरूपं विभावयेत्[३]। यद्वा अशक्तविषये स्वं देहं पृथिव्यादिपञ्चभूतबीजं[४] ब्रह्मविष्णुभ्यामुद्भिन्नाङ्कुरं रागद्वेषधर्माधर्ममोहमूलं[५] विद्याविद्येश्वरपालितं कलादितत्त्वसारं[६] तन्मात्रेन्द्रियशाखोपशाखं शब्दादिविषयालोचनपल्लवं[७] भावप्रपञ्चकुसुमं बुद्ध्यध्यवसायसङ्कल्पफलं भोक्तृत्वरसं पुरुषविहङ्गोपभोग्यं ऊर्ध्वमूलमधश्शाखमित्थं वटवृक्षं विभाव्य, तदनु[८] प्रणवकृतषण्मात्रपूरकप्राणायामपूर्वार्धेन[९] पार्थिवधारणया[१०] ह्लामित्युच्चारणपञ्चकेन पत्रपुष्पफलरहितं स्तब्धं विभाव्य, तदनु पूरकापरार्धेनाप्यधारणया[११] ह्लीमित्युच्चारणचतुष्टयेन[१२] स्निग्धपत्रपुष्पफलोपेतं च विभाव्य, द्वादशमात्रिककुम्भपूर्वापरार्धाभ्यामग्निधारणया ह्लूमित्युच्चारणत्रयेण दक्षिण-

---

[१] ०मुत्सार्यानित्य०] O; ०मुत्सार्य नित्य० N

[२] वियद्] conj.; omits N, O

[३] विभावयेत्] N; विभायेत् O

[४] पृथिव्यादिपञ्चभूतबीजं] conj.; प्रथिव्यादिपञ्चभूतं बीज N, पृथिव्यादिपञ्चभूतं बीजं O

[५] रागद्वेषधर्माधर्ममोहमूलं] Npc, O; रागद्वेषधर्माधर्ममूलं मोहमूलं Nac

[६] कलादि०] N, Opc; कला...० Oac

[७] ०पल्लवं] N; ०...वं O

[८] तदनु] N; तद... O

[९] प्रणवकृतषण्मात्र०] O; प्रणवकृ...मात्र० N

[१०] पार्थिव०] em.; पार्थवी० N, O

[११] पूरकापरार्धेनाप्यधारणया] Npc; पूरकिपरार्धेनाप्यधारणया Nac, पूरकापरार्धेनाप्य...रण... O

[१२] ह्लीमित्युच्चारणचतुष्टयेन] N; ह्लीमित्यु...चतुष्टयेन O

पादाङ्गुष्ठोत्थितकालाग्निना शुष्कं दग्धञ्च विभाव्य, चतुर्विंशतिमात्रिकरेचक-पूर्वार्धेन वायव्यधारणया ह्यौमित्युच्चारणद्वयेन भस्मीभूतं दशदिक्षु प्रलीनं विभाव्य, रेचकापरार्धेन नाभसधारणया हौमित्येकोच्चारणेन शुद्धस्फटिकरूपं परमव्योमरूपं विभावयेत्। ततो बन्धकरूपं सर्वशून्यमिति विभाव्य, ततः शाक्तेन भस्मना पिण्डीभूतं[१] दिव्यदेहमिति विभाव्य, वौषडन्तमूलेन[२] शिखा-न्तस्थाधोमुखपद्मस्रवदमृतधाराभिः[३] सकलनाडीमुखं प्रविष्टाभिः सृष्टिक्रमेण स्वबाह्याभ्यन्तरं[४] सर्वं शरीरं समाप्लावयेत्। सिद्धान्तसारावल्याम्-

स्वं देहं भूतबीजं हरिविधिरचितं स्वाङ्कुरं[५] कर्ममूलं
भाव्यं कालादिसारं विषयदलगतं खादिशाखोपशाखम्।
भावाशेषप्रसूनं[६] व्यवसितसुफलं[७] पुंविहङ्गोपभोग्यं[८]
न्यग्रोधं चोर्ध्वमूलं विषयरसमवाक्शाखिनं भावयेच्च ॥ ८७ ॥

87-88. Quoted from *Siddhāntasārāvali*, 41-42, pp. 21-22.

[१] पिण्डीभूतं] conj.; पिणीभूतं N, ...णीभूतं O

[२] वौषडन्त०] N; ...त० O

[३] ०मृतधाराभिः] em.; ०मृतधारापि N, O

[४] सृष्टिक्रमेण स्वबाह्याभ्यन्तरं] conj.; सृष्टिक्रमेण सबाह्याभ्यन्तरं N, सृष्टिक...ण स...ह्यभ्यन्तरं O

[५] स्वाङ्कुरं] O; स्वाङ्कुर N

[६] भावाशेष०] Opc; भावाशेषे० N, Oac

[७] व्यवसितसुफलं] conj.; ... N, व्यवहितसुफलं O

[८] पुंविहङ्गो०] conj.; पुहंविहङ्गो० N, O

कुम्भापूरकरेचकार्द्धयुगलैर्ह्रामादिमन्त्रान्[१] पठन्
पृथ्व्यादिस्थगुणस्थितक्रमयुतं[२] पत्राद्ययोगान्वितान्[३]।
शोषाद्दाहकभस्मतद्व्यपनयाच्छुद्धो[४] नभोभावना-
च्छक्त्याप्लावितमन्त्रविग्रहयुतः पूजां विदध्याद्धृदि ॥ ८८ ॥

[११.१.९. षडुत्थासनार्चनापुरःसरमात्मावाहनम्]

सुधाभिषेकेणानेन दिव्यदेहमिति स्मरेत्।
ततः[५] स्वहृदि शक्त्यादि षडुत्थासनमर्चयेत्॥ ८९॥
त्रिकालप्रणवेनाथ[६] तन्मध्ये तु चतुष्कला[७]।
प्रणवाक्षरमुच्चार्य[८] पुर्यष्टाङ्गं विभावयेत्[९]॥ ९०॥

---

[१] कुम्भापूरकरेचकार्द्धयुगलैर्ह्रामा०] conj.; कूम्भापूरकरेचकार्द्धयुगले ह्रामा० N, O

[२] पृथ्व्यादिस्थगुणस्थितक्रमयुतं] em.; पृथ्व्याधिस्तगुणस्थितक्रमयुतं N, पृथ्व्याधिस्तगुणस्थितकमयुतं O

[३] ०न्वितान्] conj.; ०च्युतान् N, O

[४] शोषाद्दाहक०] em.; शोषाद्दाह० N, O

[५] ततः] em.; तत N, O

[६] ०प्रणवेनाथ] O; ०प्रणवेना... N

[७] तु चतुष्कला] N; ...ष्कला O

[८] ०क्षरमुच्चार्य] N; ०क्षर...र्यं O

[९] विभावयेत्] N; विभाव...त् O

पुरुषत्वाप्तये[१] पश्चादोमा पञ्चकलायुजा[२] ।
द्वादशान्तस्थमात्मानमानीयात्रात्ममन्त्रतः ॥ ९१ ॥

ओं हूं हां हं हां हूं आत्मने नमः[३] ।

इत्युक्त्वात्मानमावाह्य[४] हृदये प्रणवासने ।

[११.१.१०. पुरुषस्थापना]

हृदात्मानं तु[५] संस्थाप्य सपुर्यष्टकविग्रहम् ॥ ९२ ॥
पूर्वोक्तवत्सुधापूरैः पुमांसं स्थापयेद्धृदा ।

[११.१.११. न्यासः]

अङ्गन्यासं ततः कृत्वा[६] महामुद्रान्तमप्यथो[७] ॥ ९३ ॥
ब्रह्मभिः पञ्चभिर्दण्डमुण्डभङ्ग्यर्पणं[८] पुनः ।

91ab. In the expression *"paścād omā pañcakalāyujā"*, *OṂ* is again declined as a consonantal stem noun (here in *tṛtīyā*).

---

[१] पुरुषत्वाप्तये] N; ...रु...प्तये O

[२] पश्चादोमा] conj.; पश्चाद्धोम N, पश्चादोम O

[३] ओं हूं हां हं हां हूं आत्मने नमः] em.; ओं हूं हां हं हां आत्मने नमः N, ओं हं हां हं हां आत्म... O

[४] इत्युक्त्वात्मानमावाह्य] em.; ...त्युक्त्वात्मा...मावाह्य N, ...त्युक्त्वात्मान...ह्य O

[५] हृदात्मानं तु] N; हृ ... त्मनं तु O

[६] अङ्गन्यासं ततः कृत्वा] N; ...ङ्ग...स...कत्वा O

[७] महामुद्रा०] N; महा... O

[८] ०भङ्ग्यर्पणं] em.; ०पर्भन्त्यर्प... N, ०पङ्क्त्यर्पणं O

अष्टत्रिंशत्कलान्यासमप्यत्रावसरे[१] क्रिया[२] ॥ ९४ ॥

केवलं मातृकान्यासं श्रीकण्ठन्यासमेव वा ।

नाष्टत्रिंशत्कलान्यासं तदयोग्यं[३] समाचरेत् ॥ ९५ ॥

[११.१.१२.१. मानसयागमाहात्म्यम्]

कालोत्तरेऽपि[४] –

अकृत्वा मानसं यागं यो बहिर्यागमारभेत्[५] ।

अशिवस्तु स विज्ञेयो न मोक्षाय[६] विधीयते ॥ ९६ ॥

[११.१.१२.२. शिवोऽहं भावमाहात्म्यम्]

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भाव्य च ।

यावन्न तत्समो जातः तावन्नाराधने क्षमः ॥ ९७ ॥

95ab. The *mātṛkānyāsa* can be found in the *Ātmārthapūjāpaddhati*, T. 55, p. 293ff. *Śrīkaṇṭhanyāsa* can be found in the *Śivapratiṣṭhāvidhi*, p. 345.
96ab. Cf. *Svacchandatantra*, 3:52. Quoted from *Siddhāntasārāvali*, p. 121.
97ab. Quoted from *Kālottara* 7.18ab, T. 59, p. 29.

---

[१] अष्टत्रिंशत्कला०] O; अष्टत्रंशत्कला० N

[२] क्रिया] conj.; जक्रियाम् N, क्रियाम् O

[३] तदयोग्यं] em.; तदयोग्यः N, O

[४] कालोत्तरेऽपि] em.; कालोक्तरेऽपि N, कालोत्तरे O

[५] ०मारभेत्] N, Opc; ०माकेत् Oac

[६] न मोक्षाय] conj.; नान्मोक्षाय N, नामोक्षाय O

[११.१.१२.३. अन्तर्यागः]

हृदञ्जलिकरो भूत्वा अन्तर्यागं[१] समाचरेत्।

हृदयेऽर्चाविधानञ्च नाभावाहुतिकर्म[२] च[३] ॥ ९८ ॥

ध्यानस्थानं ललाटं स्यात्त्रिस्थानं[४] शिवयोगिनाम्।

तस्मात्स्वहृदयाम्भोजे ज्योतिर्लिङ्गे[५] शिवं[६] यजेत्॥ ९९॥

निश्वासे चात्र[७] लिख्यन्ते निश्वासादिवचांसि[८] च।

निश्वासाख्यागमे –

कदलीपुष्पसङ्काशं हृदयं[९] सर्वदेहिनाम्॥ १०० ॥

98cd. Cf. *Kālottara* 8:53ab, T. 59, p. 39. हृदयेऽर्चाविधानं तु नाभौ होमं प्रकल्पयेत्।
100cd. *Niśvāsakārikā* 36.12ab, T. 17, p. 320.

---

[१] अन्तर्यागं] N; ततोऽन्तर्यागं O

[२] हृदयेऽर्चाविधानञ्च नाभावाहुति कर्म] N; हृद...ना... कम O

[३] च] O; वा N

[४] ललाटस्यात्त्रिस्थानं] Npc; ललाटस्योत्त्रिस्थानं Nac, O

[५] ज्योतिर्लिङ्गे] N; ज्योतिलिङ्गे O

[६] शिवं] O; ...वं N

[७] निश्वासे चात्र] conj.; निश्वासायात्र N, निश्वासाया चात्र O

[८] निश्वासादिवचांसि] N; निश्वा...* दिववांसि O

[९] ०सङ्काशं हृदयं] N; ०सं...यं O

शिवधर्मोत्तरे -

नाभिमूलोद्भवन्नालमष्टाङ्गुलसमुन्नतम्[1] ।
द्वादशाङ्गुलविस्तीर्णं चतुरङ्गुलकर्णिकम्[2] ॥ १०१ ॥
षोडशोपदलोपेतं प्रधानाष्टदलान्वितम्[3] ।
अणिमादिगुणोपेतं सितपद्मं[4] हृदि स्मरेत् ॥ १०२ ॥
आवृतेषु दलेष्वष्टस्वों शिवाय नमो नमः ।
इन्द्रादीशानकोष्ठान्तं[5] न्यसेदष्टाक्षराणि तु[6] ॥ १०३ ॥
चिन्तयेत्कर्णिकां तस्य पञ्चाशद्बीजगर्भिताम् ।
तत्पद्मकर्णिकामध्ये[7] लिङ्गं मणिमयं शुभम् ।
प्रतिष्ठाप्य च[8] मनसा पूजयेच्छिवमुक्तवत् ॥ १०४ ॥

101-104. Quoted from *Śivadharmottara*, 10:81ff.

[1] ०मूलोद्भवन्नालमष्टा०] Opc; ०मूलोद्भवन्नालमंष्टा० N, ०मूलोभवन्नालमष्टा० Oac
[2] चतुरङ्गुल०] N; चतुर...ल० O
[3] प्रधानाष्ट०] O; प्रधानष्ट० N
[4] सितपद्मं०] em.; सितसत्मं० N, सितपत्मं O
[5] इन्द्रादीशानकोष्ठान्तं] em.; इन्द्रादीशानकाष्ठान्नं N, इन्द्रादी...O
[6] न्यसेदष्टाक्षराणि तु] N; न्य...ष्टा...राणि तु O
[7] ०कर्णिकामध्ये] Npc; क॰कामध्ये Nac, ०कर्णिका...ध्ये O
[8] प्रतिष्ठाप्य च] em.; प्रति...भ N, प्रतिष्ठाप्येभ O

निश्वासे -

पद्मनालं नवद्वारं समन्तात्परिकीर्तितम् ।

नालमष्टाङ्गुलं विद्याद्ग्रन्थिर्मायाभिधीयते ॥ १०५ ॥

कालोत्तरे -

वितस्तिमात्रं[१] हृत्पद्मं कर्णिका चतुरङ्गुला ।

अङ्गुष्ठपर्वतुल्योच्चा[२] कर्णिका केसरैर्युता ॥ १०६ ॥

मन्त्राश्च केसराणि स्युर्विद्यायां ये प्रतिष्ठिताः ।

देहो देवालयः प्रोक्तो जीवो[३] देवस्सदाशिवः ॥ १०७ ॥

ज्ञानशम्भुशिवाचार्यप्रोक्तपूजास्तवे[४] स्फुटम् ।

[११.१.१२.३.१. अष्टपुष्पाणि]

अहिंसाद्यष्टभिः[५] पुष्पैरर्चयेद्वारिजादिभिः[६] ॥ १०८ ॥

105ab. Quoted from *Niśvāsakārikā* 36:14ab, T. 17, p. 320.
105cd. Cf. *Niśvāsakārikā* 36:21b, on p. 322.
106. Not traced in any recension of the *Kālottara*, but this verse appears as *Niśvāsakārikā* 36:13, T. 17, p. 320.
108. Probably a reference to v. 7 of *Śivapūjāstava*.

---

[१] वितस्ति०] N, Opc; वृतस्ति० Oac

[२] अङ्गुष्ठपर्वतुल्योच्चा] N; अ...र्वतुल्योच्चा O

[३] जीवो] N; जीघो O

[४] ०शिवाचार्यप्रोक्तपूजास्तवे] em.; ०शिवाचार्यप्रोक्ता पूजास्तवे N, ०शिवा...प्रोक्ता...स्तवे O

[५] अहिंसाद्यष्टभिः] N; अहिंसा... O

[६] पुष्पैरर्चयेद्वारिजादिभिः] O; पुष्पैरर्चयेद्वारिजा...भिः N

वातुले -

अहिंसा[1] प्रथमं पुष्पमन्यदिन्द्रियनिग्रहः ।

दयापुष्पं तृतीयं स्याच्चतुर्थं ज्ञानपुष्पकम्[2] ॥ १०९ ॥

पञ्चमं तु क्षमापुष्पं तपः[3] पुष्पं तु षष्ठकम्[4] ।

सप्तमं[5] भावपुष्पं स्यात्सत्यपुष्पं तथाष्टमम् ॥ ११० ॥

किरणे -

वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं[6] तथा ।

वानस्पत्यं[7] पुनः षष्ठं प्रजापत्यं तु सप्तमम् ॥ १११ ॥

अष्टमं शिवपुष्पं स्यात्किरणोक्तं विविच्यते ।

वारिजं कमलाद्यं स्यात्सौम्यं घृतपयोदधि[8] ॥ ११२ ॥

109-110. Untraced in the *Vātula*, but quoted in Anantaśambhu's commentary on *Siddhāntasārāvali 46*:

अहिंसा प्रथमं पुष्पमिन्द्रियाणां तु निग्रहः । क्षान्तिपुष्पं दयापुष्पं ज्ञानपुष्पं परं मतम् ॥

तपः पुष्पं सत्यपुष्पं भावपुष्पं तथाष्टमम् ।

---

[1] अहिंसा] N; अ...सा O

[2] स्याच्चतुर्थं ज्ञानपुष्पकम्] N; स्या...ज्ञानपुष्प... O

[3] तपः] N; त... O

[4] षष्ठकम्] em.; ष...रिम् N, षष्ठरिम् O

[5] सप्तमं] N; स...मं O

[6] वायव्यं पार्थिवं] N; वाय...र्थिवं O

[7] वानस्पत्यं] N; वान... O

[8] कमलाद्यं स्यात्सौम्यं घृतपयोदधि] N; ...लाद्यं स्यात्सौ...घृतप...दधि O

आग्नेयं धूपदीपाद्यं[1] वायव्यं चन्दनाद्रवम्[2] ।
पार्थिवं[3] कन्दमूलाद्यं वानस्पत्यं फलादिकम् ॥ ११३ ॥
प्राजापत्यं यदन्नाद्यं श्रद्धा स्याच्छिवपुष्पिका ।
इत्येतैरष्टभिः[4] पुष्पैः शिवं सम्पूजयेत्सदा[5] ॥ ११४ ॥
पार्थिवः सकलो[6] गन्धो[7] भवत्यापोऽभिषेचनम् ।
ता एव पाननैवेद्यं तैजसं[8] दीपमालिका ॥ ११५ ॥
वायव्यं[9] तालवृन्ताद्यं गीताद्यं नाभसं सुमम्[10] ।

111-114. Cf. *Kiraṇa* 59:29-32.

वारिजं सौम्यमाग्नेयं वायव्यं पार्थिवं पुनः । वानस्पत्यं पुनः षष्ठं प्रजापत्यं तु सप्तमम् ॥
अष्टमं शिवपुष्पं तु शृणु तेषां विनिर्णयम् । वारिजं सलिलं ज्ञेयं सौम्यं मधु घृतं पयः ॥
आग्नेयं धूपदीपाद्यं वायव्यं चन्दनादिकम् । पार्थिवं कन्दमूलाद्यं वार्क्षं पुष्पफलादिकम् ॥
प्राजापत्यं यदन्नाद्यं शिवपुष्पं तु वासना । एवं सदाशिवं देवं पूज्य पुष्पैः सदाष्टभिः ॥

---

[1] आग्नेयं धूपदीपाद्यं] N; आग्नेयं धू...दीपाद्यं O

[2] वायव्यं चन्दनाद्रवम्] em.; वायव्यं पार्थिवं चन्दनाद्रवम् N, वाय... O

[3] पार्थिवं] em.; पार्थिव N, ...वं O

[4] इत्येतैरष्टभिः] N; इत्येतै... O

[5] शिवं सम्पूजयेत्सदा] em.; शिवस्सम्पूजयेत्सदा N, ...स्स...येत्स... O

[6] पार्थिव॰] N; पा...व O

[7] गन्धो] em.; ...न्धो N, ग... O

[8] तैजसं] N, Opc; तैजं Oac

[9] वायव्यं] N; वा... O

[10] गीताद्यं नाभसं सुमम्] N; गीता...सुमम् O

इति प्रकल्प्य मनसा पूजयेद्धार्दमीश्वरम्[1] ॥ ११६ ॥

[११.१.१२.३.२. बाह्ययागवद्धान्तर्यागः]

अथवा बाह्यपूजावदन्तर्यागं समाचरेत्[2] ।
अग्निकार्यञ्च नाभौस्यादागमोक्तेन वर्त्मना[3] ॥ ११७ ॥

[११.१.१२.३.३. पञ्चवाद्यानि]

पञ्च वाद्यानि सन्त्यत्र भेरिकाद्यं तु पार्थिवम् ।
आप्यवाद्यं तु शंखाद्यं[4] नालाद्याग्नेयमीरितम् ॥ ११८ ॥
वंशादिवाद्यं[5] वायव्यं घण्टानादस्तु नाभसः ।
किञ्चात्र[6] वेदगीतादि तेवारादि परायणम् ।
इत्येवं पञ्च वाद्यानि मनसा तु निवेदयेत्[7] ॥ ११९ ॥

117cd. Allusion to *Sārddhatriśati* 2:13.

---

[1] पूजयेद्धार्दमीश्वरम्] em.; पूजये...ददमीश्वरम् N, पूजयेद्धाद...श्वरम् O
[2] ०वदन्तर्यागं समाचरेत्] N; ०व...र्यागं स... रेत् O
[3] वर्त्मना] em.; वत्मना N, O
[4] तु शंखाद्यं] N; ...द्यं O
[5] वंशादिवाद्यं] N; वं...वाद्य O
[6] किञ्चात्र] conj.; किञ्चाश्रु] N, किञ्चासृ O
[7] निवेदयेत्] N; नि...येत् O

[११.१.१२.३.४. नाभिकुण्डेऽग्निकार्यम्]

कामिके –

नाभिकुण्डे स्वभावोत्थे तर्पयेत्परमामृतैः[1] ।
इडयापूरकाकृष्य[2] सुधया च शिवाणुभिः ॥ १२० ॥
ज्ञानानलं न्यसेत्तत्र सूर्यायुतसमप्रभम्[3] ।
हृत्पुण्डरीकमध्याच्चु[4] सौषुम्नेन[5] पथानलम् ॥ १२१ ॥
द्वादशान्तपदे योज्य[6] तत्तेजस्पुञ्जपिञ्जरम्[7] ।
तेन विन्यस्तमात्रेण[8] सर्वकर्मार्हको भवेत् ॥ १२२ ॥
इत्युक्त्वा नाभिकुण्डेऽग्निकार्यं[9] कृत्वा ततः परम् ।

120ab. Quoted from *Pūrva-Kāmika*, 4:180ab, p. 31.
120cd. Quoted from *Acintyaviśva*, T. 7, p. 220.
121-122. Cf. *Kriyākramadyotikā*, p. 76.

---

[1] तर्पयेत्परमामृतैः] Npc; तर्पयेत्परमामृतेः Nac, तर्प…परम…मृतैः O
[2] इडयापूरकाकृष्य] em.; इसयापूरयाकृष्टा N, O
[3] सूर्यायुतसमप्रभम्] N; सूर्यायु…स…प्रभम् O
[4] हृत्पुण्डरीकमध्याच्चु] N; हृ…पुण…री…मध्याच्चु O
[5] सौषुम्नेन] O; साषुम्नेन N
[6] योज्य] em.; योज्यं N, यो… O
[7] ०पुञ्जपिञ्जरम्] em.; ०पुञ्जपिञ्जरः N, O
[8] ०मात्रेण] conj.; ०मार्गेण N, O
[9] नाभि०] O, Npc; नीभि० Nac

[११.१.१२.३.५. हृदये ज्योतिर्लिङ्गार्चनम्]

तत्फलं चान्तरीशाय समर्प्याथाष्टभिः[१] सुमैः ॥ १२३ ॥
अहिंसादिभिरुक्तैस्तैर्हार्ददलिङ्गं[२] तु ज्योतिषम्।
सम्पूज्य हृदयेनैव[३] ज्योतिर्लिङ्गं[४] हृदालये ॥ १२४ ॥
ततस्तदर्च्चितं लिङ्गं ज्योतीरत्नमयं[५] हृदा।
समुत्थाप्य समादाय[६] भ्रूमध्ये स्थापयेत्सुधीः[७] ॥ १२५ ॥
ध्यायेत्तत्र[८] शिवं शुद्धं परमाक्षरमव्ययम्।
सर्वप्रकाशकं सौम्यं निष्कम्पार्चिस्प्रदीपवत्[९] ॥ १२६ ॥

124b. *jyotiṣam* – This is not usually an adjective and this would not normally be the correct form.

---

[१] समर्प्या०] N; समघ्या० O

[२] ०लिङ्गं] Npc; ०लिशं Nac, ०लि... O

[३] हृदये०] N; ... ये० O

[४] ज्योतिर्लिङ्गं] em.; ज्योतिलिङ्गं N, ज्योँतिर्लिङ्गं O

[५] ततस्तदर्च्चितं लिङ्गं ज्योतीरत्नमयं] N; तदस्तदर्च्चि...रत्नमयं O

[६] समादाय] Opc; समावाय Oac, समा...य N

[७] स्थापयेत्सुधीः] O; स्थापये...धीः N

[८] ध्यायेत्तत्र] Npc, O; ध्यायेत् ** त्तत्र Nac

[९] ०प्रदीपवत्] O; ०प्र...त् N

कालोत्तरे –

प्राकृतं भावमुत्सृज्य शिवोऽहमिति[1] भावयेत्।
एतं समाधिमुत्कृष्टं[2] प्रवदन्ति[3] मनीषिणः ॥ १२७ ॥

[११.१.१२.३.६. अन्तर्यागप्रकारः]

शिवपूजास्तवे[4] –

हृत्पद्माख्यशिवालये मनसिजे तत्कर्णिकाख्ये[5] क्रिया-
पीठे ज्ञानमयं[6] विशुद्धमनसा संस्थाप्य नादात्मना[7]।
लिङ्गं तच्च[8] सुधामयेन पयसा[9] संस्नाप्य सम्यक् पुनः
वैराग्येण[10] च चन्दनेन वसुभिः पुष्पैरहिंसादिभिः ॥ १२८॥

127. Quoted from *Kālottara*, T. 59, p. 346.

[1] शिवोऽहमिति] N, Opc; शिवोमंहमिति Oac

[2] समाधिमुत्कृष्टं] em.; समाधिमुत्... तं N, समा...त्कृष्टं O

[3] प्रवदन्ति] conj.; प्रविदन्तिं N, O

[4] शिवपूजास्तवे] em.; सद्धान्तसारावल्याम् N, O

[5] °कर्णिकाख्ये] Npc, O; °कर्णिकान्ये Nac

[6] ज्ञानमयं] N; ज्ञानम... O

[7] नादात्मना] em.; नासात्मना N, O

[8] लिङ्गं तच्च] em.; लिङ्गत्त च्च N, O

[9] पयसा] N; प...सा O

[10] वैराग्येण] conj.; वैराग्येन N, O

प्राणायामभवेन धूपविधिना चिद्दीपदानेन[1] यः
प्रत्याहारमयेन सोमहविषा[2] सौषुम्नजापेन च ।
तच्चित्ते[3] बहुधारणाभिरमलध्यानोद्भवैर्भूषणै[4]
स्तत्साम्याणुनिवेदनेन[5] यजते धन्यस्स एवामलः ॥ १२९ ॥

चन्द्रास्त्राविसुधामयेन[6] हविषा नाभिस्थकुण्डेऽनलं
सन्तर्प्येशमयं शिवास्पदगतं[7] व्योम्नि स्थिते[8] सर्वगे ।
कन्दोद्भूतशिवाणुनादशिखया वृत्यात्मसम्वेदनं[9]
शैवे ज्योतिषि[10] यः करोति पुरुषो मुक्तस्स[11] एवाक्षयः[12] ॥ १३० ॥

128–130. Quoted from *Śivapūjāstava*, vv. 12–14.

---

[1] चिद्दीप०] N; चिद…प० O

[2] प्रत्याहारमयेन सोमहविषा] em.; प्रत्याहारमथो मयेन हविषा N, O

[3] तच्चित्ते] em.; तद्विक्तो N, तच्चित्तो O

[4] ०र्भूषणै०] Npc, O; ०र्दूषणै० Nac

[5] ०निवेदनेन] N; ०निवेदने O

[6] ०विसुधामयेन] N, Opc; ०षिविसुधा…येन Oac

[7] शिवास्पदगतं] N; शिवास्फदग… O

[8] व्योम्नि स्थिते] N; व्यो…स्थेते O

[9] वृत्यात्मसम्वेदनं] em.; प्रत्यात्मसम्वेद… N, प्रत्यात्मसम्वे… O

[10] ज्योतिषि] em.; ज्योनिषि N, ज्यो…षि O

[11] पुरुषो मुक्तस्स] em.; विमलमुक्तस्स N, O

[12] एवाक्षयः] N; ए…क्ष… O

इत्यथो तदनुज्ञातो बहिरर्चां समाचरेत्।
अन्तर्यागोऽयमित्युक्तो भुक्तिमुक्तिफलप्रदः ॥ १३१ ॥

[११.२. स्थानशुद्धिः]

अन्तर्यागादथो बाह्ये[१] स्थानशुद्धिं समाचरेत्।

पारमेश्वरे –

उग्रभूतपिशाचाद्या इह मे भूमिघातकाः ॥ १३२ ॥
ये भूता विघ्नकर्तारस्ते गच्छन्तु शिवाज्ञया।
पठित्वेत्यथ वीक्षादि कृत्वा तालत्रयं ततः[२] ॥ १३३ ॥
दिग्बन्धं छोटिकास्त्रेण कृत्वा[३] तु क्रिययानया।
तत्रत्यविघ्नानुत्सार्य[४] शस्त्रप्राकारमुज्वलम्[५] ॥ १३४ ॥
कृत्वाथ तद्बहिर्देशे तर्जनीभ्रमणत्रयात्।
वर्मणा परिखास्तिस्त्रः कृत्वा सुमनसा ततः[६] ॥ १३५ ॥

132c-133b. Untraced in the *Pārameśvarasaṃhitā*.
Cf. *Ātmārthapūjāpaddhati*, T. 323, p. 169.

---

[१] अन्तर्यागादथो वाह्ये] N; अ...र्यांगा...थो भ्वाह्ये O

[२] ततः] N; ... O

[३] कृत्वा] N; कृ... O

[४] तत्रत्य] conj.; तत्राद्य N, तत्रच O

[५] शस्त्रप्राकार०] N; शस्त्रप्रकार० O

[६] स्तिस्त्रः कृत्वा सुमनसा ततः] N; ...स्त्रः कृत्वा सु...नसा त... O

ओं ह्रां[1] ह्रीं शक्तये वौषडिति मुद्रां पयस्विनीम् ।
महामुद्राञ्च दत्वा[2] तच्छक्तिप्रोतं स्मरेत्स्थलम् ॥ १३६ ॥
स्थानशुद्धिरिति प्रोक्ता विशेषार्घ्यविधिस्ततः[3] ।

[११.२.१. पात्राणि]

अर्घ्यादिपात्रनिर्माणं चिन्त्यविश्वे समीरितम्[4] ॥ १३७ ॥

चिन्त्यविश्वे –

पञ्चाङ्गुलसमुच्छ्रायं तथा विस्तारसंयुतम् ।
एकाङ्गुलसमानोष्ठमर्धाङ्गुलघनान्वितम्[5] ॥ १३८ ॥
आत्मार्थे तु तदूर्ध्वं[6] वा तदर्धं[7] वापि कारयेत् ।
तथा पाद्याचमार्घ्याणां[8] पृथक् चेत्पात्रमुत्तमम् ॥ १३९ ॥

---

138. Untraced in the *Cintyaviśva*.

---

[1] ओं ह्रां] em.; ओं हां N, O

[2] दत्वा] em.; तत्वा N, O

[3] ०विधिस्ततः] em.; ०विधिस्थितः N, ०वि...तः O

[4] अर्घ्यादिपात्रनिर्माणं चिन्त्यविश्वे समीरितम्] N; अर्घ्य...श्वे स...रितम् O

[5] ०मर्धाङ्गुलघनान्वितम्] N; ० ...र्धाङ्गुलवम...तम् O

[6] तदूर्ध्वं] em.; त...ध्वं N, O

[7] तदर्धं] N; ... O

[8] पाद्याचमार्घ्याणां] em.; पा...चमार्घ्याणां N, पाद्या...र्घ्याणां O

पात्रालाभे[१] त्रयाणाञ्च पात्रमेकं प्रकल्पयेत्[२] ।

[११.२.१.१. पात्रविकल्पः]

पात्राभावेऽपि शङ्खं स्याच्छुक्तिकां[३] वापि कारयेत् ॥ १४० ॥

शङ्खश्चेत्प्रस्थपूर्णश्चेदुत्तमः[४] स तु कथ्यते ।

[११.२.१.२. शङ्खलक्षणम्]

मूलस्थूलो भवेन्नारी शिखास्थूलो नपुंसकः ॥ १४१ ॥

अग्रेणापि च मूलेन समः शङ्खः पुमानिति[५] ।

उत्तमो दक्षिणावर्तः[६] तस्मादपि चलञ्चलः[७] ॥ १४२ ॥

अन्तश्शुद्धिकरः[८] शङ्खो बहिरस्थिवदीरितः ।

तस्मात्सर्वाङ्गमाद्यन्तं बद्ध्वा च कनकादिना ॥ १४३ ॥

[११.२.१.३. पात्रशोधनविधिः]

कांस्यं वा भस्मना पात्रं ताम्रमाम्लेन शोधयेत् ।

---

[१] पात्रालाभे] N, Opc; पात्रालाभ Oac

[२] प्रकल्पयेत्] N; प्रक...त् O

[३] ०च्छुक्तिकां] N; ०च्छु...कां O

[४] ०प्रस्थपूर्णश्चेदुत्तमः] N; ०प्रस्तपू...श्चेदुक्तमः O

[५] पुमानिति] N; पु...नति O

[६] दक्षिणा०] N; ... क्षिणा० O

[७] चलञ्चलः] O; च चञ्चलः N

[८] अन्तश्शुद्धि०] N; अन्तश्शुचि० O

दध्ना तु राजतं शङ्खं तुषदग्धेन भस्मना ॥ १४४ ॥

इति विज्ञाय शङ्खादिपात्रं हैमं परं ततः ।

[११.२.१.४. शङ्खाङ्गेषु देवताः]

शङ्खपादे त्रिपाद्यादावधिदेवास्त्रिमूर्त्तयः[1] ॥ १४५ ॥

आधारशक्तिर्वृत्ताग्रे[2] पात्रपादाधिदेवताः ।

शङ्खमूले धरादेवीं कुक्षौ[3] विष्णुं समर्चयेत् ॥ १४६ ॥

धारावारिण्यघोरन्तु वलये तु दिवाकरम् ।

मुखे तु सप्त[4] तीर्थानि प्रवेशे चन्द्रमर्चयेत् ॥ १४७ ॥

शङ्खमेवं परिज्ञाय तारतम्यञ्च पात्रतः[5] ।

पात्रमिष्टं समादाय प्रक्षाल्यास्त्रेण वारिणा ॥ १४८ ॥

[११.२.१.५. पात्रपूरणम्]

पादे वा तत्त्रिपाद्यां वा निधायास्त्रेण तत्परम् ।

ईक्षणादिचतुश्शुद्धिपूतमर्घ्यस्य भाजनम् ॥ १४९ ॥

145c-147. Cf. *Sūkṣma* 40:64.

---

[1] त्रिपाद्यादावधिदेवास्त्रिमूर्त्तयः] O; त्रपाद्यादावधिदेवास्त्रमूर्त्तयः N

[2] °शक्तिर्वृत्ताग्रे] conj.; °शक्तिवृत्ताग्रे N, O

[3] कुक्षौ] O; लक्ष्मौ N

[4] सप्त] em; सस्न N, स...त O

[5] पात्रतः] O; पार्थिवतः N

हृदा बिन्दूत्थपीयूषधारावारा[१] प्रपूर्य तत् ।

[११.३.१. अर्घ्यद्रव्याणि]

क्षीरपुष्पतिलान्दर्भयवसिद्धार्थतण्डुलान्[२] ॥ १५० ॥

निक्षिप्यात्र[३] विशेषार्घ्ये द्रव्याष्टकमिदं[४] स्मृतम्[५] ।

†शिवासनेन तन्मूर्त्या ब्रह्मभिर्विद्यया दृशा[६]† ॥ १५१ ॥

मूलेनाङ्गैर्विना नेत्रं[७] पुनर्मूलेन चार्चयेत् ।

ब्रह्माङ्गैरभिमन्त्र्याथ[८] कृत्वा तालत्रयं तथा[९] ॥ १५२ ॥

रक्षावकुण्ठने चाथ वौषडन्तेन मूलतः[१०] ।

धेनुमुद्रां महामुद्रां दत्वाथाचमनीयकम् ॥ १५३ ॥

---

[१] बिन्दूत्थपीयूषधारावारा] N; ...न्दूत्थपीयूषधारावारा O

[२] ०तिलान्दर्भयवसिद्धार्थ०] em; ०तिलान्दर्भयवसिद्धार्ध० N, O

[३] निक्षिप्यात्र] N, Opc; निक्षिप्योत्र Oac

[४] विशेषार्घ्ये द्रव्या०] N; विशेषा...व्या O

[५] स्मृतम्] em; सकम् N, O

[६] ब्रह्मभिर्विद्यया दृशा] N; ब्रह्म...या...शा O

[७] नेत्रं] N; ...O

[८] ब्रह्माङ्गै०] N; ब्र...० O

[९] तथा] N; तता O

[१०] मूलतः] N; मूलितः O

एलालवङ्गकर्पूरतिम्बूजातीफलं[१] मुरम्[२] ।
निधाय पूर्ववत्पात्रं पूरयेद्वैन्दवाम्बुना ॥ १५४ ॥
द्रव्यषट्कं च निक्षिप्य नमः संहितया जपेत्[३] ।
इत्थमाचमनीयं तु त्रिपाद्यां स्थापयेदथो ॥ १५५ ॥
पाद्यद्वयं षडङ्गैस्तु दूर्वासिद्धार्थचन्दनम्[४] ।
सोशीरं पूजयेदेतच्चतुर्द्रव्यं[५] द्विपाद्यगम्[६] ॥ १५६ ॥
अथवा पाद्यमेकं †स्यादेकमेवाथवा त्रिषम्† ।
संहिताभिर्निरोधार्घ्यं न तस्य द्रव्यमीरितम्[७] ॥ १५७ ॥
सामान्यार्घ्येण संभूय स्थाप्य षट्कं शिवार्चने[८] ।

154ab. Cf. *Dīpta* 94:177cd. ०तिम्बू० apparently this form is used in *Sūkṣma*, etc.

---

[१] ०तिम्बूजातीफलं] O; ०तिनिम्बूजातीफलं N
[२] मुरम्] N; अमुरम् O
[३] जपेत्] em; जयेत् N, O
[४] दूर्वा०] O; ...० N
[५] पूजयेदेतच्चतु०] O; पूजय...तु० N
[६] द्विपाद्यगम्] conj.; भिपाद्यगम् N, O
[७] द्रव्यमीरितम्] Npc, O; द्रर्घन्यमीरितम् Nac
[८] शिवार्चने] O; शिवार्चे... N

पाद्यमीश्वरतत्त्वान्तमाचामाख्यं[1] सदेशगम्[2] ॥ १५८ ॥

शिवार्घ्यं[3] शिवतत्त्वान्तं रोधार्घ्यं शक्तिगोचरम्

इति दीप्तागमे प्रोक्तन्द्रव्यशुद्धिरथोच्यते[4] ॥ १५९ ॥

[११.३.२. द्रव्यशुद्धिः]

शिवार्घ्यस्थापनात्पश्चात्कुर्याद्द्रव्यविशोधनम्[5] ।

द्रव्यशुद्धिस्तु का शम्भोर्वस्तुग्रहणयोग्यता[6] ।

ईक्षणादेः फलं प्रोक्तं कामिकादौ तदुच्यते ॥ १६० ॥

कामिके -

ईक्षणं मूलमन्त्रेण प्रोक्षणं चास्त्रमन्त्रतः ।

ताडनं[7] चास्त्रमन्त्रेण वर्मणाभ्युक्षणं[8] भवेत् ॥ १६१ ॥

158c-159a. Attribution to *Dīpta* in *Ātmārthapūjāpaddhati*, T. 371, p. 854 and T. 55, p. 355. *Śaivasiddhāntasaṅgraha*, T. 46, p. 220.
161. Quoted from *Pūrva-Kāmika*, 8:42.
वीक्षणं शिवमन्त्रेण प्रोक्षणं चास्त्रमन्त्रतः । वर्मणाभ्युक्षणं कार्यं ताडनं चास्त्रमन्त्रतः ॥

---

[1] ॰माचामाख्यं] O; ॰...माख्यं N

[2] सदेशगम्] em.; ...दे...कम् N, ...देशगम् O

[3] शिवार्घ्यं] O; शि... N

[4] ॰द्रव्यशुद्धि॰] N; ॰द्र...शुद्धि॰ O

[5] विशोधनम्] O; वि...धनम् N

[6] ॰वस्तुग्रहण॰] O; ॰वस्तुर्ग्रहण॰ N

[7] ताडनं] conj.; मार्जनं N; माद्यनं O

[8] वर्मणा॰] em.; वर्माणा॰ N, O

पारमेश्वरे -

दृक्क्रियेच्छात्मकैरर्कसोमवह्निविलोचनैः[1] ।

क्रमाच्छुष्कं तथा दग्धममृताप्लुतिसंयुतम्[2] ॥ १६२ ॥

तन्त्रसारे -

जडचिद्भेदनं[3] विद्धि शिवदृष्ट्या निरीक्षणम् ।

प्रोक्षणं योग्यताक्लृप्तिर्जडाद्भिन्नस्य वस्तुनः ॥ १६३ ॥

ताडनं तत्र चिद्व्यक्तिर्यथा[4] पाषाणताडनम् ।

उत्पत्तिर्विस्फुलिङ्गानामभ्युक्षणमतः[5] परम् ॥ १६४ ॥

अमृतीकरणं तावज्जडचित्पूर्त्तिकारणम् ।

कामिकादाविति प्रोक्तमीक्षणादिप्रयोजनम् ॥ १६५ ॥

इति तस्माद्विशेषार्घ्यजलेनात्मानमस्त्रतः ।

प्रोक्ष्य पूजोपकरणद्रव्याणि निखिलानि[6] च ॥ १६६ ॥

162. Untraced in the *Pārameśvarasaṃhitā*. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 356. दृक्क्रियाच्छात्मकैरर्कवह्निसोमविलोचनैः । क्रमाच्छुष्कं तथा दग्धममृताप्लुतिसंयुतम् ॥

163. Untraced in the *Tantrasāra*.

[1] दृक्क्रिये॰] em.; दृक्क्रिये॰ N, O

[2] दग्ध॰] conj.; दृश्य॰ N, O

[3] जडचिद्भेदनं] O; जलचिद्भेदनं N

[4] चिद्व्यक्ति॰] conj.; चिद्भक्ति॰ N , चिद्वक्ति॰ O

[5] उत्पत्ति॰] N; उत्...क्ति॰ O

[6] निखिलानि] N; ...ला... O

तथा चतुर्भिः संस्कारैः पवित्रीकृत्य बुद्धिमान्।
सम्प्रदायमुखेनैव ज्ञेयं कार्यं हि सर्वदा ॥ १६७ ॥
सर्वं गुरुमुखाज्ज्ञेयं सम्प्रदायो हि दुर्लभः[१]।
गन्धादिसुरभिद्रव्यं[२] सद्योमन्त्रेण संस्पृशेत्[३] ॥ १६८ ॥
हिमतोयञ्च कर्पूरं वासोवर्गञ्च वामतः।
भूषावर्गमघोरेण स्पृशेद्दक्षेण पाणिना ॥ १६९ ॥
यानि नैवेद्यवस्तूनि तानि तत्पुरुषेण तु।
पुष्पाणीशेन[४] चान्यानि गायत्र्या वाभिमन्त्र्य च ॥ १७० ॥
विशेषार्घ्याम्बुसंसिक्तमेकपुष्पं[५] हृदा ततः।
स्नानाम्बुदक्षिणे[६] क्षिप्त्वामृतीकुर्याद्विचक्षणः ॥ १७१ ॥
द्रव्यशुद्धिं विधायैवमात्मपूजामथाचरेत्।
तत्कथं पत्रखण्डेन स्वासने तु शिवासनम् ॥ १७२ ॥

---

[१] दुर्लभः] em.; दुर्लभम् N, O

[२] गन्धादि०] Npc, O; गन्धात्रिदि Nac

[३] संस्पृशेत्] N; सं...शेत् O

[४] पुष्पाणीशेन] em.; पुष्पाणीशैन N, O

[५] विशेषार्घ्याम्बुसंसिक्त०] em.; विशेषार्घ्याम्बुसंसक्त० N, वि...षार्घ्याम्बुसंयु(स)क्त० O

[६] स्नानाम्बुदक्षिणे] em.; स्नानं प्रदक्षिणे N, स्नानांबूदक्षिणे O

शिवमूर्त्तिं हृदि न्यस्य तिलकं चन्दनेन तु ।
फाले धृत्वाथ[१] पुष्पैस्तु मूलेनाभिषिच्य मूर्धनि ॥ १७३ ॥
हृदञ्जलिकरः पश्चान्मौनी भूत्वा स्थिरः स्वयम्[२] ।
पशुभावं परित्यज्य शिवोऽहमिति भावयेत् ॥ १७४ ॥
यावन्न तत्समो जातस्तावन्नाराधने क्षमः ।
शुद्धत्वान्निर्मलत्वाच्च[३] स्वाङ्गं शिवतनुं स्मरेत् ॥ १७५ ॥
इति कालोत्तरे प्रोक्तं नारुद्रो रुद्रमर्चयेत् ।
इत्युक्तं[४] शिवधर्मे च तस्माच्छम्भुसमर्चने[५] ॥ १७६ ॥
शिवोऽहं भावना कार्या सर्वदाप्यास्तिकोत्तमैः ।
आत्मपूजाक्रिया प्रोक्ता[६] मन्त्रशुद्धिस्ततः परम् ॥ १७७ ॥

[इति सौन्दरनाथदेवविरचिते शम्भुपुष्पाञ्जलौ आत्मपूजाविधिर्नाम द्वितीयोधिकारोऽयम् ॥]

177b. Cf. *Śivadharmaśāstra* 1:24.

---

[१] धृत्वाथ] O; ...त्वाथ N
[२] स्थिरः स्वयम्] em.; स्थिर स्वयम् N
[३] शुद्धत्वान्निर्मलत्वाच्च] O; शुद्धत्वानिर्मलत्वाच्च N
[४] इत्युक्तं] O; ...क्तं N
[५] तस्माच्छम्भुसमर्चने] O; तस्मा...ने N
[६] प्रोक्ता] em.; प्रोक्तः N, O

॥ तृतीयाधिकारः ॥

[११.४. मन्त्रशुद्धिः]

कथं तन्मौनमादाय मौनं षड्डु विधीयते।
आवश्यके च स्नाने चानुष्ठाने जपकालतः[१] ॥ १ ॥
अर्चने भोजने चेत्यथोङ्कारादिनमोन्तकम्।
मूलं प्लुतं शिखान्तस्थं नादान्तं[२] ब्रह्मपञ्चकम्[३] ॥ २ ॥
दीर्घं ततः षडङ्गानि बिन्द्वन्तं ह्रस्वमुच्चरेत्।
यथाशक्त्याथवा मन्त्राननन्यानपि यथार्हणम्[४]।
चिन्त्यविश्वोक्तिरत्रापि लिख्यते निर्णयाय तु ॥ ३ ॥

चिन्त्यविश्वे[५] –

बिन्दुनादशिखाप्रान्तं मन्त्रानुच्चार्य[६] शोधयेत्।

---

4. Untraced in the *Cintyaviśva*.

---

[१] जपकालतः] O; जपक...त N

[२] नादान्तं] conj.; करान्तं N, O

[३] ब्रह्म॰] O; ...ह्म N

[४] यथार्हणम्] N; य...र्हणम् O

[५] चिन्त्यविश्वे] O; चि...विश्वे N

[६] मन्त्रानुच्चार्य] conj.; मन्त्राढनुच्चार्य N, O

ज्ञानशक्तिमया मन्त्राः[१] शिवेनाधिष्ठिताः सदा ॥ ४ ॥

इत्युक्तं हि तथाप्येषां शुद्धिस्स्यात्कथमुच्यते ।

अधिकारमलोपेताः[२] किञ्चैश्वर्यमदान्विताः[३] ॥ ५ ॥

शक्तिज्वलितसामर्थ्याः[४] सर्वेऽभीष्टफलप्रदाः[५] ।

इत्युक्तं चिन्त्यविश्वे तो मन्त्रशुद्धिरितीरिता ॥ ६ ॥

मौनन्तु शिवपूजायां तदयोग्याप्रशंसनम् ।

ततो हृद्यञ्जलिं[६] न्यस्त्वा[७] भीमरुद्रं समर्चयेत् ।

पेट्टकालयपार्श्वे तु भीमरुद्रस्थितिर्यथा ॥ ७ ॥

[११.५.१. भीमरुद्रपूजनम्]

अंशुमति -

गर्भगेहं प्रविश्याथ पिधानोद्घाटनात्पुरा ।

गर्भाग्रे भीमरुद्रन्तु स्थितमासीनमेव वा ॥ ८ ॥

5c-6b. Untraced in the *Cintyaviśva*.

[१] मन्त्राः] em.; ...I N, मन्त्राO

[२] ०मलोपेताः] em.; ०मलेपेता N, ०मलोपेता O

[३] ०न्विताः] em.; ०न्विताम् N, O

[४] ०सामर्थ्याः] em.; ०सामर्थां N, O

[५] सर्वेऽभीष्टफलप्रदाः] O; सर्वाभिष्टफलप्रदाः N

[६] हृद्यञ्जलिं] Oac; हृदाञ्जलिं Opc, हृदिञ्जलिं N,

[७] न्यस्त्वा] N; न्यक्त्वा O

चतुर्भुजं त्रिणेत्रं[1] च वरदाभयसंयुतम्।

पिञ्छचामरसंयुक्तं[2] भीमरुद्रं विभावयेत्॥ ९॥

इत्युक्त्वा ओं भीमरूद्राय नम इत्यभिवन्द्य च।

पुनश्च प्रार्थनावाक्यं पठेदंशुमदीरितम्॥ १०॥

अंशुमति[3] -

निशाचरान्तकृत् देव देवेशयजनार्थकम्[4]।

शुद्धद्वारस्य सव्ये तु गच्छ त्वं हि प्रसीद[5] मे॥ ११॥

आत्मार्थे च परार्थे च भीमरुद्रं समर्चयेत्।

इत्युक्त्वांशुमद्वाक्याद्भीमरुद्रार्चनादथो।

[११.५.२. पेटिकोद्घाटनम्]

पेटिकोद्घाटनं कृत्वा परिवारपरिग्रहः॥ १२॥

8-9. Quoted from *Aṃśumat*, T. 4, p. 134.
गर्भगेहं प्रविश्याथ पिधानोद्घाटनं ततः॥
गर्भाग्रे होमरुद्रश्च स्थितश्चैव समन्वितम्। चतुर्भुजं त्रिनेत्रश्च वरदाभयसंयुतम्॥
पिच्छिचामरसंयुक्तं भीमरुद्रं विभावयेत्॥
11. Quoted from *Aṃśumat*, T. 4, pp. 134-135.

---

[1] त्रिणेत्रं] O; त्रणेत्रं N

[2] ०चामर०] N; ०चा...र० O

[3] अंशुमति] O; अंशुम... N

[4] निशा०] O; ...शा० N

[5] हि प्रसीद] N; ...सीद O

ज्ञानशक्तिमया मन्त्राः[१] शिवेनाधिष्ठिताः सदा ॥ ४ ॥

इत्युक्तं हि तथाप्येषां शुद्धिस्स्यात्कथमुच्यते ।

अधिकारमलोपेताः[२] किञ्चैश्वर्यमदान्विताः[३] ॥ ५ ॥

शक्तिज्वलितसामर्थ्याः[४] सर्वेऽभीष्टफलप्रदाः[५] ।

इत्युक्तं चिन्त्यविश्वे तो मन्त्रशुद्धिरितीरिता ॥ ६ ॥

मौनन्तु शिवपूजायां तदयोग्याप्रशंसनम् ।

ततो हृद्यञ्जलिं[६] न्यस्त्वा[७] भीमरुद्रं समर्चयेत् ।

पेट्टकालयपार्श्वे तु भीमरुद्रस्थितिर्यथा ॥ ७ ॥

[११.५.१. भीमरुद्रपूजनम्]

अंशुमति -

गर्भगेहं प्रविश्याथ पिधानोद्घाटनात्पुरा ।

गर्भाग्रे भीमरुद्रन्तु स्थितमासीनमेव वा ॥ ८ ॥

5c-6b. Untraced in the *Cintyaviśva.*

---

[१] मन्त्राः] em.; ...I N, मन्त्राO

[२] ॰मलोपेताः] em.; ॰मलेपेता N, ॰मलोपेता O

[३] ॰न्विताः] em.; ॰न्विताम् N, O

[४] ॰सामर्थ्याः] em.; ॰सामर्थां N, O

[५] सर्वेऽभीष्टफलप्रदाः] O; सर्वाभिष्टफलप्रदाः N

[६] हृद्यञ्जलिं] Oac; हृदाञ्जलिं Opc, हृदिञ्जलिं N,

[७] न्यस्त्वा] N; न्यक्त्वा O

चतुर्भुजं त्रिणेत्रं[१] च वरदाभयसंयुतम्।
पिञ्छचामरसंयुक्तं[२] भीमरुद्रं विभावयेत्॥ ९॥
इत्युक्त्वा ओं भीमरूद्राय नम इत्यभिवन्द्य च।
पुनश्च प्रार्थनावाक्यं पठेदंशुमदीरितम्॥ १०॥

अंशुमति[३] –

निशाचरान्तकृत् देव देवेशयजनार्थकम्[४]।
शुद्धद्वारस्य सव्ये तु गच्छ त्वं हि प्रसीद[५] मे॥ ११॥
आत्मार्थे च परार्थे च भीमरुद्रं समर्चयेत्।
इत्युक्त्वांशुमद्वाक्याद्भीमरुद्रार्चनादथो।

[११.५.२. पेटिकोद्घाटनम्]

पेटिकोद्घाटनं कृत्वा परिवारपरिग्रहः॥ १२॥

8-9. Quoted from *Aṃśumat*, T. 4, p. 134.
गर्भगेहं प्रविश्याथ पिधानोद्घाटनं ततः॥
गर्भाग्रे होमरुद्रञ्च स्थितञ्चैव समन्वितम्। चतुर्भुजं त्रिनेत्रञ्च वरदाभयसंयुतम्॥
पिच्छिचामरसंयुक्तं भीमरुद्रं विभावयेत्॥
11. Quoted from *Aṃśumat*, T. 4, pp. 134-135.

---

[१] त्रिणेत्रं] O; त्रणेत्रं N
[२] ०चामर०] N; ०चा...र० O
[३] अंशुमति] O; अंशुम... N
[४] निशा०] O; ...शा० N
[५] हि प्रसीद] N; ...सीद O

अंशुमति -

सर्वबेरासनार्थं तु तत्तत्स्थाने समर्चयेत्।
पेटकात्सर्वबेराणि[१] पृथक् सङ्गृह्य बुद्धिमान्॥ १३॥
आच्छादनं तु गळितं[२] प्रोक्षयेदस्त्रवारिणा।
निर्माल्यञ्च विसृज्याथ मानसं स्नानमाचरेत्॥ १४॥

[११.५.३. परिवारदेवतापूजनम्]

गणेशं नैर्ऋते न्यस्त्वा स्कन्दं वायुदिशि न्यसेत्।
महेशं दक्षिणे देशे पूर्वाशाभिमुखं न्यसेत्॥ १५॥
लिङ्गस्य तूत्तरे नृत्तमूर्त्यादीन्[३] दक्षिणाननान्।
चक्रस्य[४] दक्षिणे न्यस्य भस्माधाराक्षमालिके[५]॥ १६॥
भस्माधारे तु मायाख्यं भसिते[६] लकुलीश्वरम्[७]।

13-18. Quoted from *Aṃśumat*, T. 4, pp. 135-136.
17. Cf. *Uttara-Kāmika*, 6:166c-167b.
भस्माधारे उमाख्या स्यात् भसिते लकुलीश्वरम्। अनन्तादींश्च सूत्रे तु गन्धाद्यैरर्चयेत्क्रमात्॥

---

[१] पेटका०] O; पेटिका० N

[२] गळितं] O; गा...तं N

[३] तूत्तरे नृत्तमूर्त्यादीन्] conj.; तूक्त नृत्तमूर्त्यादीं N, तृक्त...नृत्तमूर्त्यादीन् O

[४] चक्रस्य] em.; शक्रस्य N, शकस्य O

[५] भस्माधाराक्षमालिके०] N; भस्मा...ाराक्षमालि...के० O

[६] भसिते] O; भस्मिते N

[७] लकुलीश्वरम्] N; ल... O

वासुकिं तस्य सूत्रे तु गन्धपुष्पैः समर्चयेत् ॥ १७ ॥
लिङ्गाग्रे[१] वृषभं न्यस्य लिङ्गाभिमुखमेव च ।
पीठस्य वामभागे तु भोगशक्तिंश्च विन्यसेत् ॥ १८ ॥
पूर्वे प्रत्यङ्मुखे भानुं दक्षिणास्यं तु दक्षिणे[२] ।
सोमशङ्करयोर्मध्ये भक्तादीन्विन्यसेत्क्रमात्[३] ॥ १९ ॥
पुष्पं मूर्धनि[४] विन्यस्य[५] पश्चाद्ध्यानं[६] समाचरेत्[७] ।
गणेशक्षेत्रपालान्तमर्चयेत्स्वस्वमन्त्रतः[८] ॥ २० ॥

Cf. *Pūrva-Kāraṇa*, 139:10c-11b
भस्माधारे तु मायाख्यं भसिते लकुलीश्वरम् । अनन्तादींश्च सूत्रे तु गन्धाद्यैरर्चयेत्क्रमात् ॥

Cf. *Sahasra*, T. 33, p. 230. भस्माधारे महामाया भस्मन्नादं सदाशिवम् ।

19cd. Cf. *Sūkṣma* 40:73cd. सोमशङ्करयोर्मध्ये भक्तादीन् विन्यसेत् क्रमात् ।
Also attributed to *Sūkṣma* in the *Ātmārthapūjāpaddhati*, T. 371.

20ab. Cf. *Sūkṣma* 40:75ab पुष्पं मूर्ध्नि विन्यिस्य पश्चाद्द्वारं प्रपूजयेत् ।

20cd. Cf. *Sūkṣma* 40:78ab गणेशादि क्षेत्रपालान्तमर्चयेत् स्वस्वनामतः ।

---

[१] लिङ्गाग्रे] N; लिङ्गा... O

[२] दक्षिणास्यं तु दक्षिणे] O; दक्षिणास्यं तु दक्षिणास्यं तु दक्षिणे N

[३] भक्तादी°] em.; भात्तादि° N, भात्तादी° O

[४] मूर्धनि] conj.; मूर्द्धानि N, मू...नि O

[५] विन्यस्य] conj.; विद्धिस्य N, विन्निस्य O

[६] पश्चाद्ध्यानं] em.; पश्चाद्धानं N, O

[७] समाचरेत्] O; समाच... N

[८] गणेशक्षेत्रपाला°] Opc; गगणेशक्षेत्रपाला° Oac, गणेशक्षे...ला° N

इति विज्ञाय[१] बेराणि तत्तत्स्थानेषु पूजयेत् ।

[११.५.४. बेरशुद्धिः]

स्नानं बेरविशुद्ध्यर्थं यदि शैलं दिने दिने ॥ २१ ॥

यदि वा[२] लोहजं बेरं स्नानं पर्वणि पर्वणि ।

एवमुक्ता परीवारदेवानामर्चना ततः ॥ २२ ॥

[११.५.५. स्नानवेदीनिर्माणम्]

स्नानवेदी[३] प्रकर्तव्या हेम्ना वा रजतेन वा ।

शुद्धकांस्येन वा यज्ञदारुणा[४] वा यथारुचि ॥ २३ ॥

तालमानं तदौन्नत्यं[५] सापिधानञ्च सावृति ।

दैर्घ्यं[६] तस्याः सनाळेन हस्तमानेन[७] सम्मतम् ॥ २४ ॥

तालेन तिर्यग्वैशाल्यमप्यन्यल्लक्षणं क्वचित् ।

इति वा स्नानवेदीं तु निर्माय स्वानुकूलतः ॥ २५ ॥

---

[१] विज्ञाय] N; ...ज्ञाय O

[२] यदि वा] O; यदि... N

[३] स्नानवेदी] O; स्न...वदी N

[४] यज्ञ०] O; ...ज्ञ० N

[५] तदौन्नत्यं] em.; तदौन्नत्य N, तदोन्नत्य O

[६] दैर्घ्यं] N, Opc; ऐघ्यं Oac

[७] हस्तमानेन] O; हस्त...नेन N

स्नानवेदीमुदङ्नालां प्राङ्नालां वा निधाय च ।
उपर्यास्तरणावासोऽस्याविस्तीर्य[1] च हेतितः ॥ २६ ॥

[११.५.३. आसनद्वयम्]

आत्मार्थयजने शम्भोरासनद्वयमिष्यते ।
एकं चलासनं तत्र स्थिरासनमतः परम् ॥ २७ ॥
स्नानकालोचितं[2] पूर्वमन्यकालोचितं[3] परम् ।
स्नानवेद्यां समभ्यर्च्य षड्भिर्मन्त्रैश्चलासनम् ।

[११.६.१. वेद्यां लिङ्गस्थापना]

तस्योपरि न्यसेल्लिङ्गं तत्क्रमोंऽशुमदीरितः[4] ॥ २८ ॥

अंशुमति -

ओं नमो देवदेवेश सर्वलोकैकनायक ।
उत्तिष्ठात्राभिषेकार्थमात्मरक्षार्थमेव[5] च ॥ २९ ॥
इति विज्ञाप्य पाणिभ्यां पेटकाल्लिङ्गमाददत् ।

---

29. Quoted from *Aṃśumat*, T. 4, p. 137 and T. 745, p. 23.
ओं नमो देवदेवेश सर्वलोकैकनायक । उत्तिष्ठस्नानकर्मार्थमात्मरक्षार्थमेव च ॥

---

[1] उपर्यास्तरणावासोऽस्यावि॰] em.; …र्यास्तरणावासो N, उपर्यास्तरणावासोऽस्याः O
[2] स्नानकालोचितं] O; स्नानकाले… N
[3] पूर्वम॰] conj.; पूर्वाम॰ N, O
[4] तत्क्रमो॰] N; तत्कमो॰ O
[5] उत्तिष्ठात्राभिषेकार्थमात्म॰] N; उत्तिष्ठात्राभिषेर्थामत्म॰ O

स्नानवेद्युपरि न्यस्य[1] वस्त्रमुन्मुच्य[2] हेतितः ॥ ३० ॥

[११.६.२. पर्युषितपूजा]

अथ पर्युषितां पूजां गायत्र्याभ्यर्च्च्य तत्परम्।
सामान्यार्घ्यं तु मूलेन दद्यात्पञ्चसु मूर्धसु ॥ ३१ ॥
भोगीशानादि[3] योगी तु सद्योजातमुखाद्यथो[4]।
अस्मिन्नवसरे देयं नैवेद्यं भक्ष्यवस्तु वा ॥ ३२ ॥
दध्यन्नं वापि दुग्धं वा ताम्बूलञ्चेत्तदुत्तमम्[5]।
धूपदीपौ ततो दत्वा सास्त्रघण्टारवान्वितम्[6] ॥ ३३ ॥
अजातादिकनिष्ठादिक्रमाद्ब्रह्माणि विन्यसेत्।
अप्यङ्गुष्ठादि चेशादिपञ्चब्रह्माणि विन्यसेत्।

[११.६.२.१. पर्युषितयाग]

अथ पर्युषितत्यागश्चण्डेशाय तु तत्कथम्॥ ३४ ॥

---

[1] स्नानवेद्यु०] N, Opc; स्ननवेद्यु० Oac

[2] ०मुन्मुच्य] N; ०मु...मुच्य O

[3] भोगीशानादि] O; भोगीशाना तु N

[4] ०मुखा०] conj.; ०मुखो० N, O

[5] ताम्बूलञ्चेत्तदुत्त०] conj.; ताम्बूलञ्चेत्तमुत्त० N, O

[6] सास्त्रघण्टारवान्वितम्] Npc, O; सास्त्रघर्णाण्टारवान्वितम् Nac

सूक्ष्मे –

कनिष्ठानामिकामध्ये नवपुष्पं तु संग्रहेत्[1]।
अङ्गुष्ठतर्जनीभ्यां तु हृदा[2] निर्माल्यमोचनम्॥ ३५॥
पुष्पोत्सर्जनकाले तत्पुष्पं मूर्ध्नि[3] हृदा न्यसेत्।
इति सूक्ष्मागमे प्रोक्तं सम्प्रदायमिदं वचः॥ ३६॥
निर्माल्यं कुत्रचित्पात्रे[4] हृदैशाने[5] निधाय तत्।

[११.६.३. लिङ्गशुद्धिः]

अथ फड्वाहान्तमस्त्रेण[6] लिङ्गं गड्डुकपाथसा[7]॥ ३७॥
अभिषिच्य ततस्तद्वत्पीठं पाशुपतेन च।
सामान्यार्घ्येण तत्पश्चादभिषिञ्चेद्धृदोभयम्॥ ३८॥

35-36b. Quoted from *Sūkṣma* 40: 81c-82.
कनिष्ठानामिकामध्ये नवपुष्पं तु संग्रहेत्।
अङ्गुष्ठतर्जनीभ्यां तु निर्माल्यं च विसर्जयेत्॥
विसर्जनस्य तत्काले पुष्पं मूर्ध्नि च विन्यसेत्।

---

[1] संग्रहेत्] N; …हेत् O
[2] हृदा] N; हृदया O
[3] मूर्ध्नि] N, Opc; मूर्ध्निति Oac
[4] कुत्रचित्पात्रे] N; कुत्र…त्रे O
[5] हृदैशाने] N; हृदै…ने O
[6] फड्वाहान्त०] O; षड्वाहान्त० N
[7] ०पाथसा] conj.; ०पायसा N, O

एतावन्मात्रतो लिङ्गशुद्धिः स्यादिति[१] चक्षते ।

ज्ञानशम्भुशिवाचार्यपद्धत्यादौ[२] तथेरितम् ॥ ३९ ॥

ज्ञानरत्नावल्यां –

नित्यपूजासमाप्तौ तु रुद्धे मन्त्रगणेश्वरे[३] ।

शान्तं रूपं[४] गते तत्र लिङ्गे पीठे[५] च तत्क्षणात् ॥ ४० ॥

रौद्रा[६] विघ्नास्तथासक्ताः स्थिता[७] विघ्नं प्रकुर्वते ।

भुक्तिं मुक्तिं[८] च निघ्नन्ति तस्मात्तान् रेचयेत्पुरा[९] ॥ ४१ ॥

शिवास्त्रेण च लिङ्गस्थान् पीठं पाशुपतेन च ।

40-43b. Quoted from *Jñānaratnāvalī*, GOML MS. R 14898, p. 68, T. 231, p. 76 and *Sakalāgamasaṃgraha*, T. 351, p. 220.

नित्यं पूजासमाप्तौ च मध्ये मन्त्रगणे शिवे । शान्तं रूपं गते तत्र लिङ्गे पीठे च तत्क्षणात् ॥

.... रौद्रा स्थित्वा विघ्नं प्रकल्पते । भुक्तिमुक्तिं च विघ्नन्ति तस्मात्तान् रेचयेत्पुरा ॥

शिवास्त्रेण च लिङ्गस्था पीठे च पाशुपतेन ते । पुनस्तासां च संस्नाप्य स्नापयेद्धृदयाम्बुभिः ॥

तदा लिङ्गं भवेच्छुद्धं पुनर्मन्त्राः फलप्रदाः ।

---

[१] ०शुद्धिः स्यादिति] N; ०शुद्धि...दिति O

[२] ज्ञान०] em.; ज्ञानं N, O

[३] मन्त्र०] N; ...न्त्र० O

[४] रूपं] N; ...पं O

[५] पीठे] N, Opc; पीशे Oac

[६] रौद्रा] N; ...I O

[७] ०स्तथासक्ताः स्थिता] conj.; स्थिता सक्तास्तथा N, O

[८] भुक्तिं मुक्तिं] conj.; भुक्तिमुक्तिं N, O

[९] तस्मात्तान् रेचयेत्पुरा] conj.; तस्मादन्येद्धुरादितः N, O

+पुनस्तासाञ्च संस्नाप्य+ स्नापयेद्धृदयाम्बुभिः ॥ ४२ ॥
तदा लिङ्गं भवेच्छुद्धं पुनर्मन्त्राः[१] फलप्रदाः ।
इत्यथो लिङ्गमुत्थाप्य हृदात्मर्चतृणेन[२] तु ॥ ४३ ॥
शनैर्विशोध्य गन्धादिलेपनं +तृणवद्दशी[३]+ ।
भूयस्तत्र निधायेशं हृदा शुद्धजलेन तु ॥ ४४ ॥

[१२. स्नानम्]

[१२.१. षडुत्थासनम्]

अभिषिच्य पुनः कल्प्यं स्नानकाले चलासनम् ।
अनन्तधर्मज्ञारागभूतिपद्मं[४] चलासनम् ॥ ४५ ॥
मध्यवह्न्यादिकोणेषु मध्ये चार्च्यञ्चलासनम् ।
षडुत्थासनमप्येतत्कथ्यते शैवदेशिकैः[५] ॥ ४६ ॥
ततः शिवासनं मूर्तिमूलेनाञ्जलिना[६] सुमैः ।
सम्यगावाह्य सम्पूज्य स्थापनादि विधाय च ॥ ४७ ॥

---

[१] ०मन्त्राः] conj.; ०मन्त्र N, ०मन्त्रा O
[२] हृदात्मर्चतृणेन] N; ...तृणेन O
[३] तृणवद्दशी] N; त्रि...द्दशी O
[४] ०पद्मं] O; प ... N
[५] ०देशिकैः] em.; ०देशिकः N, O
[६] मूर्तिमूलेना०] conj.; मूर्त्तिं मूलेना० N, O

पाद्याचमार्घ्यदानञ्च हृदाद्यर्चां विना दृशम्।
कुर्यात्स्थाने[१] तु वह्न्यादौ धूपदीपादिकार्पणम्॥ ४८॥
सासनमूर्तिमूलाङ्गा[२] नेत्रहीनाष्टपुष्पिका।
एतदावाहनं शम्भोः स्नानकालोचितं विदुः॥ ४९॥
अलमेतावदात्मार्थे कामिकादावुदीरितम्[३]।
विशिष्यावाहनं कार्यमात्मार्थे नाभिमज्जने॥ ५०॥
यदि कुर्यात्स दुर्मेधाः[४] स तु पूजाविडम्बकः[५]।
इत्युक्तं[६] स्वार्थपूजायां न परार्थे तथा मतम्॥ ५१॥
अभिषिच्य हृदा पश्चाद्वाससा परिमृज्य च।
तैलादिद्रव्यवर्गाणामभिषेकक्रमः कथम्॥ ५२॥

[१२.२. अभिषेकक्रमः]

आत्मार्थे च परार्थे च ह्यभिषेकक्रमः समः।

---

[१] कुर्यात्स्थाने] Npc, O; कुर्यत्स्थाने Nac

[२] सासनमूर्तिमूलाङ्गा] conj.; सासनं मूर्तिमूलाङ्ग N, सासनं मूर्तिमूलाङ्गा O

[३] ॰दावुदीरितम्] em.; ॰दाविदीरितम् N, O

[४] ॰दुर्मेयाः] N; ॰दुर्मेथाः O

[५] तु पूजाविडम्वकः] N; दुपूजाविसम्वकः O

[६] इत्युक्तं] O; इत्यथं N

अभिषेकक्रमो[1] ऽस्माभिर्व्याख्यातः[2] शैवभूषणे ॥ ५३ ॥

तैलात्पिष्टरसादिभिस्त्रिभिरथो[3] गव्येन पञ्चामृते-
राज्यस्नानमथो पयोदधिमधुस्नानं सितेक्षुस्रवैः[4] ।
कुर्यात्पञ्चरसैः[5] फलैस्त्रिभिरथो[6] स्नानञ्च नालयम्बुना[7]
चान्नैः[8] कुम्भजलैः सुगन्धसलिलैरर्घ्याभिषेकं[9] क्रमात् ॥ ५४ ॥

तेनादौ गन्धतैलेन सद्योजातेन मर्दयेत् ।
पिष्टेनामर्द्य[10] सर्वाङ्गमम्भसाऽऽमलकेन[11] च ॥ ५५ ॥

---

54. Quoted from *Śaivabhūṣaṇa*, 76. The last two *pādas* in the edition are different. कुर्यात्पञ्चरसैः फलैस्त्रिभिरथो नालयम्बुना चान्नतः । पश्चाच्चन्दनकुङ्कुमस्नपनकं कुम्भाभिषेकोऽर्घ्यतः ॥

---

[1] अभिषेक॰] N; ...क॰ O

[2] ॰र्व्याख्यातः शैवभूषणे] em.; अव्यक्तः शैवभूषणे N; अव्यक्तः शैवभूषणे ते शैवभूषणे O

[3] ॰रसादिभिस्त्रिभि॰] em.; ॰न...दि...॰ N, ॰नसादिभिस्त्रिभि॰ O

[4] स्रवैः] em.; स्नुवैः N, सृवैः O

[5] ॰रसैः] em.; ॰रसै N, O

[6] फलैस्त्रिभिरथो] Opc; ...स्त्रिभिरथो N, फलैस्त्रिभिरयो Oac

[7] नालयम्बुना] N, Opc; नलयम्बुना Oac

[8] चान्नैः] O; चान्तैः N

[9] सुगन्ध॰] em.; सुगन्धि॰ N, O

[10] पिष्टेनामर्द्य] em.; पिष्टेनामद्य N, पिष्टेनाषमर्द्य O

[11] ॰मलकेन] O; ...न N

रजन्या वामदेवेन[१] सहृदा[२] शीतलाम्बुना ।
ब्रह्मभिः पञ्चगव्येन मूलमन्त्रेण वा हृदा ॥ ५६ ॥
अनुक्ते यत्र मन्त्रे तु हृन्मन्त्रस्तत्र[३] सर्वतः ।
अथ पञ्चामृतस्नानं ब्रह्मभिः पृथगेव तत् ॥ ५७ ॥
अथाज्यस्नानमत्रोक्तमघोरेणोष्णवारिणा[४] ।
पञ्चगव्यं भवेत्क्षीरदध्याज्यजलगोमयम् ॥ ५८ ॥
पञ्चामृतं भवेत्क्षीरदध्याज्यमाक्षिकं सिता ।
दुग्धदध्याज्यमधुभिः सितेनेक्षुरसेन[५] च ॥ ५९ ॥
नालिकेरफलोद्भिश्च शकलैर्मिश्रितैस्तु[६] वा ।
रम्भाफलैः पृथग्वापि पनसैराम्रजैर्हृदा ॥ ६० ॥
लिकुचादिरसैरद्भिर्नालिकेरोदकैरथो[७] ।

59b. ॰माक्षिकं सिता After this, both manuscripts add this remark: माक्षिकैक्षवम् इति वा पाठः।

---

[१] वामदेवेन] O; वामदेवन N

[२] सहृदा] Opc; सुहृदा N, सहृस्रदा Oac

[३] हृन्मन्त्र॰] O; हृ ... न्त्र॰ N

[४] ॰स्नानमत्रोक्तमघोरेणोष्णवारिणा] em.; ॰स्नातुमत्रोक्तमघोरेणोष्णवाप सा N, ॰स्नातुमत्रोक्तमघोरेणोष्णवा...पसा O

[५] ॰मधुभिः सितेनेक्षु॰] em.; ॰मधुभि स्थितयेक्षु॰ N, O

[६] ॰फलोद्भिश्च शकलै॰] em.; ॰फलोद्भी शकलै॰ N, फलोद्भि शकलै॰ O

[७] लिकुचादि॰] em.; लिकूचादि॰ N, O

अन्नाभिषेकमात्मार्थे[१] कार्यं वा शक्तिरस्ति चेत् ॥ ६१ ॥
अम्बामन्त्रेण[२] कर्तव्यमन्नस्नानं शिवाय तु ।
तदा[३] धूपादि दत्वाथ[४] नैवेद्यञ्च समर्पयेत् ॥ ६२ ॥
अथवा चन्दनस्नानकालेऽवश्यं शिवाय तु[५] ।
यथालाभन्तु नैवेद्यं फलाद्यं वाम्बु वार्पयेत् ॥ ६३ ॥
नालिकेरोदकस्नानात्पश्चात्कुम्भाभिषेचनम्[६] ।
सपीठं लिङ्गमालिप्य कुङ्कुमागरुचन्दनैः ॥ ६४ ॥

[१२.३. शतधारादिभिरभिषेकः]

हिमाम्बुशतधाराद्भिर्मूलब्रह्माङ्गमुच्चरन् ।
पदमन्त्रेण संस्नाप्य शतधाराजलैः शनैः ॥ ६५ ॥
शतधारोर्ध्वं शङ्खाद्भिरभिषिञ्चेद्बुदा[७] शिवम् ।
केवलं तदभावे[८] स्यादविच्छिन्नपताकया[९] ॥ ६६ ॥

---

[१] अन्नाभिषेकमात्मार्थे] Opc; अन्ना...कमात्मार्थे N, अन्नाभिषेकमत्मार्थे Oac
[२] अम्बा०] N, Opc; अम्ब० Oac
[३] तदा] O; तथा N
[४] दत्वाथ] N; द... O
[५] तु] N, Opc; तु तद धूपादिदत्वाथ नैवेद्यं च समर्पयेत् Oac
[६] ०दकस्नानात्पश्चात्कुम्भाभिषेचनम्] N; ०... स्नानात्पश्चात...षेचनम् O
[७] ०रोर्ध्वं शङ्खाद्भिरभिषिञ्चेद्बुदा] em.; ०रोर्ध्वशङ्खाद्भिरभिषिञ्चेन्मुदा N, ०...शङ्खाद्भिरभिषिञ्चेन्मुदा O
[८] तदभावे] N; ततभावे O
[९] ०विच्छिन्नपताकया] em.; ०विच्छिन्नं पताक्रिया N, ०विच्छिन्नं पताकया O

गोशृङ्गाग्रप्रमाणेनाभिषिञ्चेच्छीतलाम्बुना ।
अविच्छिन्नाभिषेकेण[१] शिवोऽभीष्टं[२] प्रयच्छति ॥ ६७ ॥
सहस्रधारया[३] स्नानं नात्मार्थे शतधारया[४] ।
धारासहस्रमात्मार्थे ह्यायुश्रीकीर्तिनाशनम्[५] ॥ ६८ ॥
आत्मार्थयजने मुख्यं शतधाराभिषेचनम्[६] ।
धाराशङ्खाभिषेकञ्च[७] स्वाहान्तेनैव मूलतः ॥ ६९ ॥

[१२.४. अभिषेचनविकल्पविधिः]

अथाभिषिञ्चेन्मूलेन[८] विशेषार्घ्यं[९] हृदाथवा ।
लिङ्गमादाय वस्त्रेण शुष्केणैव सितेन तु[१०] ॥ ७० ॥

---

१ अविच्छिन्नाभिषेकेण] N; अभिच्छिन्ना...षेकेण O

२ शिवो०] N; शिवे० O

३ सहस्रधारया] O; सह...धारया N

४ ०धारया] em.; ०धारय N, O

५ ०त्मार्थे ह्यायुश्रीकीर्तिनाशनम्] em.; ०त्मार्थे ह्यायुश्रीकीर्ति*नाशतम् N, ०त्म...युश्रीकीर्तिना...नम् O

६ ०भिषेचनम्] O; ०भि...चनम् N

७ धाराशङ्खाभिषेकञ्च] O; धारा ...ङ्खाभि ...कञ्च N

८ अथाभिषिञ्चे०] N, Opc; अथाभिषेञ्चे० Oac

९ विशेषार्घ्यं] N, Opc; विषेशषार्घ्यं Oac

१० वस्त्रेण शुष्केणैव सितेन तु] N; ... शुष्केणै ... सिते ... O

मृदुना[१] वर्मणा मृज्य सावधानेन भक्तिमान्।
हस्तशुद्धिं स्मरंस्तूष्णीं मस्तके न्यस्तपुष्पकम्[२] ॥ ७१ ॥
आरोपयेद्भद्रपीठे लिङ्गमुत्तरगोमुखम्।
अथाविघ्नमिहास्त्विवत्थं[३] प्रार्थ्य विघ्नेश्वरं यजेत्॥ ७२ ॥

[१३.आसनम्]

[१३.१. पीठेदिगीशार्चनम्]

तत्पीठवायुदिक्प्राचि[४] गणेशं दक्षिणाननम्[५]।
पूजयेदुक्तवत्तस्य प्राचि तद्वन्महाश्रियम्॥ ७३ ॥
ईशदिक्पश्चिमे पूज्यं गुरुसप्तकमुच्यते[६]।
सदाशिवमनन्तञ्च[७] श्रीकण्ठं पुनरम्बिकाम्॥ ७४ ॥
गुहं कृष्णञ्च धातारं गुरून् सप्त स्मरन्यजेत्[८]।
ओं हां सदाशिवादिसप्तगुरुभ्यो नमः ॥ ७५ ॥

---

[१] मृदुना] O; …ना N

[२] ०पुष्पकम्] O; पुस्तकम् N

[३] अथाविघ्नमिहास्त्विवत्थं] conj.; अथाविघ्नमिहास्तितत्वं N, अथ…घ्नमिहास्तितत्वं O

[४] तत्पीठ] em.; तत्पीठं N, O

[५] दक्षिणाननम्] em.; दक्षिणाननाम् N, O

[६] गुरु०] em.; गुरुं N, O

[७] सदाशिव०] N; …दाशिव० O

[८] स्मरन् यजेत्] em.; स्मरेद्यजेत् N, स्मरेन् यजेत् O

[१३.२. गुरुसप्तकामर्चनम्]

एवमेकेन पुष्पेण गुरुसप्तकमर्चयेत्[१]।

गणेशादीनिमान्प्रार्थ्य[२] कुर्यामिति शिवार्चनाम्॥ ७६॥

[१३.३. शक्त्यादि- शक्त्यन्तासनपूजनम्]

अथ शक्त्यादिशक्त्यन्तमासनं[३] पूजयेत्कथम्।

देवस्य पीठाधोभागे शक्तिमाधाररूपिणीम्॥ ७७॥

अधः कूर्मशिलासीनां क्षीरोदसितविग्रहाम्।

मौलौ बीजाङ्कुराकारां वरदामभयप्रदाम्।

पाशाङ्कुशधरां शक्तिं क्रियामाधाररूपिणीम्[४]॥ ७८॥

[१३.३.१. आधारानन्तासनयोः मन्त्रौ]

एवमाधारशक्त्यर्चा - ओं हां आधारशक्तये नमः।

ततोऽनन्तासनार्चनम् - ओं हां अनन्तासनाय नमः।

78. Quotation from *Kriyākramadyotikā*, pp. 87–88.

[१] पुष्पेण गुरुसप्तकम०] N; पुष्पे ... कम० O

[२] ०प्रार्थ्य] O; ०प्रार्थ N

[३] ०शक्त्यन्तमासनं] em.; ०शक्त्यन्त मानसं N, O

[४] अधः कूर्मशिलासीनां...क्रियामाधाररूपिणीम्] O; omits N

[१३.३.२. अनन्तपूजा]

तदुपरि -

आसनोर्ध्वे महासत्त्वं ब्रह्माण्डाभरणक्षमम्[1]।
प्रपञ्चव्याप्तितो ब्रह्मशिलास्थं मन्त्रनायकम्।
मायापद्मासनं श्वेतमनन्तं पूजयाम्यहम्॥ ७९॥

किं च -

अनन्तं नीलसङ्काशं[2] सहस्रफणमण्डितम्[3]।
हृदञ्जलिसमोपेतमेकवक्त्रं चतुर्भुजम्॥ ८०॥
इत्यनन्तं समभ्यर्च्य पश्चात्पीठाङ्घ्रिपूजनम्।

[१३.३.३. पीठाङ्घ्रिपूजनम्]

धर्मो ज्ञानं च वैराग्यमैश्वर्यं च चतुष्टयम्॥ ८१॥
अग्न्यादीशान्तमभ्यर्च्य[4] तद्ध्यानञ्च निगद्यते[5]।
सिंहाकारांश्चतुष्पादान्द्विभुजानेकवक्त्रकान्[6]॥ ८२॥

---

79. Source untraced.
80. Source untraced.

---

[1] ब्रह्माण्डाभरण॰] O; ब्रह्माण्डभरण॰ N
[2] अनन्तं नीलसङ्काशं] O; अनन्तनीलसङ्काशं N
[3] सहस्रफणमण्डितम्] N; सहस्रफणमण्डि... O
[4] अग्न्यादीशान्तमभ्यर्च्य] em.; अग्न्यादीशान्तमभ्यर्च्य N, अ...न्तमभ्यर्च्य O
[5] निगद्यते] N; ...ते O
[6] ॰श्चतुष्पादान्द्वि॰] O; ॰श्चतुष्पादाद्वि॰ N

तदनन्तबलोपेतान् गात्रकासक्तमस्तकान्[१] ।
शश्यर्कपीतकृष्णादीनथाधर्मादिमर्चयेत्[२] ॥ ८३ ॥

[१३.३.४.गात्रकापूजनम्]

अधर्मादिस्वरूपेण[३] पीठगात्राणि[४] भावयेत् ।
प्रागधर्मं कृष्णसितं धर्मविन्यस्तमस्तकम् ॥ ८४ ॥
श्वेतरक्ताङ्गमज्ञानं[५] याम्ये प्राग्गतमस्तकम् ।
रक्तपीतमवैराग्यं पश्चिमे सौम्यमस्तकम् ॥ ८५ ॥
पीतकृष्णमनैश्वर्यं[६] पूर्वपादमुदग्दिशि ।
द्विहस्तान्येकवक्त्राणि[७] गात्राण्यर्च्यान्यधोमुखम् ॥ ८६ ॥
इत्थं गात्राणि चत्वारि ततोऽर्च्यं छदनद्वयम्[८] ।

[१३.३.५. छदनद्वयार्चनम्]

पीठाधश्छदनं[९] मायारूपं रक्तञ्च नैर्ऋते ॥ ८७ ॥

---

[१] गात्रकासक्त॰] N, Opc; गात्रकसक्त॰ Oac

[२] शश्यर्कपीतकृष्णादीनथाधर्मादिम॰] N; श्यर्कपीतकृष्णादिभानथाधर्माधिम॰ O

[३] अधर्मादिस्वरूपेण] N; अधर्माधिस्वरूपे... O

[४] पीठगात्राणि] N; ... त्राणि O

[५] श्वेतरक्ताङ्गमज्ञानं] N; श्वेतरक्ताङ्गज्ञानं O

[६] ॰मनैश्वर्यं] N; ॰मनै ... O

[७] ॰वक्त्राणि] em.; ॰वस्त्राणि N, O

[८] छदनद्वयम्] em.; चदनद्व ... N, च * नद्वयम् O

[९] पीठाधश्छदनं] em.; ...ठादाच्छादनं N, पीठादच्छदनम O

और्ध्वच्छदनमैशाने[1] विद्यारूपं सितं यजेत्।

[१३.३.६. पद्मस्य कन्दादियजनम्]

पीठमध्ये तु पद्मस्य कन्दादियजनं यथा[2] ॥ ८८ ॥
माणिक्कसदृशं[3] कन्दं यथाबीजं तथाङ्कुरम्।
नालं नीललताकारं कण्टकान्विद्रुमप्रभान्[4] ॥ ८९ ॥
दलानि रजताभानि[5] स्वर्णाभान्[6] केसरान्[7] स्मरेत्।
किञ्च मुक्तानिभाग्रांस्तानिति[8] ध्यात्वा[9] नमोऽन्तकैः ॥ ९० ॥

[१३.३.७. दलकर्णिकादिपूजनम्]

प्रणवाद्यैश्चतुर्थ्यन्तैरर्चयेत्स्वस्वनामभिः[10] ।
खल्वपत्रे दलान्यष्टौ[11] विद्येश्वरगृहाणि[12] तु ॥ ९१ ॥

---

[1] और्ध्वच्छदनमैशाने] em.; और्ध्वाधच्छदन…शाने N, और्ध्वाधच्छदनमैशाने O
[2] कन्दादियजनं यथा] O; कन्दादि… N
[3] माणिक्क॰] O; …णिक्क॰ N
[4] कण्टकान्विद्रुम॰] em.; कणृकान्विद्रुम॰ N, कणृका…॰ O
[5] रजताभानि] em.; रजताभाति N, रजता… O
[6] स्वर्णाभान्] em.; …र्णाभान् N, स्वर्णाभा… O
[7] केसरान्] N; …कसरान् O
[8] मुक्तानि॰] O; …नि N
[9] ध्यात्वा] O; ध्यात्वां N
[10] ॰र्चयेत्स्वस्वनामभिः] em.; ॰र्चयेत स्वनामभिः N, O
[11] दलान्यष्टौ] O; …लान्य…ौ N
[12] विद्येश्वरगृहाणि] conj.; विद्येश्वरग्रहाणि N, विश्वेद्य…णि O

तदूर्ध्वं केसराणि स्युश्चतुष्षष्टिरिमानि[१] च ।
तन्मध्ये कर्णिकां पीतां पञ्चाशद्बीजगर्भिताम्[२] ॥ ९२ ॥
एवं ध्यायन् कर्णिकायै नमोऽभ्यर्च्याथ मध्यतः ।
ओं बीजेभ्यो नमो भूयश्चेति[३] पद्मं विभाव्य च ॥ ९३ ॥
ओं पद्माय नमोऽभ्यर्च्य पद्ममुद्रां प्रदर्शयेत् ।
स्थिरासनान्तमेतावदित्युक्तं[४] कारणागमे ॥ ९४ ॥

[१३.३.८. वामादिशक्त्यर्चनम्]

कारणे[५] –

आधारशक्तिपद्मान्तं स्थिरासनमुदाहृतम् ।
अथाब्जकेसरेष्वष्टौ पूज्या वामादिशक्तयः[६] ॥ ९५ ॥
पूर्वादि कर्णिकैशाने[७] शक्तिरर्च्या मनोन्मनी ।

95ab. Untraced in the *Kāraṇa*, but quoted, with attribution to the *Kāraṇa*, in the *Ātmārthapūjāpaddhati*, T. 55, p. 391.

---

[१] ॰षष्टिरिमानि] O; ॰षष्ठिरमानि॰ N
[२] ॰गर्भिताम्] O; ॰गर्हिताम् N
[३] बीजेभ्यो नमो भूयश्चेति] N; बीजे...मो...यश्चेति O
[४] ॰मेतावदि॰] conj.; ॰देतावदि॰ N, O
[५] कारणे] N, Opc; करणे Oac
[६] ॰शक्तयः] Npc, O; ॰शक्तः यः Nac
[७] ॰कैशाने] N; ॰कैशा ... O

ध्यानं हि नवशक्तीनां[1] उच्यते साम्प्रदायिकम् ॥ ९६ ॥

उद्यद्दिनकराभासास्त्रिनेत्राश्च[2] चतुर्भुजाः[3] ।

कोट्यादित्यसमाः सर्वा जटाखण्डेन्दुमण्डिताः[4] ॥ ९७ ॥

सव्यहस्तद्वयासक्तचामराभीतिरञ्जिताः[5] ।

वामे त्वीशाङ्कसंसक्तवरदानलसत्कराः ॥ ९८ ॥

अनन्तादेरधिष्ठात्र्यः शिवस्यैवाष्टशक्तयः[6] ।

वामा[7] ज्येष्ठा च रौद्री च काली कलविकरणी ॥ ९९ ॥

बलविकरणी[8] चैव बलप्रमथिनी ततः ।

सर्वभूतदमन्यष्टौ मनोन्मन्या नव स्मृताः[9] ॥ १०० ॥

इति वामादिशक्त्यर्चा पश्चाद्ध्येया[10] मनोन्मनी ।

99c-100. Found also in the *Varuṇapaddhati*, vv. 90-91b, p. 93.

---

[1] ध्यानं हि नवशक्तीनां] conj; ध्यानभिन्नंवशक्तीनां N, O

[2] उद्यद्दिनकराभासास्त्रिनेत्राश्च] em; उद्द्यद्दिनकराभासात्रिणेत्राश्च N, उद्यदितकराभासास्त्रिणेत्राश्च O

[3] चतुर्भुजाः] N; चतु...जाः O

[4] जटा०] O; ज ...० N

[5] ०सक्त०] O; हस्ता N O

[6] अनन्तादेरधिष्ठात्र्यः शिवस्यैवा०] em; अनन्तादेरधिष्ठा...शिवस्यै...० N, अनन्तनादेरधिष्ठात्र्यः शिवस्यैवा० O

[7] वामा] em.; वाम N, O

[8] बलविकरणी] em.; बलविकारणी N, ...विकारणी O

[9] स्मृताः] em.; स्मृता N, O

[10] पश्चाद्ध्येया] N; पश्च...द्धय... O

शुभ्रवर्णा चतुर्बाहुरेकवक्त्रा त्रिलोचना[१] ॥ १०१ ॥
पाशाङ्कुशशुकालम्बहस्ताभ्यर्च्या मनोन्मनी ।
एवमों[२] ह्रीं मनोन्मन्यै नम इत्यधिकर्णिकम्[३] ॥ १०२ ॥

[१३.३.९ सूर्यसोमाग्निमण्डलत्रयपूजनम्]

पश्चाद्दलाग्रवृत्ते तु कोट्यादित्यसमप्रभम् ।
सूर्यमण्डलमभ्यर्च्य ब्रह्माणं तत्पतिं[४] यथा[५] ॥ १०३ ॥
पीतं चतुर्मुखोपेतं चतुर्हस्ताष्टलोचनम् ।
स्रुग्दण्डनमोमुद्राढ्यं[६] सृष्टिकारणकारणम्[७] ॥ १०४ ॥
इति ध्यात्वा विधिं[८] सूर्यमण्डलाधिपतिं यजेत् ।
तत्केसराग्रवृत्तेऽथ चन्द्रकोटिसमप्रभम् ॥ १०५ ॥
सोममण्डलमभ्यर्च्य सुधावारिप्रवाहवत्[९] ।

---

[१] त्रिलोचना] O; त्रलोचना N

[२] एवमों] N; ए...मों O

[३] ०कर्णिकम्] em.; ०कर्णृकम् N, O

[४] तत्पतिं] conj.; ०न्तद्विहिं N, ०न्तत्... O

[५] यथा] N; ...था O

[६] स्रुक्दण्डनमो०] em.; सृक्दण्डनदी० N, स्रुक्दण्डनदी० O

[७] ०कारणकारणम्] N; ०कार...का...णम् O

[८] ध्यात्वा विधिं] N; ध्य...त्व...धि O

[९] सुधावारि०] em.; सुधा...द्वव० N, सुधावाद्धि० O

तत्पतिं चापि विष्णुं च नीलजीमूतसन्निभम्[1] ॥ १०६ ॥
भस्मोद्धूलितसर्वाङ्गं सर्वाभरणभूषितम् ।
एकवक्त्रं[2] द्विनेत्रञ्च कर्णवेष्टनशोभितम् ॥ १०७ ॥
शङ्खचक्रनमोमुद्रासमन्वितचतुर्भुजम्[3] ।
किरीटमकुटोपेतं[4] विद्यातत्त्वस्वरूपिणम्[5] ॥ १०८ ॥
पीताम्बरधरं ध्यायेत्स्थितिकारणकारणम् ।
एवं यजेन्महाविष्णुं सोममण्डलनायकम् ॥ १०९ ॥
तत्पश्चात्कर्णिकाग्रे[6] तद्वृत्तेऽनन्ताग्निसन्निभम्[7] ।
अग्निमण्डलमभ्यर्च्य[8] तेजोराशिनिधिस्थलम् ॥ ११० ॥
ततस्तदधिपं रुद्रं त्र्यक्षं माणिक्यसन्निभम् ।
एकाननं[9] नमोमुद्रावराभयकरान्वितम् ॥ १११ ॥

---

[1] ०पि विष्णुञ्च नील०] em.; ०दिविष...ील N, ०दि विष्ण...ल० O
[2] एकवक्त्रं] O; एकवक्त्र N
[3] ०नमोमुद्रासमन्वितचतुर्भुजम्] O; ०न...ोमुद्रासम...तचतुर्भुज... N
[4] ०मकुटोपेतं] O; ०मकु...पतं N
[5] विद्या०] N; ...द्या० O
[6] ०पश्चात्०] O; ०पश्चात्० N
[7] ०सन्निभम्] O; ०भम् N
[8] ०मभ्यर्च्य] em.; ०मभ्यर्च्यं N, O
[9] एकाननं] Opc; एकानतं N, एकानं Oac

त्रिपुण्ड्रविलसत्फालं[1] जटाखण्डेन्दुमण्डितम् ।
ब्रह्मविष्णुस्तुतं रुद्रं लयकारणकारणम् ॥ ११२ ॥

[१३.३.१०. शक्तिमण्डलपूजनम्]

इत्थमभ्यर्च्य[2] तत्पश्चाच्छक्तिमण्डलमर्चयेत् ।
तत्पद्मकर्णिकामध्ये क्षीरोदसितविग्रहम् ॥ ११३ ॥
कुटिलाशिवगायत्र्यादीच्छाज्ञानक्रियात्मकम् ।
शक्तिमण्डलमभ्यर्च्यमथ तत्पतिमीश्वरम् ॥ ११४ ॥
चन्द्रार्धशेखरं[3] त्र्यक्षं शुद्धस्फटिकनिर्मलम् ।
एकास्यमष्टबाहुञ्च हस्तिसिंहाजिनाम्बरम्[4] ॥ ११५ ॥
शूलासीष्वक्षमालाभीकुण्डिपद्मवरान्वितम्[5] ।
इति सम्पूजयेच्छक्तिमण्डलेश्वरमीश्वरम् ॥ ११६ ॥

114ff. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 396, but quoted, with attribution to the *Ātmārthapūjāpaddhati*.

---

[1] ०विलसत्०] em.; ०वलसत्० N, O

[2] ०मभ्यर्च्य] N, Opc; ०मभ्यर्च्यंत् Oac

[3] चन्द्रार्ध०] em.; चन्द्राक्ष्य N, O

[4] ०सिंहा०] em.; ०सिंह्मा० N, ०सिंवा० O

[5] शूलासीष्वक्षमालाभीकुण्डि०] conj.; शूलासीस्वक्षमालाभिकूण्डि० N, O

[१३.३.११. आसनपञ्चकम्]

ततः शिवासनं पूज्यं[1] क्षित्यादिकुटिलान्तकम्[2]।
अथ पञ्चासनान्यत्र[3] प्रकल्प्यानि[4] शिवासने ॥ ११७ ॥
अनन्तसिंहयोगाब्जविमलञ्चेति[5] पञ्चकम्।
शिवस्यासनपद्मं[6] तन्मर्यादा च स्तुता[7] यथा ॥ ११८ ॥

सुप्रभेदे –

इह शक्त्यादि नालान्तमनन्तासनमीरितम्।
गुणान्तं धर्मज्ञानादि सिंहासनमुदीरितम्[8] ॥ ११९ ॥
योगासनञ्च तत्ख्यातं[9] परमेशस्य सुव्रत[10]।
पद्मग्रन्थिं[11] समारभ्य केसरान्तं कजासनम् ॥ १२० ॥

---

[1] पूज्यं] O; omits N
[2] °कुटिला°] N; °...टिला° O
[3] °नान्यत्र] O; °नात्यत्र N
[4] प्रकल्प्यानि] conj.; प्रकल्प्याग्नि N, O
[5] °योगाविमलञ्चेति°] N; °योगविमल...° O
[6] °पद्मं] conj.; °पद्मे N, O
[7] च स्तुता] em.; चतुता N, O
[8] °सिंहासन°] N; °सिंह्मसन° O
[9] ख्यातं] N; ख्या... O
[10] सुव्रत] em.; पर्वतः N, O
[11] पद्मग्रन्थिं] N; ...द्मग्रन्थिं O

शक्त्यन्तं[1] केसरादूर्ध्वे[2] कर्णिका विमलासनम् ।
इत्युक्तं सुप्रभेदे तु[3] कल्प्यमासनपञ्चकम् ॥ १२१ ॥
शक्त्यादिशक्तिपर्यन्ते सर्वमन्तर्गतं[4] किल ।

[१४ सदाशिवध्यानम्]

[१४.१. लिङ्गनाहे मूर्तिन्यासः]

अथ पुष्पाञ्जलिं[5] स्वस्य हृत्प्रदेशे निधाय च ॥ १२२ ॥
मूर्तिमन्त्रं समुच्चार्य नीत्वा बिन्द्वन्तमञ्जलिम्[6] ।
संपूर्णपरमज्योतीरूपां[7] दण्डाकृतिं सिताम् ॥ १२३ ॥
अस्फुटावयवां[8] लिङ्गनाहे[9] मूर्तिं समर्चयेत् ।
ज्योतिस्तम्भाकृतौ तस्यां दण्डभङ्ग्या[10] मनून्न्यसेत् ।

119-121b. Quoted from *Suprabheda, kriyāpāda*, 8:100-102b. The second half of verse 8:100 reads differently: गुणान्तं धर्मज्ञानादिसिंहाख्यमासनं विदुः ।

[1] शक्त्यन्तं] N, Opc; शक्त्यन्त Oac

[2] केसरादूर्ध्वे] Npc, O; केसनरादूर्ध्वे Nac

[3] सुप्रभेदे तु] em.; सुप्रभेदः N, सुप्रभेतः O

[4] शक्तिपर्यन्ते सर्वमन्तर्गतं] N; शक्तिपर्य...स...म...र्गतं O

[5] पुष्पाञ्जलिं] em.; पुष्पाञ्जलि N, O

[6] नीत्वा विन्द्वन्तमञ्जलिम्] O; नी... विध्वन्तमञ्जलिम् N

[7] °ज्योतीरूपां] em.; °ज्योतीरूपा N, °ज्योतिरूपां O

[8] अस्फुटा°] N; अस्पटा O

[9] लिङ्गनाहे] Npc, O; लिङ्गं नाहे Nac

[10] दण्डभङ्ग्या] Npc, O; तादण्डभङ्ग्या Nac

शिवमूर्तिमनूद्धारः कामिकादावुदीरितः ॥ १२४ ॥

कामिके –

मूर्तिमीश्वरतत्त्वान्तां लिङ्गनाहे तु विन्यसेत्।

हृत्सम्पुटश्च[1] सान्तोऽयं मूर्तिमन्त्र उदाहृतः[2] ॥ १२५ ॥

[१४.२. कलाभेदः]

सदेशदेहसिद्ध्यर्थमष्टत्रिंशत्कला[3] मताः[4]।

रुद्रेश्वरशरीरार्थमेकत्रिंशत्कला मताः ॥ १२६ ॥

अत्रोक्तप्रकारेण संमतिमाह सन्तानसंहितायाम्।

ईशानस्य कलाः[5] पञ्च पुरुषस्य चतुष्कलाः[6]।

अघोरस्य कलाश्चाष्टौ[7] वामदेवस्त्रयोदश ॥ १२७ ॥

---

125. Quoted from *Pūrva-Kāmika*, 4:325.

मूर्तिमीश्वरतत्त्वान्तां लिङ्गनाहे तु विन्यसेत्। हृत्सम्पुटमजातं वै मूर्तिमन्त्रमुदाहृतम्॥

127-128b. Untraced in the *Santānasamhitā*. But although attributed to the *Santānasaṃhitā*, it is in fact on p. 211 of T. 7 and so, like 129-133, belongs probably to the *Acintyaviśva*. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 289 and cf. *Pūrva-Kāraṇa*, 27:3-4b.

---

[1] हृत्सम्पुटश्च] N; हृत्...म्पुट... O

[2] मूर्तिमन्त्र उदाहृतः] O; ...र्त्ति...न्त्र उदाहृतः N

[3] सदेशदेहसिद्ध्यर्थम०] conj.; सदेहदेशसिद्ध्यर्थम् अ० N, O

[4] मताः] conj.; मता N, ...ता O

[5] ईशानस्य कलाः] O; ईशा...स्य...लः N

[6] चतुष्कलाः] em.; च...ष्कला N, चतुष्कला O

[7] कलाश्चाष्टौ] em.; कला चाष्टौ N, ...ला चाष्टौ O

अष्टौ सद्यकला[१] ज्ञेया मकुटादिक्रमान्न्यसेत्[२] ।
क्वचित्कलाशक्तीनां तु नामभेदोऽस्ति सर्वथा[३] ॥ १२८ ॥
शशिनी[४] चाङ्गदा चेष्टा मरीची ज्वालिनी तथा ।
एताः पञ्चकलाशक्तीः[५] पञ्चमूर्धोपरि न्यसेत् ॥ १२९ ॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
एवं चतुष्कलाशक्तिरीरिता[६] चोर्ध्ववक्त्रके ॥ १३० ॥
तमो मोहा[७] जया निद्रा धृतिः क्षान्तिः स्मृतिः क्षया[८] ।
अघोरे चाष्टशक्तीश्च वामदेवस्तथोच्यते[९] ॥ १३१ ॥

129-133. Quoted from *Acintyaviśva*, T. 7, pp. 212–213, since the final vocative *nandikeśvara* proves that it is the *Acintya* that is quoted here. Cf. *Pūrva-Kāraṇa*, 27:9c-13: शशीनी चाङ्गदा चेष्टा मरीची ज्वालिनी तथा ॥
पञ्चैताः शक्तयः प्रोक्ताः कलानां पञ्चमस्य तु । निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ॥
चतस्रश्शक्तयः प्रोक्ताः कलानां पुरुषस्य तु । तमो मेधा क्षया निष्ठा धृतिक्षान्ति स्मृतिः क्षितिः ॥

---

[१] सद्यः कला] em.; सद्यः कला N, O
[२] ०न्न्यसेत्] em.; ०न्यसेत् N, O
[३] तु नामभेदोऽस्ति सर्वथा] em.; नामभेदोऽस्ति N, O
[४] शशिनी] em.; शशीनि N, O
[५] ०शक्तीः] em.; ०शक्तिः N, O
[६] ०शक्तिरीरिता] em.; ०शक्तिमतीता N, ०शक्तिरत... O
[७] मोहा] em.; मोघा N, O
[८] धृतिः क्षान्तिः स्मृतिः] em.; धृति क्षान्ति स्मृति N, O
[९] ०स्तथोच्यते] N; ०स्तथे ... O

रजा रतिः पाली रक्षा[१] कला स्यात्संयमी क्रिया[२]।
तृष्णा मोहा क्षया चिन्ता मोहिनी भ्रामिणी तथा॥ १३२॥
वामदेवकलाशक्तिस्त्रयोदश समीरिताः।
सिद्धिर्द्युतिश्च लक्ष्मी वा मेधा कान्तिः स्वधा प्रजा।
सद्यश्चाष्टकलाशक्तिरीरिता नन्दिकेश्वर॥ इति[३]॥ १३३॥

अघोरस्य कलानां तु चाष्टौ वै शक्तयः स्मृताः। रजो रक्षा रतिः पाल्या वामा संयमनी क्रिया॥
तृष्णा मोहा क्षुधा पीता ग्रामणी भ्रामिणी तथा। वामदेवकलानां तु शक्तयस्तु त्रयोदश॥ १३॥
Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 290ff and cf. *Śivaliṅgapratiṣṭhāvidhi*, p. 218.

131ab. Cf. *Śivaliṅgapratiṣṭhāvidhi*, pp. 218-219. ओं हुं अघोरेभ्यः - तमायै नमः हृदये। ओं हुं अथ घोरेभ्यः - मोहायै नमः कण्ठे। ओं हुं घोरघोरेभ्यः - जयायै नमः दक्षांसे। ओं हुं तरेभ्यः - निद्रायै नमः वामांसे। ओं हुं सर्वेभ्यः सर्व - धृत्यै नमः नाभौ। ओं हुं शर्वेभ्यः - क्षान्त्यै नमः जठरे। ओं हुं नमस्ते अस्तु रुद्रेभ्यः - स्मृत्यै नमः पृष्ठे। ओं हुं रूपेभ्यः - क्षयौ नमः वक्षसि।

132ab. Cf. *Śivaliṅgapratiṣṭhāvidhi*, p. 219. ओं हिं वामदेवाय नमो - रजायै नमः गुह्ये। ओं हिं ज्येष्ठाय नमो - रत्यै नमः वृषणद्वये। ओं हिं श्रेष्ठाय नमः - पाल्यै नमः दक्षिणोरौ। ओं हिं रुद्राय नमो - रक्षायै नमः वामोरौ। ओं हिं कालाय नमः - कलायै नमः दक्षिणजानुनि। ओं हिं कलविकरणाय नमः - संयमिन्यै नमः वामजानुनि।

132cd. Cf. *Śivaliṅgapratiṣṭhāvidhi*, pp. 219-220. ओं हिं बलक्रियायै नमः दक्षिणजंघायाम्। ओं हिं विकरणाय नमः - तृष्णायै नमः वामजंघायाम्। ओं हिं बलायै नमो - मोहायै नमः दक्षिणस्फिचि। ओं

---

[१] पाली रक्षा] conj.; पाल्य रक्षो N, O

[२] क्रिया] N; किया O

[३] वामदेवकलाशक्तिस्त्रयोदश समीरिताः। सिद्धिर्द्युतिश्च लक्ष्मी वा मेधा कान्तिः स्वधा प्रजा। सद्यश्चाष्टकला-शक्तिरीरिता नन्दिकेश्वर॥ इति] conj.; वामदेवकलाशक्तिरीरिता नन्दिकेश्वरेति N, वामदेवकलाशक्ति...रिता ...न्दिकेश्वरेति O

[१४.३. शिवतनुकरणे अष्टात्रिंशत्स्थानानि]

मूर्धानः पञ्चवक्त्राण्यथ हृदयगलौ ध्वंसनाभीश्च कुक्षिः[1]

पृष्ठोरो[2] गुह्यशिश्नोर्युगलमथ परे जानुयुग्मञ्च जङ्घे ।

द्विप्सित्कट्या[3] च पार्श्वे द्विदशकरतले[4] घ्राणमौलिं[5] च बाह्वो

स्थानानि स्युः कलानां[6] शिवतनुकरणे त्रिंशता साष्टकानाम् ॥ १३४ ॥

हिं बलप्रमथनाय नमः – क्षयायै नमः वामस्फिचि । ओं हिं सर्वभूतदमनाय नमः – चिन्ताय नमः नितम्बे । ओं हिं मनमोहिन्ये नमः – मोहिन्यै नमः दक्षिणपार्श्वे । ओं हिं उन्मनाय नमो – भ्रामिण्यै नमः वामपार्श्वे ।

133. वामदेवकलाशक्ति.......रीरिता नन्दिकेश्वरेति । Note that *pāda*s bcde are not transmitted in our manuscripts. We have assumed that they have been omitted by accident (eyeskip) and have supplied them from the *Acintyaviśvasādākhya* (T. 7, p. 213).

134. *Siddhāntasārāvali, kriyāpāda*, 44.

मूर्धानः पञ्चवक्त्राण्यथ हृदयगलौ ध्वंसनाभीश्च कुक्षिः

पृष्ठोरो गुह्यशिश्नोरुकयुगमपरं जानुयुग्मञ्च जङ्घे ।

द्विस्फिक्कट्यौ च पार्श्वे चरणकरयुगं घ्राणमौली च बाहू

स्थानानि स्युः कलानां शिवतनुकरणे त्रिंशतां साष्टकानाम् ॥

---

[1] मूर्धानः पञ्चवक्त्राण्यथ हृदयगलौ ध्वंसनाभीश्च कुक्षिः] em.; मूर्धानं पञ्चवक्त्राद्यवयहृदयध्वंसनाभी च कुक्षि O, मूर्धानं पञ्चवक्त्राद्यावयध्वं सनाभी च कुक्षि N

[2] पृष्ठोरो] Opc; पृष्ठोरा Oac, पृष्ठोरु N

[3] द्विप्सित्कट्या] N; द्विं ... त्कट्य O

[4] ॰तले] em.; ॰दले N, O

[5] घ्राणमौलिं] em.; घ्राणमौली N, ...णमौलि O

[6] कलानां] em.; omits N, O

[१४.४. एकत्रिंशत्कलान्यासविशेषः]

एकत्रिंशत्कलान्यासे[1] विशेषः कश्चिदिष्यते।
एकमेव शिरोवक्त्रं महेशो[2] रुद्रविग्रहे ॥ १३५ ॥
तत्रेशानेन[3] वक्त्रेण मनसा[4] सकलेन च।
मलात्मना विशिष्टं तु पूर्ववत्परिकल्पयेत्।
अष्टत्रिंशत्कलामध्ये[5] देवीनामेकविंशतिः ॥ १३६ ॥

[१४.५. एकविंशतिकलान्यासः]

तथा तत्रैव –

मूर्ध्न्यास्ये हृदये गले भुजयुगे कुक्षौ[6] च नाभौ तथा
योनौ गुह्य[7] उभोरुजानुयुगले जङ्घाद्वये पृष्ठके।
पार्श्वाङ्घ्रिष्वतिहस्तयोश्च कुचयोरेतावतालं तथा
गौरीविग्रहपञ्चविंशतिकलाः[8] स्थानेषु मन्त्रैर्न्यसेत् ॥ १३७ ॥

---

137. The source of this verse has not been traced.

---

[1] एकत्रिंशत्कला॰] Opc; एकत्रं शत्कला॰ N, एककत्रिंशत्कला॰ Oac

[2] महेशो] N; महे... O

[3] तत्रेशानेन] O; त...शानेन N

[4] मनसा] em.; मनना N, O

[5] ॰कला॰] Npc, O; ॰कल॰ Nac

[6] हृदये गले भुजयुगे कुक्षौ] N; हृदय ग...कुक्षौ O

[7] गुह्य] N, गुह्यञ्च O (unmetrical)

[8] ॰पञ्चविंशति॰] N; ॰पञ्च...ति॰ O

इत्युक्तं कामिके तन्त्रे प्रसङ्गादेवमीरितम् ।

इति मूर्त्यर्चनं दण्डमुण्डभङ्गिकलार्पणम्[१] ।

[१४.६. विद्यादेहार्चनम्]

तत्पश्चादुच्यते शम्भोर्विद्यादेहे[२] समर्चनम् ॥ १३८ ॥

कामिके -

षष्ठौकारसमोपेतं[३] बिन्दुनादसमन्वितम् ।

सान्तं[४] हृत्सम्पुटितं कृत्वा विद्यादेहं प्रकल्पयेत्[५] ॥ १३९ ॥

सन्ताने -

शाक्तेनानेन सकलो[६] विज्ञेयो[७] निष्कलः शिवः[८] ।

क्षित्यादिकुटिलाप्रान्तमन्त्रसिंहासनस्थितम्[९] ॥ १४० ॥

139. Quoted from *Uttara-Kāmika*, 3:26.
140. Untraced in the *Santāna*.

[१] दण्डमुण्डभङ्गिकलार्पणम्] em.; दण्डभङ्गिकालार्पणम् N, दण्डमुण्डभङ्गिकालार्पणम् O

[२] ॰विद्यादेहे] em.; ॰विद्यादेह N, ॰विद्यदेह O

[३] ॰कारसमोपेतं] Npc; ॰कारस कलास्थानेषु मन्त्रैः न्यसेत् । इत्युक्तं कामिके तन्त्रे मोपेतं Nac, ॰क...रसमोपेतं O

[४] सान्तं] O; सा...तं N

[५] प्रकल्पयेत्] Npc, O; किञ्च प्रकल्पयेत् Nac

[६] सकलो] O; सकले N

[७] विज्ञयो] O; विज्ञेये N

[८] निष्कलः शिवः] O; ...क...शि... N

[९] ॰कूटिलाप्रान्तमन्त्र॰] em.; ॰कूटिलाप्रान्तम...॰ N, क्षित्यादिकूटिला... मन्त्र॰ O

शुद्धस्फटिकसङ्काशं द्वात्रिंशल्लक्षणान्वितम्।
पद्मासनस्थं पञ्चास्यं[1] प्रतिवक्त्रं त्रिलोचनम्[2] ॥ १४१ ॥
दृक्क्रियेच्छाविशालाक्षं[3] ज्ञानचन्द्रकलान्वितम्[4]।
धवलेशानवदनं पीततत्पुरुषाननम्[5] ॥ १४२ ॥
कृष्णाघोरमुखोपेतं[6] रक्ताभोत्तरवक्त्रकम्[7]।
सुश्वेतपश्चिमास्यैकसद्योजातसमूर्तिकम्[8] ॥ १४३ ॥
व्याघ्रचर्माम्बरधरं व्यालेन्द्रकटिसूत्रकम्[9]।
नागोपवीतिनं शान्तं जटाखण्डेन्दुमण्डितम् ॥ १४४ ॥
शूलं[10] वज्रञ्च खड्गं परशुमभयदं सव्यभागे वहन्तम्।
नागं पाशञ्च घण्टामनलकरयुतं[11] साङ्कुशं वामभागे ॥ १४५ ॥

---

[1] पद्मासनस्थं पञ्चास्यं] O; प...सनस्थं पञ्चास्या N

[2] त्रिलोचनम्] O; त्रलोचनम् N

[3] ०विशालाक्षं] Npc, O; ०विशालज्ञाक्षं Nac

[4] ज्ञानाचन्द्र०] O; ज्ञान...० N

[5] पीततत्पुरुषाननम्] N; पीत...रुषाननम् O

[6] ०मुखोपेतम्] Npc, O; ०मुकखापेतं Nac

[7] रक्ताभोत्तर०] O; रक्ताम्भोक्त्र० N

[8] समूर्तिकम्] em.; ...मूर्त्तिकम् N, समूर्त्ति... O

[9] ०म्बरधरं व्यालेन्द्र०] O; ०...रधरं व्या...न्द्र० N

[10] शूलं] N; शू... O

[11] घण्टामनल०] Npc; घण्टामलनल० Nac, खण्डामनल० O

कामिके -

या तस्य विमला शक्तिः[1] शिवस्य समवायिनी ।

सैव मूर्तिः क्रियाभेदात्सदाशिवतनुर्मता[2] ॥ १४६ ॥

इत्यादिवचनात्पुष्पैरापूर्य स्वकमञ्जलिम्[3] ।

हृत्प्रदेशे निधायैनं ध्यायेद्विद्यावपुर्यथा ॥ १४७ ॥

विद्यादेहवहं सदाशिवमिह ध्यायेत्सपद्मासनं

शुभ्रं पञ्चमुखाम्बुजं प्रतिमुखं त्र्यक्षं[4] दशोद्यद्भुजम्[5] ।

दक्षे शूलपरश्वथासिकुलिशाभीत्यन्वितं[6] वामतो

वह्निं पाशमिति क्रमेण दधतं घण्टाभुजङ्गाङ्कुशम् ॥ १४८ ॥

---

145. In *Saundara's* text as transmitted to us, only 2 *pādas* are given; perhaps the other 2 dropped out in transmission. Cf. *Śrīśivastuticayana*, p. 9, *Jñānasiddhi*, T. 178, p. 13 and *Ṣaṭsahasrakālottara*, T. 767, p. 92.
146. Quoted from *Uttara-Kāmika*, 3:15.
148. Quoted from *Śaivabhūṣaṇa*, v. 81.

---

[1] शक्तिः] em.; शक्ति N, O

[2] क्रियाभेदात्सदाशिव०] N; मक्रिय..भेदात्सद..श... O

[3] ०रापूर्य स्वकमञ्जलिम्] N; ०रापूर्य...कमृ...लिम् O

[4] शुभ्रं पञ्चमुखाम्बुजं प्रतिमुखं त्र्यक्षं] N; शु...वञ्चमु...जं...मुखं त्र्यक्षं O

[5] दशोद्यद्भुजम्] em.; दशोद्युद्भुजम् N, दाशे...जम् O

[6] ०कुलिशाभीत्यन्वितं] O; ०कूणलिशाभी...न्वितं N

ऊर्ध्वादि सितहेमालिशोणशुभ्रास्यपञ्चकम्[1]।
दधानं परमेशानं मूर्धानं पुरुषाननम्॥ १४९॥
अघोरहृदयं वामगुह्यं सद्यपदद्वयम्।
इति ध्यात्वा सदाशम्भुं व्यक्तावयवमद्भुतम्॥ १५०॥
पूर्वोक्तवर्त्मना[2] विद्यादेहमन्त्रं सदोमिति[3]।
नादान्तमुच्चरन्नीत्वा[4] ब्रह्मरन्ध्रान्तमञ्जलिम्॥ १५१॥
दिव्यविद्युत्प्रभाजालमाविर्भूतमिवाञ्जलौ[5]।
सञ्चिन्त्य[6] मूर्तेरुपरि न्यसेत्पुष्पाञ्जलिं क्रमात्[7]॥ १५२॥
तदा[8] सर्वज्ञताबीजदृक्त्रयं[9] प्रतिवक्त्रकम्।
विद्यादेहे न्यसेदेषा नयनोन्मीलनक्रिया[10]॥ १५३॥

---

150. Instead of सदाशिव the author has written सदाशम्भुं to maintain the metre.

---

[1] ०शुभ्रास्य०] N; ०शु... O

[2] पूर्वोक्तवर्त्मना] N; पू ... क्तवत्म ... O

[3] सदोमिति] O; सदामिति N

[4] नादान्तमुच्चरन्नीत्वा] N; नदान्त...चर...त्वा O

[5] ०ञ्जलौ] N; ०ञ्ज... O

[6] सञ्चिन्त्य] N; सहित्य O

[7] क्रमात्] N; ...मात् O

[8] तदा] O; ...दा N

[9] ०त्रयं] em; कयं N, O

[10] ०क्रिया] N; किया O

[१४.७. आवाहनम्]

पश्चादावाहनं कुर्याच्छम्भोरमितवर्चसः[१] ।

अप्यूर्ध्वकायस्सन् कृत्वा यथा पुष्पाञ्जलिं पुरा[२] ॥ १५४ ॥

तं[३] षोडशकलोपेतं[४] मूलमन्त्रं समुच्चरन् ।

द्वादशान्तस्थितं[५] शम्भुमनेकार्बुदचन्द्रभम्[६] ॥ १५५ ॥

एवं शाक्तं वपुः कल्प्यं तस्मिन् परमकारणम् ।

परमं शाश्वतं सत्यं ज्ञानानन्दसुखात्मकम्[७] ॥ १५६ ॥

व्यापकं सर्वतत्त्वानामप्रमेयमतुल्यकम्[८] ।

वाच्यवाचकरहितं वाङ्मनोऽतीतगोचरम्[९] ॥ १५७ ॥

व्यक्तं[१०] कुर्याद्विशेषेण निष्कलं सकलात्मनि[११] ।

---

[१] कुर्याच्छम्भोरमितवर्चसः] N, Opc; कुर्या ... म्भोरमितवर्चसम् Oac

[२] यथा पुष्पाञ्जलिं पुरा] Npc; युथा पुष्पाञ्जलिं पुरा Nac, यथा पुष्पा... O

[३] तं] em.; ना N, ता O

[४] षोडशकलोपेतं] N; षोडशक... O

[५] द्वादशान्तस्थितं] Npc; द्वादशान्तः स्थितं Nac, द्वादशान्तस्थित... O

[६] शम्भुमनेकार्बुदचन्द्रभम्] N.; ...अनेकार्बुदचन्द्रा...म् O

[७] शाश्वतं सत्यं ज्ञानानन्दसुखात्मकम्] N; शाश्वतं...खा... O

[८] ०तत्वानामप्रमेयमतुल्यकम्] em.; ०तत्वामप्रमे...ल्यकम् N, ०तत्वा...ामप्रमेयमतुल्यकम् O

[९] वाङ्मनोतीतगोचरम्] em.; वाद्यमनोदितगोचरम् N, O

[१०] व्यक्तं] N; ...क्तं O

[११] सकलात्मनि] N; स...लात्मनि O

परावाहनमित्युक्तं[1] शिवशक्तिनिमन्त्रणात्[2] ॥ १५८ ॥

तथान्यत्र –

नवार्कतेजसाह्वानं[3] विधायाह्वानमुद्रया[4] ।

एवं पराख्यवचनाद्देवदेवोत्तमोत्तमम्[5] ॥ १५९ ॥

महाशम्भुमिति[6] ध्यात्वा नीत्वादित्यान्तमञ्जलिम्[7] ।

पूरकेणाथ[8] भूयोऽपि[9] भ्रूमध्यान्तेऽवरोप्य तम्[10] ॥ १६० ॥

156-158. These verses are elsewhere attributed to the *Parākhya*: see appendix I, L.132–134, on p. 437.

156-159b. The first three verses are quoted in the *Ātmārthapūjāpaddhati* (T. 371, p. 879) with attribution to the *Parākhya* (see verses 132–134 on p. 437 of Appendix I of the *Parākhya*). The half-verse immediately following, 3.159ab, is quoted immediately afterwards in the same text, but with an intervening *tathā* (suggesting a further quotation, perhaps from another source).

---

[1] ०मित्युक्तं] O; ...त्युक्तं N

[2] शिवशक्तिनिमन्त्रणात्] N; ... ... णा... O

[3] नवार्कतेजसाह्वानं] em.; नवाकतेज...नं N, नवार्क...ाह्वानं O

[4] विधायाह्वान०] em.; विधाया...न० N, O

[5] ०देवदेवो०] O; ०देदेवो० N

[6] महाशम्भु०] N; महाश...० O

[7] ०दित्यान्तमञ्जलिम्] em.; ०दित्याक्तमञ्जलिम् N, ०दित्यान्त...ञ्ज... O

[8] पूरकेणाथ] em.; पू...णाथ N, पिूरके...थ O

[9] भूयोऽपि] em.; भुयो N, ...यो O

[10] ०न्तेऽवरोप्य तम्] em.; ०न्तवराप्य तम् N, ०...रोप्य तम् O

तत्तेजोबिन्दुमेतस्मिन्नञ्जलौ[1] पतितं[2] स्मरन् ।
ऊर्ध्वमीषत्पुनर्नीत्वा[3] पश्चान्नाड्या[4] सुषुम्नया ॥ १६१ ॥
क्रमेणाथ समानीय स्वगुरूक्तोपदेशतः[5] ।

[१४.८. आवाहनार्घ्यम्]

मूलेन सहृदावाह्य[6] देयमावाहनार्घ्यकम् ॥ १६२ ॥
आवाहनेन तन्मूर्तिर्द्रवति[7] द्रवहेमवत्[8] ।
तस्मादावाहने काले दद्यादर्घ्यं विचक्षणः ॥ १६३ ॥
इत्युक्तयांशुमतो[9] देयमर्घ्यमावाहनोत्तरम्[10] ।
अथ तद्देहहृत्पद्मे तच्चैतन्यं शिवात्मकम् ॥ १६४ ॥
संस्थाप्य हृदयेनैव मुद्रया स्थापनाख्यया ।

---

163. Not traced in the *Aṃśumat*, but cf. *Ātmārthapūjāpaddhati*, T. 55, p. 412 and T. 321, p. 220, where it is quoted with the same attribution.

---

[1] तत्तेजोविन्दुमेतस्मिन्नञ्जलौ] N; तत्तेजे...न्दुमेतस्मिन्नाञ्जलौ O

[2] पतितं] Npc, O; पतिता Nac

[3] °र्नीत्वा] em.; °र्मित्वा N, O

[4] पश्चान्नाड्या] em.; पश्चान्नास्या N, पश्चान्तास्या O

[5] स्वगुरूक्तो°] O; स्वरूक्तो° N

[6] मूलेन सहृदावाह्य] N; मूलन...हृदारा... O

[7] तन्मूर्तिर्द्रवति] em.; तन्मूर्तिद्रवति N, तन्मूर्तिर्द्दवति O

[8] द्रवहेमवत्] N; द्दवहेमवत् O

[9] इत्युक्तयांशुमतो] em.; इत्युक्तवांशुमतो N, इत्युक्तयांशुमते O

[10] देयम°] Npc, O; देयम° Nac

किञ्चात्र सम्प्रदाये[१] हि प्राणमन्त्रं सकृज्जपेत्[२] ॥ १६५ ॥
दक्षिणानामया लिङ्गपीठं स्पृष्ट्वा तमुच्चरेत् ।
अथ सर्वाङ्गसम्पूर्णं[३] चैतन्यमिति[४] भावयेत्[५] ॥ १६६ ॥
सन्निधानं तु मूलेन तदेवाभिमुखीकृतिः[६] ।
तत्काले[७] सन्निधानार्घ्यं[८] दत्वाथो सन्निरोधनम् ।
कार्यं[९] हि तत्तन्मुद्रान्ते पराख्यवचनं यथा ॥ १६७ ॥

[१४.९. मुद्राभीरोधनादि]

पराख्ये[१०] –

पूजनावधि[११] तत्रेशं[१२] रोधयेन्निष्ठुराख्यया ।

---

[१] सम्प्रदाये] conj.; सम्प्रदायं N, O

[२] सकृज्जपेत्] N; सकृज्ज...त् O

[३] सर्वाङ्ग°] O; सर्वाम्भ° N

[४] चैतन्यमिति] N; ...मिति O

[५] भावयेत्] O; ...वेयेत् N

[६] तदेवा°] O; देवता N

[७] तत्काले] N; त... O

[८] सन्निधानार्घ्यं] O; सन्निधानघ्यं N

[९] कार्यं] O; कार्य N

[१०] पराख्ये] em.; पराख्यो N, O

[११] पूजनावधि] em.; पूजनाविधि N, O

[१२] तत्रेशं] Npc, O; तृतत्रशं Nac

निरोधार्घ्यं तथा[1] दद्यात्सन्निधानाय शम्भवे ॥ १६८ ॥

कालकण्ठ्या फडन्तेन हेतिना पुष्पमुत्क्षिपेत् ।

अन्तरायं[2] समुत्सार्य लिङ्गमुद्रां तु वामतः ॥ १६९ ॥

नमस्कारं हृदा दत्वा कवचेनावकुण्ठ्य च ।

अथेति तत्तन्मुद्राभिः[3] षडङ्गन्यासमाचरेत् ॥ १७० ॥

कामिके –

अस्तित्वमधिकत्वं च[4] स्वातन्त्र्यं सर्वगोप्तृता[5] ।

सर्वज्ञत्वमधृष्यत्वं[6] षडङ्गानां गुणाः[7] क्रमात् ॥ १७१ ॥

[१४.१०. षडङ्गन्यासः]

इत्युक्तवचनादेतद्गुणषट्कसमन्वितान्[8] ।

168-170b. Untraced in the *Parākhya*. Cf. *Jñānaratnāvalī*, GOML MS. R 14898, p. 97, also cf. *Ātmārthapūjāpaddhati*, T. 55, p. 404 and T. 321, pp. 215-216.
171. Untraced in the *Kāmika*. Cf. *Dhyānaratnāvali*, v. 150 and *Śaivabhūṣaṇa*, v. 94.

---

[1] निरोधार्घ्यं तथा] N; तिरोधार्घ्यं न्तथा O

[2] अन्तरायं] N; अन्नरायं O

[3] तत्तन्मुद्राभिः] em.; तत्तमुद्राभि N, त्तन्मुद्राभि O

[4] °मधिकत्वं च] em.; °मधिक...च N, °मधिकं त्वं च O

[5] °गोप्तृता] N; °गोप्तृत... O

[6] °मधृष्यत्वं] em.; °मधृष्यन्त्वं N, °मधृष्यत्तं O

[7] गुणाः] em.; गुणा N, O

[8] °समन्वितान्] N; सम... न् O

नमःस्वाहावषड्वौषड्ढुंफड्कारैः[1] क्रमाद्युतान् ॥ १७२ ॥

षडङ्गमन्त्रान्[2] तत्रादौ हृदयं[3] हृदये न्यसेत् ।

शिरः शिरसि विन्यस्य[4] शिखास्थाने शिखां[5] न्यसेत् ॥ १७३ ॥

कण्ठप्रावरणाद्वर्म तर्जनीभ्यां तु[6] विन्यसेत् ।

एकत्वं मुष्टिबन्धेन[7] मूलेन हृदि विन्यसेत् ॥ १७४ ॥

परस्परतलस्पर्शौ[8] नामभ्यां हेतितस्ततः ।

तालत्रयं च दिग्बन्धं कवचेनावकुण्ठनम्[9] ॥ १७५ ॥

[१४.११. अमृतीकरणं परमीकराणं च]

पराख्ये –

अमृतीकरणं कुर्यान्मन्त्राणां धेनुमुद्रया ।

---

176. Untraced in the *Parākhya* but quoted without attribution in the cf. *Ātmārthapūjāpaddhati*, T. 55, p. 404 & T. 321, p. 216.

---

[1] नमःस्वाहावषड्वौषड्ढुंफड्कारैः] em.; नमस्वाहावषड्वौषट्हुंफड्कारैः N; नमःस्वाहाववष...षट्हुंफड्कारैः O

[2] षडङ्गमन्त्रान्] em.; षडङ्गमन्त्र N, O

[3] हृदयं] O; हृदय N

[4] शिरः शिरसि विन्यस्य] O; शिर...सि वि...स्य N

[5] शिखां] em.; शिखा N, O

[6] कण्ठप्रावरणाद्वर्म तर्जनीभ्यां तु] O; कर्णप्रावरणाद्वर्म तर्जनीभ्या... N

[7] एकत्वं मुष्टिबन्धेन] N; ...कत्वम मुष्टिब...न O

[8] परस्परतलस्पर्शौ] em.; परस्परत...र्शा N, परस्फरतलस्फर्शौ O

[9] कवचेनावकुण्ठनम्] N; कवचेन...नम् O

हृदा तेन महामुद्रामथवा मूलमन्त्रतः ॥ १७६ ॥

देये धेनुमहामुद्रे वौषडन्तेन मूलतः ।

शिवैक्यवर्ण्यतां[1] ध्यायेदङ्गानामङ्गिभावतः[2] ॥ १७७ ॥

पुष्पमारोपयेन्मूलात्[3] परमीकरणं[4] हि तत् ।

[१५. सदाशिवपूजनम्]

[१५.१. देवस्य स्वागतम्]

स्वागतं ते महादेवेत्युक्त्वा[5] सम्प्रार्थयेद्विभुम्[6] ॥ १७८ ॥

एवं पराख्यवचनाद्भूमहामुद्रिकार्प्पणम्[7] ।

अथ हे भगवन् स्वामिन् स्वागतं ते वदेदिति ॥ १७९ ॥

[१५.२. सन्निधीकरणम्]

वत्स स्वागतमत्रेति[8] स्वामिनोक्तं विभावयेत् ।

177cd. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 404 and T. 321, p. 216.
179. *bhū* is perhaps a corruption for *hṛn*, since the *mahāmudrā* may be offered with *hṛdā* eg. in *Jñānaratnāvalī*.

---

[1] शिवैक्यवर्णतां] em.; शिवैकवर्ण्ठकां N, शिवैकव... O

[2] ध्यायेदङ्गानाम॰] N; ...येदङ्गान...॰ O

[3] पुष्पमारोपयेन्मूलात्] Opc.; पुष्पमारोपयेन्मूलोत् N, पुष्पम...प...मूलात् Oac

[4] परमीकरणं] em.; पर...णं N, प...मी...रणं O

[5] महादेवेत्युक्त्वा] em.; महादेवे... N, महादे...त्युक्त्व... O

[6] सम्प्रार्थ्ययेद्विभुम्] em.; सम्प्रार्थ्यते द्विभुम् N, सं...र्थ्यये द्विभम् O

[7] ॰वचनाद्भूमहामुद्रिकार्प्पणम्] em.; ...चनाद्भुमहामुद्रिकाप्पणम् N, ॰वचनाद्भुम... ...णम् O

[8] स्वागतमत्रेति] em.; स्वागतमन्त्रेति N, O

स्वामिन् सर्वजगन्नाथ[1] यावत्पूजावसानकम् ॥ १८० ॥

तावत्सम्प्रीतिभावेन लिङ्गेऽस्मिन्[2] सन्निधीभव ।

[१५.३. अर्घ्यपाद्यचमनदानम्]

इति[3] विज्ञाप्य देयं[4] हि स्वागतार्घ्यं शिवाय तु ॥ १८१ ॥

अस्मिन्नवसरे देया मुद्रा[5] पञ्चमुखी नमः ।

ओं शिवायेति दातव्या[6] मुद्राः[7] सर्वा हृदान्विताः[8] ॥ १८२ ॥

मकुटे च तथा प्रोक्तमत्र[9] पञ्चमुखीति[10] च ।

पश्चादंशुमदुत्त्यात्र[11] दद्यात्पाद्यादि शम्भवे ॥ १८३ ॥

182ab. For definition of *pañcamukhī*, see *Śaivasiddhāntasaṅgraha*, T. 44, p. 348.
183. For the inclusion of the *pañcamukhī* here, cf. *Śaivabhūṣaṇa*, v. 83.

---

[1] सर्वजगन्नाथ] O; सर्व...न्नाथ N

[2] ०सम्प्रीतिभावेन लिङ्गेऽस्मिन्] N; सम्प्री... ...लिङ्गे... O

[3] इति] N; ...ति O

[4] देयं] O; ...यं N

[5] मुद्रा] N; म...। O

[6] दातव्या] em.; दातव्य N, O

[7] मुद्राः] em.; मुद्रा N, O

[8] हृदान्विताः] em.; हृदान्विता N, हृदा... O

[9] मकुटे च तथा प्रोक्तमत्र] em.; मकुटे च तथा प्रोक्तामत्र N, ...प्र...मत्र O

[10] पञ्चमुखीति] N; पञ्चमुखि... O

[11] पश्चादंशुमदुत्त्यात्र] O; पश्चादंशुष्ठदुत्त्यत्र N

अंशुमति -

समुत्क्षिप्य विशेषार्घ्यभाजनं[1] वामपाणिना ।
पद्भ्यां निवेदयेत्पाद्यं[2] दक्षहस्तेन सम्मुखम्[3] ॥ १८४ ॥
मुखेष्वाचमनं दद्यादर्घ्यं[4] पञ्चसु मूर्धसु[5] ।
दूर्वापुष्पाक्षतादीनि[6] पश्चाल्लोकोपचारतः ॥ १८५ ॥
नमस्कारस्स्वधास्वाहावषड्जातिचतुष्टयम् ।
चतुष्टयमिदं[7] तत्र परिपाट्या[8] निवेदयेत् ॥ १८६ ॥
इत्युक्त्या[9] पाद्यमाचाममर्घ्यं दत्वा प्रसूनतः[10] ।

184. Untraced in the *Aṃśumat*. Appears in the *Jñānaratnāvalī*, GOML MS. R 14898, p. 102.
185-186. These verses are quoted together without attribution in the *Ātmārthapūjāpaddhati*, T. 55, pp. 412–413.

[1] विशेषार्घ्य०] O; विशेषास्य N

[2] ०त्पाद्यं] em.; ०त्पाद्य N, ०त्पा... O

[3] दक्षहस्तेन सम्मुखम्] N; क्षह... मु... O

[4] दद्याद०] O; द्यद्याद० N

[5] मूर्धसु] em.; मुर्त्तसु N, O

[6] दूर्वापुष्पाक्षतादीनि] N; दूर्वापु...तादीनि O

[7] चतुष्टयमिदं] em.; चतुष्टयतदं N, च...ष्टयमिदं O

[8] परिपाट्या] O; परिपाठ्या N

[9] इत्युक्त्या] em.; इत्यु ... N, ...क्त्या O

[10] प्रसूनतः] N; प्र ... तः O

[१५.४. लिङ्गस्य शुद्धाभिषेकः]

पश्चाच्छुद्धाभिषेकः[१] स्यादंशुमत्प्रोक्तवर्त्मना[२] ॥ १८७ ॥

सङ्गृह्याभिनवं[३] पुष्पं शम्भुमूर्धनि विन्यसेत्[४] ।

तदन्यत्पौर्विकं[५] पुष्पमपसृज्य[६] च लिङ्गतः ॥ १८८ ॥

तत्पश्चाद्दक्षहस्तस्थगडुकस्रुतपाथसा[७] ।

सहृत्स्वाहान्तमूलेन स्नानं[८] शुद्धाभिषेचनम्[९] ॥ १८९ ॥

निर्माल्यभोजनं[१०] कुर्याद्विभाव्य मनसाखिलम्[११] ।

विशेषार्घ्यजलेनापि श्रीपादक्षालनं हि तत् ॥ १९० ॥

शिवमूर्ध्नि[१२] च पुष्पेण सिञ्चेदर्घ्योदबिन्दुना[१३] ।

---

[१] पश्चाच्छुद्धाभिषेकः] em.; पश्चाच्छुद्धाभिषेक N, ...श्चाच्छुद्ध...क O

[२] ०वर्त्मना] N.; ०वत्मना O

[३] सङ्गृह्याभिनवं] N; सगृहा...नव O

[४] विन्यसेत्] em.; विन्यसत् N, ...न्यसेत् O

[५] ०पौर्विकं] O; ०पौवविकं N

[६] पुष्पमपसृज्य] N; ...ष्पं पसृज्य O

[७] ०दक्षहस्तस्थगडुकस्रुतपाथसा] em.; ०दक्षहस्तस्थगडुकस्रुत...थसा N, ०...हस्तस्थगडुक...पाथसा O

[८] स्नानं] O; स्थानं N

[९] शुद्धाभिषेचनम्] N; शुद्ध...चनम् O

[१०] ०भोजनं] conj.; ०भोजने N, O

[११] मनसाखिलम्] N; मन...लम् O

[१२] शिवमूर्ध्नि] N; ...मूध्नि O

[१३] सिञ्चेदर्घ्योदबिन्दुना] O; हिञ्चेदस्योदबिन्दुना N

अथ वस्त्रेण सम्मृज्य लिङ्गं शुचिकरस्ततः[१] ॥ १९१ ॥

अमन्त्रपुष्पमारोप्य मन्त्रपुष्पं च[२] मूलतः ।

†यथा पानीयतत्पीठसेक्त चामकरं तता† ॥ १९२ ॥

अस्मिन्नवसरे देयं मन्त्रान्नं[३] शम्भवे हितम् ।

[१५.५. मन्त्रान्नदानम्]

मन्त्रं[४] रहस्यमित्युक्तं[५] तस्मात्तद्गोप्यमेव हि ॥ १९३ ॥

शम्भोः शुद्धाभिषेकान्ते[६] जाठराग्निर्ज्वलत्यपि[७] ।

तत्क्षुधाशान्तये[८] तज्ज्ञो दद्यान्मन्त्रान्नमादरात् ।

शम्भुना प्रत्युमां पूर्वं[९] प्रोक्तं[१०] तच्चात्र[११] लिख्यते ॥ १९४ ॥

---

[१] शुचिकरः] O; ...करः N

[२] मन्त्रपुष्पं च] N; ... पुपं ... O

[३] मन्त्रान्नं] em.; मन्त्रान्तं N, ... न्त्रान्तं O

[४] मन्त्रं] em.; ...न्त्रो N, मन्त्रो O

[५] रहस्य०] N; र... स्य० O

[६] शुद्धाभिषेकान्ते] em.; शुन्तुद्धाभि...कान्ते N, ...भिषे... O

[७] जाठराग्नि०] em.; जठराग्नि० N, जढराग्नि० O

[८] तत्क्षुधाशान्तये] em.; तृत्क्षुधाप्रशान्तये N, तत्क्षु...प्रशान्तये O

[९] पूर्वं] N; ... वं O

[१०] प्रोक्तं] O; प्रो ... N

[११] तच्चात्र] em.; ...त्र N, तच्चा... O

ईश्वरवचनम् –

ममाभिषेकान्त उमे क्षुदुत्था[1] जगत्त्रयं दग्धुमलं समर्था[2]।
तत्कालनैवेद्यमतः प्रदेयं[3] नोचेत्तदायुर्बलवीर्यभुक् स्यात्[4] ॥ १९५ ॥

इत्यादिवचनादन्नं[5] यत्किञ्चिद्भक्ष्यवस्तु[6] वा।
स्थिरासनाभिषेकान्तेऽवश्यमन्नं[7] निवेदयेत् ॥ १९६ ॥

[१५.५.१. त्रिविधं नैवेद्यम्]

स्नानकालेषु नैवेद्यं[8] त्रिविधं तत्किमुच्यते।
एकं पर्युषितार्चायां तत्र ताम्बूलमुत्तमम् ॥ १९७ ॥

एकमन्नाभिषेके वा चन्दनस्नानकालतः।
एकं स्थिरासनारूढस्नानकालावसानके[9] ॥ १९८ ॥

---

195. The source of this verse has not been traced.

---

[1] ममाभिषेकान्त उमे क्षुदुत्था] em.; ...माभिषेकान्तममेक्षुदुत्था N, ममाभिषेकान्त उ...दुलत्था O

[2] समर्था] conj.; समर्थः N, O

[3] प्रदेयं] em.; प्रदेय N, O

[4] ०भुक् स्यात्] O; ०भुक् ... N

[5] इत्यादि०] O; इत्या...० N

[6] यत्किञ्चिद्भक्ष्यवस्तु] O; ... किञ्चि ... भोक्ष्यवस्तु N, यत्किञ्चिद्भोक्ष्यवस्तु O

[7] स्थिरासना०] Npc, O; स्थिराभिसना० Nac

[8] नैवेद्यं] N; ने ...० O

[9] ०रूढस्नानकालावसानके] em.; ०रूढा स्नानकालावसानके N, ०रूढा स्नानकालावसा...के O

आहृत्य स्नानकालाङ्गं त्रेधा[१] नैवेद्यमीरितम् ।
तस्मात्साम्बाय मन्त्रान्नं शम्भवे विनिवेद्य[२] च ॥ १९९ ॥

[१५.६. वस्त्रादिनिवेदनम्]

आचामार्घ्यें प्रदायाथ दद्याद्दिव्याम्बरद्वयम् ।
वामेनाथोपवीतं तु सौवर्णं तान्तवं[३] हृदा ॥ २०० ॥
ततः परिमलद्रव्यकस्तूर्याद्यङ्गलेपनम्[४] ।
पश्चाद्धिमाम्बुकर्पूरमिश्रगन्धसमर्पणम्[५] ॥ २०१ ॥
दिव्याङ्गरागालङ्कारो[६] दिव्यपुष्पार्चनं ततः[७] ।
रत्नाभरणपट्टादिगोलकादिसमर्पणम्[८] ॥ २०२ ॥
भूयस्सुरभिपुष्पार्चा तस्मिन्नवसरे[९] तथा ।

---

[१] स्नानकालाङ्गं त्रेधा] em.; स्नानकालाङ्ग ज्ञेया N, स्नानकालान्तु गन्त्रेया O

[२] शम्भवे विनिवेद्य] O; शभे...विनिवे... N

[३] तान्तवं] em.; ता...वं N, त...तवं O

[४] °द्रव्यकस्तूर्याद्यङ्गलेपनम्] em.; °द्र...कस्तूर्याद्यङ्गलेप... N, °द्रव्यकस्तूर्याद्येङ्गलेपनम् O

[५] पश्चाद्धिमाम्बुकर्पूरमिश्रगन्ध°] em; ...श्चाद्धि...म्बुकर्पूरमिश्रग्रन्ध° N, पश्चाद्धिमाम्बुकर्पूरमिश्रग्रन्ध° O

[६] दिव्याङ्ग°] Npc, O; अदिव्याङ्ग... Nac

[७] ततः] O; त... N

[८] रत्नाभरणपट्टादिगोलकादिसमर्पणम्] em.; रत्नाभर...पट्टादिगो...कादिसमर्पणम् N, रत्नाभर...दिगोलकादि...र्पणम् O

[९] भुयस्सुरभिपुष्पार्चा तस्मिन्नवसरे] em.; ...स्सुरभि...ष्पार्चा तस्मिन्नवसरे N, भुयस्सुरभि...ि तस्मिन्नवसरे O

[१५.७. पुष्पभेदः]

अर्चनायाम् -

पुष्पभेदात्पत्रभेदात्फलभेदोऽस्ति तद्यथा[1] ॥ २०३ ॥

शिवतन्त्ररहस्यसारे -

पुष्पाणि सात्त्विकानीह[2] शुक्लवर्णानि[3] यानि वै ।
राजसानि च रक्तानि तामसान्यसितान्यपि ।
श्यामं तमोरजोमिश्रं पीतं राजससात्त्विकम्[4] ॥ २०४ ॥

किरणे -

मोक्षदं सात्त्विकं[5] ज्ञेयमृद्धिदं राजसं तथा ।
मिश्रितं द्वयसिद्ध्यर्थं[6] पत्रं पुष्पं च वृद्धिदम् ॥ २०५ ॥

203cd. The source of this verse has not been traced.
204. The *Śivatantrarahasyasāra* is not known to us: the verse appears as *Īśānaśivagurudevapaddhati* 5:74c-75.
205. Not traced in the *Kiraṇa*, but cf. *Ṣaṭsahasrakālottarāgama*, T. 767, p. 67.

---

[1] तद्यथा] O; ...द्यथा N

[2] सात्त्विकानीह] em.; सात्विकान... N, सात्वि...हि O

[3] शुक्लवर्णानि] O; ...क्लवर्णान N

[4] तमो रजो मिश्रं पीतं राजससात्त्विकम्] N; त...र...मिश्रं...तं...जसः सात्विकम् O

[5] सात्त्विकं] em.; सात्विका N, सात्वि.. O

[6] मिश्रितं द्वयसिद्ध्यर्थं] em.; मिश्रतद्वयसिद्ध्यर्थं N, मिश्रितन्द्व...म् O

शिवधर्मोत्तरे –

शिवाश्रमाश्रितैः[१] पूजा कर्तव्या यतिभिः[२] सदा ।
पुष्पैररण्यसम्भूतैः पत्रैर्वा[३] वनसम्भवैः ॥ २०६ ॥

सुपक्वैः स्फुटितैः सद्यश्चाहृतैश्च सुगन्धिभिः ।
चम्पकैः[४] करवीराद्यैः पुष्पैश्चान्यैस्तथोचितैः[५] ।
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्छिवम् ॥ २०७ ॥

अजिते –

श्वेतै रक्तैस्तथा पीतैः पुष्पैश्च कुसुमैः शुभैः ।
अपर्युषितनिश्छिद्रैः[६] कृमिकेशादिवर्जितैः[७] ॥ २०८ ॥
सर्वैरेतैः कृतं यच्च पत्रैश्चैव[८] तथाविधैः ।

---

206. Quoted from *Śivadharmottara* 11:8. The second half of the verse reads differently, मनसा पूजयेद्योगी पुष्पैरारण्यसम्भूतैः ॥

---

[१] शिवाश्रमाश्रितैः] N; शिवा...तै O

[२] कर्तव्या यतिभिः] em.; कर्तव्यो यदिभिः N, O

[३] पत्रैर्वा] N; प...वा O

[४] चम्पकैः] em.; चम्पकः N, चंवकैः O

[५] पुष्पैश्चान्यैस्तथोचितैः] em.; पुष्प...ान्यै...चितैः N, पुष्पैश्चा...स्थथोचितैः O

[६] अपर्यु०] em.; अपर्यू० N, O

[७] कृमिके०] N; कमिके० O

[८] कृतं यच्च पत्रैश्चैव] em.; कृतस्साचं पत्रैश्चैव N, कृत...प... O

श्रेष्ठमभ्यर्चनं प्रोक्तं पुष्पैः कृष्णैर्विना कृतम्[1] ॥ २०९ ॥

मध्यमं[2] यजनं प्रोक्तं सितरक्तैस्तु कन्यसम्।

पुष्पाणि तानि वक्ष्यामि श्वेतादीनि यथाक्रमम्[3] ॥ २१० ॥

सितपद्मं सितार्कं च[4] मन्दारं करवीरकम्[5]।

नन्द्यावर्तं च पुन्नागं[6] मल्लिका जातिरेव च ॥ २११ ॥

माधवी कुरवं[7] चैव[8] द्रोणं धुर्द्धूरमेव च।

सकलं पुष्पं भद्रा च गिरिकर्णी[9] तथैव च ॥ २१२ ॥

श्रीपुष्पं वकुलं चैव[10] लोध्रपुष्पं तथैव च[11]।

208-220. Quoted from *Ajita* 22:33-50.

---

[1] पुष्पैः कृष्णैर्विना कृतम्] O; पु...ष्णैर्विता... N

[2] मध्यमं] O; ... N

[3] यथाक्रमम्] O; ...थाक्रमम् N

[4] सितपद्मं सितार्कं च] N; सि...तं सिता... O

[5] करवीरकम्] em.; कररकं N, क...वीरकम् O

[6] नद्यावर्तं च पुन्नागं] N; नद्याव...च पुन्ना... O

[7] ०कुरवं] em.; ०कुसुमं N, O

[8] चैव] O; चैवं N

[9] गिरिकर्णी] em.; गिरिकर्णी N, ...रिकर्णी O

[10] श्रीपुष्पं वकुलं चैव] em.; श्री...ष्पैर्वकुलं चै... N, श्रीपुष्पैर्वकुलं चैव O

[11] लोध्रपुष्पं तथैव च] N; लोध्रपु...तथै... O

सिन्दुवारं[1] शमीपुष्पं सितान्युक्तानि तानि तु[2] ॥ २१३ ॥
रक्तपुष्पं पलाशं च हयमारं च पाटली[3] ।
सुरक्तबृहती चैव पिण्डीतकमतः[4] परम्[5] ॥ २१४ ॥
पट्टिका चोत्पलं रक्तं मुनिपुष्पं तथैव च[6] ।
कदम्बं चेति रक्तानि[7] पीतानि च ततः शृणु[8] ॥ २१५ ॥
चम्पकं कर्णिकारं च तथारग्वधमेव[9] च ।
हेमधुत्तूरकं[10] चैव कुरण्डं[11] गोक्षुरं तथा ॥ २१६ ॥
असनं शिखिनी[12] चैव पीतपुष्पं प्रकीर्तितम्[13] ।

---

[1] सिन्दुवारं] O; सिन्धुवारं N

[2] सितान्युक्तानि तानि तु] N; सितान्युक्त... ... O

[3] पाटली] O; पा...ली N

[4] पिण्डीतकमतः] em.; पिण्डीतः कमतः N, O

[5] परम्] O; प... N

[6] तथैव च] N; ...थे... O

[7] रक्तानि] N; र... नि ... O

[8] शृणु] em.; श्रुणु N, O

[9] तथारग्वधमेव] em.; तथारयुतमेव N, तथारयुधमेव O

[10] हेमधुत्तूरकं] em.; हेमदुर्धूरकं N, O

[11] चैव कुरण्डं] em.; चैव...रण्डं N, चै... ...रण्डं O

[12] शिखिनी] em.; शङ्खिनी N, शखिनी O

[13] प्रकीर्तितम्] N; प्र...र्ति... O

नीलोत्पलं विष्णुक्रान्तिरतसीपुष्पमेव[1] च ॥ २१७ ॥
कुरण्डं कृष्णवर्णं च चतुर्वर्णं प्रकीर्तितम् ।
कनकानि कदम्बानि जातीपुष्पं तथैव च ॥ २१८ ॥
रात्रौ दद्याच्छिवे शेषं[2] दद्याद्देवे[3] दिवानिशम् ।
नन्द्यावर्तं[4] भवेत्प्रातः द्रोणं मध्यन्दिने[5] तथा ॥ २१९ ॥
जातिः[6] साये विशेषेण दातव्या[7] स्याच्छिवाय वै[8] ।
निर्गन्धान्युग्रगन्धानि[9] कुसुमानि विवर्जयेत्[10] ॥ २२० ॥
गन्धहीनमपि ग्राह्यं पवित्रं तु कुशादिकम्[11] ।

221ab. Quoted from *Pūrva-Kāmika*, 5:58ab.

[1] ०क्रान्ति०] N; ०...न्ति० O
[2] दद्याच्छिवे शेषं] em.; दद्याच्छिवेच्छेषं N, O
[3] दद्याद्देवे] O; द्यद्यादेदवे N
[4] नन्द्यावर्तं] O; न... ...N
[5] प्रातः द्रोणं मध्यन्दिने] conj.; ...वेत्प्रातः मोदणध्यदिने N, ...वे...प्रातन्द्रोणमध्यन्दिने O
[6] जातिः] em.; जातिं N, O
[7] दातव्या] em.; दातव्यं N, O
[8] स्याच्छिवाय वै] Npc, Opc ; स्याच्छिवा... वे Nac, स्याच्छि वै वाय वै Oac
[9] निर्गन्धान्युग्रगन्धानि] Npc; निर्गन्धान्युग्रहन्धानि Nac, O
[10] विवर्जयेत्] Npc; विणर्जयेत् Nac, ...वर्जयेत् O
[11] कुशादिकम्] N; कु...दि... O

कुशाः सद्देशजाः[१] स्निग्धा नातिखर्वा न चायताः[२] ।
शुकच्छायाः साग्रमूलाः[३] सप्तपर्णा[४] न सप्तजाः ॥ २२१ ॥

कालोत्तरे -

पूज्यं[५] नीलोत्पलाद्यैश्च[६] कुन्दचम्पकजातिभिः[७] ।
कुब्जधुर्द्धूरकबकैः[८] करवीरैः सपाटलैः ॥ २२२ ॥
कदम्बदमनाद्यैश्च[९] अखण्डैरजुगुप्सितैः[१०] ।
मुकुलैर्न्नार्चयेल्लिङ्गं पक्वमेव निवेदयेत् ॥ २२३ ॥
पुष्पाणामप्यलाभे[११] तु पत्राण्यपि[१२] निवेदयेत् ।

222-223b. Quoted from *Bṛhatkālottara* 13:96c-97 (NGMPP B 24/59, f. 120r).
223c-224b. Cf. *Śivadharmaśāstra* 5:88cd & 89cd; cf. also *Pūrva-Kāmika*, 5:61.

---

[१] कुशाः सद्देशजाः] em.; नशाः सदेशजा N, तशाः सदेशजा O

[२] चायताः] em.; चायता N, O

[३] साग्रमूलाः] em.; साग्रमूला N, O

[४] सप्तपर्णा] conj.; सप्तवर्णा N, O

[५] पूज्यं] conj.; पूजां N, O

[६] पूजां नीलोत्पलाद्यश्च] Opc; पूजाभिलोत्पला...श्च N, पूजां नीलोत् चैव पलाद्यश्च Oac

[७] कुन्द०] O; कुद० N

[८] ०धुर्द्धूरकबकैः] N; ०धुर्धूरकवकैः N, ०धुर्धूरकव... O

[९] कदम्बदमना०] N, Opc; कदम्बदेमना० Oac

[१०] अखण्डै०] conj.; वाचन्यै० N, O

[११] ०लाभे] N; ०ला... O

[१२] पत्राण्यपि] N, Opc; पत्त्राण्यापि Oac

अपामार्गं कुशं[1] दूर्वां पञ्चबिल्वं शमी तथा ॥ २२४ ॥
एकपत्रारविन्दञ्च तुलसी नागदन्तिका ।
सहकारस्तथा कृष्णतुलसी गन्धपुष्पिका ॥ २२५ ॥
मधुरं[2] सहदेवी च[3] दान्तं भद्रा यवाङ्कुरम्[4] ।
एवमादीनि[5] पत्राणि शिवप्रीतिकराणि वै ॥ २२६ ॥
सर्वपत्रेषु सङ्ग्राह्यं[6] बिल्वं च तुलसीद्वयम्[7] ।
तुलसीं बिल्वपत्रं च स्वर्णपुष्पं तथैव[8] च ॥ २२७ ॥
प्रक्षाल्य परमेशानमर्चयेत्तु[9] मुहुर्मुहुः ।
उशीरहिरिबेरादिमूलानि[10] शुभदानि च ॥ २२८ ॥

---

[1] अपामार्गं कुशं] em.; अपामार्गकुशा N, O
[2] मधुरं] em.; मधूरं N, मधू... O
[3] सहदेवी च] em.; सहदेविञ्च N, O
[4] यवाङ्कुरम्] em.; यवाङ्कुर N, O
[5] एवमादीनि] O; एवमादी... N
[6] सर्वपत्रेषु सङ्ग्राह्यं] N; सर्वपत्रे...ङ्ग्राह्यं O
[7] °द्वयम्] O; °तुयम् N
[8] बिल्वपत्रं च स्वर्णपुष्पं तथैव] O; बिल्व...त्रं च स्व...ष्पं ...थैव N
[9] परमेशानमर्चयेत्तु] O; पर...शानमर्चयेत्तु N
[10] उशीरहिरिबेरादि°] O; उशीरीहिरिभेरादि° N

[१५.८. मालाभेदः]

एकवर्णकृता माला श्रेष्ठेति[१] परिकीर्तिता ।
बहुवर्णैः तथा पुष्पैः मध्यमा परिकीर्तिता[२] ॥ २२९ ॥
पुष्पपत्रैः कृता[३] माला कन्यसेति प्रकीर्तिता[४] ।
बिल्वपत्रैरखण्डैश्च[५] सकृत्पूजयते शिवम्[६] ॥ २३० ॥
सर्वपापविनिर्मुक्तः शिवलोके महीयते[७] ।
आपीठान्तं महेशानं[८] तुलसीदलमालया[९] ॥ २३१ ॥
आच्छादयति[१०] देवेशं[११] गवां कोटिफलं लभेत् ।

230c-231b. Cf. *Śivadharmaśāstra* 5:94c-95b.

---

[१] श्रेष्ठेति] O; श्रे...ति N
[२] परिकीर्तिता] O; परिकीर्तिताः N
[३] पुष्पपत्रैः कृता] N; पु...त्रैः ...ता O
[४] प्रकीर्तिता] O; प्रकीर्ति... N
[५] विल्व०] O; ...ल्व० N
[६] ०पूजयते शिवम्] N; पूजय... ...वम् O
[७] शिवलोके महीयते] N; शिव...के ...हीयते O
[८] महेशानं] O; महेशानां N
[९] तुलसीदलमालया] O; तुलमालया N
[१०] आछादयति] em.; आछादयति N, आ...य... O
[११] देवेशं] O; दे...शं N

[१५.९. पुष्पधूपादिदानाय योग्यस्थानानि]

मूर्ध्नि[१] पुष्पं प्रकुर्वीत पद्माकारं सुशोभनम् ॥ २३२ ॥
कर्णिकाष्टदलोपेतं दलैः षोडशभिर्युतम्[२] ।
तत्त्वत्रितयसंयुक्तं[३] पुष्पाञ्जल्यर्चनात्रयम्[४] ॥ २३३ ॥
इण्डामालाद्यलङ्कारैरलङ्कृत्य[५] सदाशिवम्[६] ।
घण्टामस्त्रेण[७] सन्ताड्य दद्याद्धूपं च दीपिकाम् ॥ २३४ ॥
धूपं नासापुटे[८] दद्याच्छिखामन्त्रेण[९] बुद्धिमान्[१०] ।
दीपं नेत्रेषु[११] नेत्रेण पश्चादाचमनार्घ्यकम्[१२] ।

---

[१] मूर्ध्नि] N; मू... O
[२] ०भिर्युतम्] N; ०भिर्यु... O
[३] ०संयुक्तं] em.; ०...युक्तं N, ०संयुक्त O
[४] पुष्पाञ्जल्यर्चनात्रयम्] N; पुष्पाञ्ज... ... O
[५] इण्डामालाद्यलङ्कारैरलङ्कृत्य] em.; इडामालाद्यलङ्कारैरलङ्कृ... N, इ...मालाद्यलङ्कारैरल...त्य O
[६] सदाशिवम्] N, Opc; सशदाशिवम् Oac
[७] घण्टा०] em.; पण्या० N, घण्या० O
[८] धूपं नासापुटे] N; धू... ...टे O
[९] ०मन्त्रेण] Opc; ०ममत्रेण N, मैन्त्रेण Oac
[१०] बुद्धिमान्] N; ...न् O
[११] नेत्रेषु] O; नेत्रे... N
[१२] ०नार्घ्यकम्] N; ०नार्घ्य... O

तां मनोरथमुद्रां च तथोक्तं[१] वातुलागमे[२] ॥ २३५ ॥

वातुले -

हृदयेन[३] तु गन्धार्चा शिरसा पुष्पपूजनम्[४] ।
शिखया धूपदानं च[५] दृष्ट्या दीपसमर्पणम्[६] ॥ २३६ ॥
वर्मणा[७] वस्त्रभूषार्चा घण्टाताडनमस्त्रतः ।
द्रव्यं प्रति विशेषेण[८] घण्टां सन्ताड्य चार्चयेत्[९] ॥ २३७ ॥
राक्षसाश्चासुराश्चापि[१०] पिशाचा[११] ब्रह्मराक्षसाः ।
घण्टाघोषेण गच्छन्ति †देवसान्निध्यमेव च† ॥ २३८ ॥

---

236. Untraced in the *Vātulaśuddhākhya*. Contrast with *Uttara-Kāmika*, 29:95a-96b
238. The text is corrupt here, but the idea might have been that expressed in the following tag: आगमार्थं तु देवानां गमनार्थं तु राक्षसाम् ।

---

[१] तथोक्तं] N; तथा... O
[२] वातुलागमे] N; वातुला...मे O
[३] हृदयेन] em.; हृ...येन N, ...दयेन O
[४] गन्धार्चा शिरसा पुष्पपूजनम्] O; ...र्चा शि... ...ष्पपूजनम् N
[५] धूपदानं च] em.; धूप...न... N, धू...दानं च O
[६] °समर्पणम्] N, Opc; °समर्पणम् Oac
[७] वर्मणा] em.; वर्मणो N, वम...णा O
[८] विशेषेण] O; वि...षेण N
[९] चार्चयेत्] conj.; चार्पयेत् N,O
[१०] राक्षसाश्चासुराश्चापि] em.; राक्षसा...सुराश्चापि N, राक्षसाश्चासुरा...पि O
[११] पिशाचा] N; पि...चा O

[१५.१०. घण्टाताडनम्]

कालोत्तरे –

एकनादस्तु मोक्षाय विरक्तानां प्रशस्यते।
घण्टाताडनमेवं[1] स्याद्द्विनादो[2] भोगमोक्षदः॥ २३९॥
जानुनाभ्योरधो[3] नादः कर्तव्यो न कदाचन।
नाभेरूर्ध्वं तु कर्तव्यं घण्टाताडनमुत्तमम्[4]॥ २४०॥
उत्तमः स्निग्धघोषः स्यान्मध्यमो[5] मध्यमः स्मृतः[6]।
अधमो[7] घर्घराघोषो[8] घण्टाघोषस्य लक्षणम्॥ २४१॥
इत्यथो ज्ञेयमात्मार्थे[9] घण्टापञ्चकमुत्तमम्।
ततो लयाङ्गयजनमस्त्रादीशान्तमेव[10] तत्॥ २४२॥

239-241. Untraced. Quoted with attribution to the *Kālottara* in the *Prabhāvyākhyā* on the *Kriyākramadyotikā*, p. 107. Also *Ātmārthapūjāpaddhati*, T. 55, pp. 493-494.

[1] घण्टाताडनमेवं] N; घ...ताडन... O
[2] स्याद्द्विनादो] Npc; स्याद्द्विना... Nac, स्याद्द्वि...दे O
[3] जानुनाभ्योरधो] em.; जानुनादेनथो N, जानुना...थो O
[4] घण्टाताडन०] N; घण्टा...न० O
[5] उत्तमः स्निग्धघोषः स्या०] em.; उक्तस्निग्धस्नग्धघोषस्या० N, उत्तमस्निग्धस्नग्धघोषस्या० O
[6] मध्यमः स्मृतः] em.; मध्यमस्मृ... N, मध्यमस्मृतः O
[7] अधमो] N; ...मो O
[8] घर्घराघोषो] em.; ...र्घ...घोषो N, ...र्घ...रघोषो O
[9] ज्ञेयमात्मार्थे] N, Opc; ज्ञेज्ञेयमात्मार्थे Oac
[10] ०स्त्रादीशान्तमेव] em.; ०स्त्रादी...मेव N, ०...दीशान्तमेव O

[१६.१. भोगाङ्गपूजनम्]

भूयो भोगाङ्गपूजायै मूलेन शिवमर्चयेत्[1] ।
भोगाङ्गपूजनं[2] नाम पृथक् ब्रह्माङ्गपूजनम् ॥ २४३ ॥

[१६.२. आवरणानां सङ्ख्या]

कामिके –

एकावरणपूजा[3] स्यादङ्गैर्ब्रह्मभिरर्चनम्[4] ।
अथवा केवलैरङ्गैः केवलैः[5] ब्रह्मभिस्तु वा[6] ॥ २४४ ॥
ब्रह्माङ्गैः लोकपैरस्त्रैर्भवेदावरणत्रयम्[7] ।
ब्रह्मविद्येशनन्दीन्द्रशस्त्रैरावृतिपञ्चकम्[8] ।
गर्भावरणमेकं[9] तु पूजयेल्लिङ्गमूलतः[10] ॥ २४५ ॥

244-245b. Quoted from *Pūrva-Kāmika*, 4:492. Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 419.
245ef. Ascribed to *Santāna* in *Ātmārthapūjāpaddhati*, T. 55, p. 420.

[1] शिव०] N; श...० O

[2] भोगाङ्गपूजनं] N; भोगा...पू...नं O

[3] एकावरणपूजा] N; एका...रणपूजा O

[4] स्यादङ्गैर्ब्रह्मभिरर्चनम्] em.; स्त्रादङ्गैर्ब्रह्मभिरर्चनम् N, ...द......भिरर्चनम् O

[5] केवलैरङ्गैः केवलैः] em.; केवलैरङ्गैः कैवलैः O; के...लैरङ्गैः ...लैः N

[6] वा] N; ... O

[7] ०स्त्रैर्भ०] em.; ०स्त्रर्भ० N, O

[8] ०शस्त्रैरावृतिपञ्चकम्] N; ०...स्त्रर...वृतिपञ्चकम् O

[9] गर्भा०] N; ग...० O

[10] ०मूलतः] N; ०...तः O

तथान्यत्र[1] –

अनन्ताद्या दलाग्रेषु पीठकण्ठे[2] गणेश्वराः[3]।
पीठपादे[4] तु लोकेशाः पीठाधः[5] शस्त्रमूर्तयः[6] ॥ २४६ ॥
इत्यादिवचनैरेकावरणमात्मार्थके[7] वरम्।
आत्मार्थे त्वथवा[8] पञ्चावरणार्चनमुत्तमम्[9]।
शम्भोस्तदर्थं[10] विज्ञाप्य[11] लब्धानुज्ञस्तथार्चयेत्॥ २४७ ॥

---

246. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 420.
अनन्ताद्या दलाग्रेषु विद्येशांस्तत्र पूजयेत्। पीठकण्ठे गणेशांस्तु लोकेशान्पीठपादतः ॥

Cf. also *Dhyānaratnāvali*, v. 190, with different readings in the second line: पीठपादे तु लोकेशाः तदस्त्राणि शिलोपरि ॥

---

[1] तथान्यत्र] em.; तथा...त्र N, ...न्यत्र O

[2] पीठकण्ठे] N; पीठ...ण्ठे O

[3] गणेश्वराः] O; गणे...राः N

[4] पीठपादे] em.; पीठ...दे N, O

[5] पीठाधः] em.; पीठाथः N, O

[6] शस्त्रमूर्तयः] Npc; शस्त्रमूर्त्र्यः Nac, श...यः O

[7] °कावरणमात्मार्थके] Opc; °कावरणस्यात्मके N, °कावरणस्यार्थके Oac

[8] आत्मार्थे त्वथवा] N; आ... त्वथ... O

[9] पञ्चावरणार्चनमुत्तमम्] O; पञ्चा पञ्चावरणार्चनन्तामुत्तमम् N

[10] °तदर्थं] O; ...दर्थं N

[11] विज्ञाप्य] N; ...ज्ञाप्य O

विजये -

पञ्चब्रह्मषडङ्गानि देवस्य परितो यजेत्।
मूर्धभ्यस्तत्तदङ्गेभ्यो[१] दीपाद्दीपवदाहरेत्[२] ॥ २४८ ॥

[१६.३. ब्रह्माङ्गपूजनम्]

तर्हि ब्रह्माणि चाङ्गानि पूजयेत्तत्कथं[३] यदि।

[१६.३.१. पञ्चब्रह्मार्चनम्]

आदायेशानमत्रादौ देवमस्तकपञ्चकात्[४] ॥ २४९ ॥
पद्मेशानदलादौ[५] तं पूजयेद्ध्यानपूर्वकम्[६]।
स्फटिकाभं जगद्धेतुं त्रिनेत्रं[७] चन्द्रमौलिनम् ॥ २५० ॥
सौम्यं[८] प्रसन्नमीशानं त्रिशूलाभयधारिणम्[९]।

248. Untraced in *Vijaya* and *Vijayottara*. Also quoted with atribution to the *Vijaya* in *Ātmārthapūjāpaddhati*, T. 55, p. 421:
पञ्चब्रह्म तदङ्गानि देवस्य परितस्ततः। वक्त्रेभ्यश्च तदङ्गेभ्यो दीपाद्दीपवदाहरेत् ॥
250c-251b. Also quoted in *Ātmārthapūjāpaddhati*, T. 55, p. 421.

[१] मूर्धभ्यः०] conj.; मूर्त्तभ्य० N, O
[२] दीपाद्दीपवदाहरेत्] N; ...पाद...वदाहरेत् O
[३] पूजयेत्तत्कथं] em.; पूजयेदकथं N, O
[४] ०पञ्चकात्] N; ०प...कात् O
[५] ०दलादौ] O; ०दल N
[६] पूजयेद्ध्यानपूर्वकम्] N; पू...नपूर्वकम् O
[७] स्फटिकाभं जगद्धेतुं त्रिनेत्रं] em.; स्पटिकाभजगद्धेतु त्रिणेत्रं N, स्पटिकाभजगद्धेतुं त्रिणेत्रं O
[८] सौम्यं] O; साम्यं N
[९] त्रिशूला०] O; त्रशूला० N

इति प्रणवसंयुक्तमीशानाय[1] नमोऽर्चयेत्॥ २५१॥
अथ तं नरमादाय[2] वक्त्रेभ्यः परमेशितुः[3]।
पद्मपूर्वदलादौ[4] तं ध्यानपूर्वं यजेद्यथा[5]॥ २५२॥
पीताम्बरोपवीतं च पुरुषं हेमसन्निभम्[6]।
मातुलुङ्गाक्षसूत्रे[7] च दधानं[8] चन्द्रमौलिनम्[9]॥ २५३॥
इत्यों हें तत्पुरुषाय[10] नमः सम्पूजयेदथो।
आदायेशहृदोऽघोरं[11] पूजयेद्याम्यदिग्दले[12]॥ २५४॥
त्र्यक्षं मौलीन्दुहृत्सौम्यं कुण्डलालङ्कृतं ततः।

---

[1] ०संयुमीशानाय] conj.; ०संयुक्तमी...य N, ०संयुक्तं राशानाय O

[2] नरमादाय] em.; नरामादाय N, O

[3] परमेशितुः] N; ...र...शितुः O

[4] ०दलादौ] N; ०द...दौ O

[5] यजेद्यथा] N, Opc; यजेद्यथं Oac

[6] हेमसन्निभम्] em.; हेम...न्निभम् N, O

[7] ०क्षसूत्रे] O; ०...सूत्रे N

[8] दधानं] O; द... N

[9] चन्द्रमौलिनम्] conj.; विकटाननम् N, O (eyeskip)

[10] तत्पुरुषाय] O; तत्पुरु... य N

[11] ०हृदोऽघोरं] N; ०हृदाघोरं O

[12] ०दिग्दले] N; ०...दलो O

बभ्रुभ्रूश्मश्रुकेशाढ्यं[1] दंष्ट्रया[2] विकटाननम् ॥ २५५ ॥

कपालमालाभरणं सर्पवृश्चिकभूषणम्[3] ।

खट्वाङ्गं[4] च कपालं च खेटकं पाशमेव च ॥ २५६ ॥

वामहस्तचतुष्केऽथ[5] दक्षहस्तचतुष्टये[6] ।

त्रिशूलं[7] परशुं खड्गं दण्डं चैवारिमर्दनम् ॥ २५७ ॥

ध्यायेन्नवाम्बुदाभासमघोरं[8] सर्वकामदम् ।

इति ओं[9] हुमघोराय नमोऽघोरं समर्चयेत् ॥ २५८ ॥

वाममादाय सादाख्ये[10] गुह्यमण्डलदेशतः[11] ।

255-258b. Quoted from *Ātmārthapūjāpaddhati*, T. 55, p. 422.

---

[1] ०श्मश्रुकेशाढ्यं] em.; ०श्मश्रुकेशाद्यं N, ०श्म...केशाढ्यं O

[2] दंष्ट्रया] N; दंष्ट्रय O

[3] सर्ववृश्चिकभूषणम्] em.; ...र्ववृश्चि...भुषणम् N, सर्व...भुषणम् O

[4] खट्वाङ्गं] N; खट्वा... O

[5] ०चतुष्केऽथ] N; ०च...ष्केऽथ O

[6] दक्षहस्तचतुष्टये] O; दक्षह...चतु... ये N

[7] त्रिशूलं] em.; त्रशूलं N, ... O

[8] ध्यायेन्नवाम्बुदाभासमघोरं] N; ध्याये...म्बुदा...सं घोरं O

[9] ओं] conj.; चों N, O

[10] सादाख्ये] O; सादा... N

[11] गुह्यमण्डलदेशतः] em.; ...ह्यमण्डलदेशतः N, गुह्यमण्डल... O

पद्मस्योदग्दलादौ[१] तं यजेत्तद्ध्यानपूर्वकम् ॥ २५९ ॥
वामं रक्तं सुरक्ताभमाल्यवस्त्रोपवीतकम्[२] ।
तुङ्गनासारुणोष्णीषं[३] खड्गखेटलसत्करम्[४] ॥ २६० ॥
योषिदाकारसर्वाङ्गं वस्त्रयुग्मविराजितम्[५] ।
इत्यों हिं[६] वामदेवाय[७] नमोऽभ्यर्च्य[८] ततः परम् ॥ २६१ ॥
सद्योजातं गृहीत्वैवं[९] पादाद्यखिलविग्रहात्[१०] ।
पद्मपश्चिमपत्रादौ सद्योजातं[११] समर्चयेत् ॥ २६२ ॥
सितस्रग्गन्धभूषाढ्यं[१२] सितोष्णीषं सिताम्बरम् ।

260. Quoted from *Ātmārthapūjāpaddhati*, T. 55, p. 423.

[१] ०दलादौ] O; ०दलाधौ N

[२] सुरक्ताभ०] conj.; सुरक्ताभं N, O

[३] तुङ्गनासारुणोष्णीषं] O; हुङ्गनासारुणोष्णीषं N

[४] खड्गखेटलसत्करम्] O; खड्गखेट...करम् N

[५] वस्त्र०] N; ⊔ O

[६] इत्यों हिं] O; इ...हं N

[७] वामदेवाय] N; वाम... O

[८] नमोऽभ्यर्च्य] O; ...मोऽभ्यर्च्य N

[९] गृहीत्वैवं] em.; गृहीत्वेव N, गृहीत्वे... O

[१०] पादाद्य०] N; ...दद्य O

[११] सद्योजातं] O; सद्यो...तं N

[१२] सितस्रग्गन्ध०] em.; सितसृक्गन्ध० N, चितसृक्गन्ध० O

सौम्यं मौलीन्दुसम्पन्नं[1] बालाकारं त्रिलोचनम्[2] ॥ २६३ ॥

सद्योजातं सितास्यैकं वरदाभयहस्तकम्[3] ।

इत्यों हं सद्योजाताय नमोऽजातं प्रपूजयेत्[4] ॥ २६४ ॥

बालयौवनवृद्धस्त्रीबालाकारं[5] शिवादितः[6] ।

पञ्चामी[7] ब्रह्मदेवाः तत्तदाशाभिमुखाः[8] स्थिताः ॥ २६५ ॥

[१६.३.२. अङ्गपूजा]

अथेशानोत्तरे[9] नेत्रं[10] दृग्भ्य आदाय तैजसम्[11] ।

नेत्रदेवं[12] त्रिनेत्रं[13] तु सितवर्णं[14] दिगाननम् ॥ २६६ ॥

265ab. Cf. *Śivapūjāstava*, v. 23cd.

[1] ०सम्पन्नं] N; ०स...न्नं O

[2] त्रिलोचनम्] O; त्रलोचनम् N

[3] वरदाभय०] em.; वदरद...य० N, वरदा...० O

[4] ०जातं प्रपूजयेत्] N; जा... प्र...येत् O

[5] वालयौवनवृद्धस्त्रीवालाकारं] O; वाल...वन...द्धस्त्रवाला...र N

[6] शिवादितः] O; शिवादितम् N

[7] पञ्चामी] N; प...मी O

[8] ०शाभिमुखाः] em.; ०शाभि...ख N, ०शा...मुख O

[9] अथेशानोत्तरे] em.; अथेशानोत्त... N, अ...त्तरे O

[10] नेत्रं] O; ...त्रे N

[11] आदाय तैजसम्] O; आ...य तैजसा N

[12] नेत्रदेवं] N; ने... O

[13] त्रिनेत्रं] em.; त्रणेत्रं N, त्रिणेत्रं O

[14] सितवर्णं] em.; सित... N, सिताणार्णा O

त्रिशूलं[1] चाक्षसूत्रं[2] च दधानं च चतुर्भुजम्।
कपालं कुण्डिकां वामे[3] जटाखण्डेन्दुमण्डितम्[4] ॥ २६७ ॥

यद्वा -

अरुणाभं स्मरेन्नेत्रं[5] दृक्क्रियेच्छात्मकं विभोः[6]।
त्रितत्त्वरूपवह्न्यादिमण्डलत्रितयाश्रयम्[7] ॥ २६८ ॥
हृदाद्यङ्गोक्तवदनकरधार्यादिसंयुतम्[8]।
एकास्यं वा[9] त्रिशूलाहिहस्तं[10] योगशिवोक्तितः[11] ॥ २६९ ॥

266c-267. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 424.
नेत्रं त्रिनेत्रसंयुक्तं श्वेतवर्णं दिगाननम् ॥
त्रिशूलं चाक्षसूत्रं च बिभ्राणं दक्षिणे करे। कपालं कुण्डिकां सव्ये जटाखण्डेन्दुमण्डितम् ॥
268-269. Quoted in the *Prabhāvyākhyā* on the *Kriyākramadyotikā*, p. 108 and also *Dhyānaratnāvali*, v. 139c-141b.

---

[1] त्रिशूलं] O; त्रशूलं N
[2] चाक्षसूत्रं] N; चा...सूत्रं O
[3] वामे] O; वाम N
[4] जटाखण्डेन्दुमण्डितम्] em.; ...खण्डेन्दुमण्डितम् N, जटाखण्डेन्दुम...तम् O
[5] स्मरेन्नेत्रं] em.; स्मरन्नेत्र N, O
[6] दृक्क्रियेच्छात्मकं विभोः] em.; दृ...च्छात्मकं विभो N, दृक्क्रियेच्छा...भो O
[7] त्रितत्त्वरूपवह्न्यादिमण्डलत्रितयाश्रयम्] em.; त्रि...त्वरूप...ह्यादिमण्डलत्रितयाश्रयम् N, त्रि...रूपवह्या...म...त्रितया... O
[8] °क्तवदन°] O; °क्त...दन° N
[9] एकास्यं वा] O; एकास्यं N
[10] त्रिशूलाहि°] conj.; त्रिशूलाभि° N, O
[11] योगशिवोक्तितः] O; यो...त N

इति ध्यात्वा यजेन्नेत्रं नमोन्तेनाक्षिमन्त्रतः[१] ।
नेत्रं सर्वज्ञताबीजं हृदयं[२] सत्त्वदर्शकम्[३] ॥ २७० ॥
†शिरः सर्वेशितात्मान्या पराधीनवशित्वगा[४] ।
वर्मा[५] चाखिलगोप्तात्वं † ॥ २७१ ॥
वर्मान्याभेद्यता रूपमस्त्रमन्यैरधृष्यता ।
वातुलेऽपि तथा[६] प्रोक्तमङ्गानां गुणगौरवम् ॥ २७२ ॥
अस्तित्वादिति[७] लिखितं[८] कामिकोक्तं पुरात्र तु ।
तस्मादक्षि विनान्येषामर्चनक्रम[९] उच्यते ॥ २७३ ॥
वह्नीशरक्षोवाय्विन्द्रयमकेन्दुदलेषु च[१०] ।

273ab. Perhaps this is a reference to the *Kāmikatantrasāra*: cf. the passage beginning अस्मित्वं हृदयं तस्य quoted on p. 111 in the *Prabhāvyākhyā* on the *Kriyākramadyotikā*.

---

[१] नमोन्तेना०] N; न...तेना O

[२] ०बीजं हृदयं] O; ०... हृ...यं N

[३] सत्त्वदर्शकम्] N; सत्वद...कम् O

[४] पराधीनवशित्वगा] O; प...।धीन... N

[५] वर्मा] O; ...र्म N

[६] वातुलेऽपि तथा] O; ...तु...था N

[७] ०दिति] O; ०दिनि N

[८] लिखितं] em.; ... N, लि...तं O

[९] विनान्येसामर्चनक्रम] conj.; विनान्यो नामार्चनक्रम O ...मर्चनाक्रम N

[१०] वह्नीशरक्षोवाय्विन्द्रयमकेन्दुदलेषु च] em.; omits N, वह्नीशरक्षो...ाध्विन्द्रय...केन्दुदल...षु च O

क्रमेण हृच्छिरश्शूडावर्मशस्त्राणि[1] पूजयेत् ।

पूजास्तवैकश्लोकेन तद्ध्यानं सम्यगुच्यते[2] ॥ २७४ ॥

पूजास्तवे –

शुचीशरक्तपानिलेन्द्रमृत्युकेन्दुसंस्थितान्[3]
पयोधरार्कवातवह्निसन्निभानिनेक्षणान्[4] ।
युगाननान् वराभयत्रिशूलशक्तियुक्करान्[5]
नमः शिवाङ्गसम्भवान् हृदादिमन्त्रविग्रहान् ॥ २७५ ॥

इतीशहृच्छिरश्शूडासर्वाङ्गाक्षिकरोद्भवाः[6] ।
षडङ्गदेवाः सर्वेऽमी[7] शिवस्याभिमुखस्थिताः[8] ॥ २७६ ॥

275. Quoted from *Śivapūjāstava*, v. 41.

[1] वर्मशस्त्राणि] em.; व...साणि N, ...शस्त्राणि O

[2] सम्यगुच्यते] N; ...गुच्यते O

[3] शुचीशरक्तपानिलेन्द्रमृत्युकेन्दुसंस्थि०] em.; ...चीशरक्तपानिलेन्दमृत्युकेन्दुसंस्थि० N, शुचीशरक्तपानिलेन्द्रमृत्युके...० O

[4] ०धरार्कवातवह्निसन्निभानिनेक्षणान्] em.; ०...र्क...तवह्निसन्निभानिनेक्षणान् N, ०धरार्कवात...न्निभानिनेक्षणान् O

[5] युगाननान् वराभयत्रिशूलशक्तियुक्करान्] em.; यु...ना...राभयत्रि...ल...क्तियुक्क... N, ...न्वराभयत्रिशूल...क्तियुक्क...न् O

[6] ०सर्वाङ्गाक्षिकरोद्भवाः] em.; ०सर्वाङ्गाक्षिक...वाः N, ०सर्वा...क्षिक...द्भवाः O

[7] षडङ्गदेवाः सर्वेऽमी] O; षडङ्ग...र्वे... N

[8] शिवस्याभिमुखस्थिताः] O; ...वस्याभि...खस्थि... N

[१६.३.३. ब्रह्माङ्गानां संस्कारााष्टकैरेव पूजनम्]

कामिके –

संस्काराष्टकमात्रं तु[१] ब्रह्माङ्गानां प्रकीर्तितम्[२] ।
नावकुण्ठनमेतेषां[३] नामृतीकरणं तथा[४] ॥ २७७ ॥
इति चेदष्टकं[५] कुर्यादावाहनादि चतुष्टयम्[६] ।
पाद्यमाचमनं[७] चार्घ्यं पुष्पदानं तथाष्टकम्[८] ॥ २७८ ॥
इत्येतैरष्टसंस्कारैः[९] ब्रह्माङ्गानि[१०] समर्चयेत्[११] ।

---

277. *Pūrva-Kāmika*, 4:459-460:
आवाहानादिनैतानि स्वमन्त्रैः क्रमशोऽर्चयेत् । नावाकुण्ठनमेतेषाममृतीकरणं विना ॥
संस्काराष्टकमेवैतत्प्रत्येकं विहितं बुधैः । स्नपनं दीपक्लृप्तैश्च न पृथक् चाङ्गभावतः ॥
Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 429.

---

[१] संस्काराष्टकमात्रं तु] em.; स...राष्टकमात्र... N, संस्कारा...मात्रं ... O

[२] प्रकीर्तितम्] O; प्रकीर्ति... N

[३] ॰नमेतेषां] N, Opc; ॰नमेक्षोततषां Oac

[४] नामृतीकरणं तथा] em.; नामृतीकारणं तथा N; नामृतीक...णं त... O

[५] इति चेदष्टकं] em.; इ...चेद...क N, इति चेदष्ट... O

[६] कुर्यादावाहनादि चतुष्टयम्] em.; किस्यादा...नादि च...ष्टयम् N, ...दाह्वनादि ...तुष्टयम् O

[७] पाद्यमाचमनं] O; प...मनं N

[८] पुष्पदानं तथाष्टकम्] em.; ...दानं तथा...कम् N, पुष्प... तथा...कम् O

[९] इत्येतैरष्ट॰] O; इत्येतैर...॰ N

[१०] ब्रह्माङ्गानि] em.; ब्रह्माहानि N, ब्रह्माहा... O

[११] समर्चयेत्] em.; ...च...त् N, समर्च...त् O

यद्वा समुदितानष्टसंस्कारानेकधार्चयेत्[1] ॥ २७९ ॥

अथैतेषां क्रियापूर्त्यै[2] ब्रह्माङ्गानां यथाक्रमम्[3] ।

[१६.३.३.१. मुद्राप्रदर्शनम्]

धेनुः[4] पद्मं त्रिशूलं[5] च मकरी स्त्रुङ्नतिश्च षट्[6] ॥ २८० ॥

मुद्रा देया हृदा पश्चाच्छम्भोः पुष्पाञ्जलिं सकृत्[7] ।

वौषण्मूलेन[8] दत्वाथ महामुद्रां[9] च दर्शयेत्[10] ॥ २८१ ॥

[१६.३.४. परमीकरणमुख्यत्वम्]

मोहशूरोत्तरे –

तामसी[11] सा भवेत्पूजा परमीकरणं विना[12] ।

280. Cf. *Mṛgendra*, *kriyāpāda*, 3:26c-27.

[1] समुदितानष्टसंस्कारानेकधार्चयेत्] O; ...दिता...स्का...क...य... N

[2] अथैतेषां क्रियापूर्त्यै] em.; ...तेषां ...या...त्त्यैं N, ...थैतेषां क्रि...त्त्यैं O

[3] ब्रह्माङ्गानां यथाक्रमम्] em.; ...ह्माङ्गानां यथ...मम् N, ब्रह्माङ्गनां यथाक्र...म् O

[4] धेनुः] O; धेनु N

[5] पद्मं त्रिशूलं] N; ... त्रि...लं O

[6] मकरी स्त्रुङ्नतिश्च षट्] em.; मकरि स्वूङ्ग...ट् N, मकरि स्त्रुङ्नन्तिश्च षट् O

[7] मुद्रा देया हृदा पश्चाच्छम्भोः पुष्पाञ्जलिं सकृत्] O; ...दया ...श्चाच्छ...ञ्जलिं स...त् N

[8] वौषण्मूलेन] em.; वौषद्न्मूलेन N, ...ष ...ले... O

[9] दत्वाथ महामुद्रां] N; ...त्वाथ ...द्र... O

[10] दर्शयेत्] em.; दर्श...त् N, ...र्शयेत् O

[11] तामसी] N; तामस O

[12] भवेत्पूजा परमीकरणं विना] O; भ...पूजा ...रमिक...न... N

इत्युक्त्या शम्भवे[१] कुर्यात्परमीकरणार्चनम्[२] ॥ २८२ ॥

[१६.३.५. अङ्गप्रत्यङ्गसाङ्गोपाङ्गानि]

पश्चादङ्गाङ्गिभावेन[३] शिवेन सह तेजसः ।

व्याप्त्यै चेत्थं[४] विभाव्याथ[५] साङ्गोपाङ्गं यजेच्छिवम्[६] ।

प्रोक्तं वातुलशुद्धाख्ये[७] ज्ञेयमङ्गादिलक्षणम् ॥ २८३ ॥

[१६.३.५.१. अङ्गम्]

वातुलशुद्धाख्ये[८] –

स्यादेवमङ्गप्रत्यङ्गसाङ्गोपाङ्गं[९] चतुर्विधम्[१०] ।

282ab. Cf. *Mohacūḍottara*, NGMPP A 182/2, f. 39r
पवित्रेण विना पूजा तामसी परिकीर्तिता । राजसी च भवेदिन्द्र परमीकरणाद्विना ॥
तस्मात् पूजा पवित्रञ्च परमीकरणन्तथा । कर्तव्यं सततं सद्भिः संसारभयभीरूभिः ॥
Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 432.

---

[१] शम्भवे] em.; शम्भव N, शम्भ... O
[२] कुर्यात्परमीकरणार्चनम्] em.; कुर्यात्प...मीकरणार्चनम् N, ...त्परमीक...र्चनम् O
[३] पश्चादङ्गाङ्गिभावेन] em.; पश्चा...ङ्गाङ्गिभा...न N, पश्चाद... O
[४] व्याप्त्यै चेत्थं] em.; व्याप्त्यैरित्थं N, O
[५] विभाव्याथ] O; व...थ N
[६] साङ्गोपाङ्गं यजेच्छिवम्] em.; ...ङ्गं ...च्छि...म् N, साङ्गोपा... यजेच्छि...म् O
[७] वातुलशुद्धाख्ये] O; वातु...शुद्धा... N
[८] वातुलशुद्धाख्ये] O; ...तुलशु...ख्ये N
[९] स्यादेवमङ्गप्रत्यङ्गसाङ्गोपाङ्गं] N; स्यादेव...ङ्ग ...त्यङ्गसाङ्गोपाङ्ग O
[१०] चतुर्विधम्] O; चतु... N

शिरो वक्रं[1] च हृदयमङ्गं चेति प्रकीर्तितम्[2] ॥ २८४ ॥
वक्षः कण्ठः स्तनौ[3] बाहू नाभिगुह्योदरास्तथा[4] ।
[१६.३.५.२. प्रत्यङ्गम्]
नेत्रे[5] नासास्यकर्णाश्च[6] पाणिपादौ[7] तथाङ्गुलिः[8] ॥ २८५ ॥
तथोरुजानुजङ्घाश्च[9] प्रत्यङ्गमिति कथ्यते[10] ।
मूर्तीनां[11] गुणरूपं[12] तु साङ्गमित्यभिधीयते[13] ॥ २८६ ॥

284-289. Quoted from *Vātulaśuddha* 1: 91-97.
अङ्गं प्रत्यङ्गसाङ्गं चोपाङ्गं चत्वारि च क्रमात्। शिरो वक्रं च हृदयमङ्गं चेति प्रकीर्तितम्॥
वक्षः कण्ठः स्तनौ बाहू नाभिगुह्योदराणि च। नेत्रे नासास्यकर्णौ च पाणिपादौ तथाङ्गुलिः॥

---

[1] शिरो वक्रं] O; शरव... N
[2] प्रकीर्तितम्] O; प्रकी... N
[3] कण्ठः स्तनौ] em.; ...ण्ठस्तनौ N, कण्ठस्त... O
[4] ०दरास्तथा] O; ०दरा... N
[5] नेत्रे] em.; ...त्र N, नेत्र O
[6] नासास्यकर्णाश्च] N; ना...श्च O
[7] पाणिपादौ] em.; पाणिपाद N, O
[8] तथाङ्गुलिः] em.; तथाङ्गुलि N, O
[9] तथोरुजानुजङ्घाश्च] em.; तथोरुजा... N, तथोरुजानुजङ्घाश्च O
[10] कथ्यते] O; क...ते N
[11] मूर्तीनां] N; ...नां O
[12] गुणरूपं तु] O; गुण... N
[13] साङ्गमित्यभिधीयते] em.; ...ङ्ग...त्यभिधीयते N, साङ्गमित्यभि...ते O

[१६.३.५.३. साङ्गम्]

गुणश्चिह्नमिति ज्ञेयं[१] स्वगुणो दशधा भवेत्[२]।
गुणः[३] सत्यं प्रतापश्च दुर्भेद्यत्वमनुग्रहः[४] ॥ २८७ ॥
भूतिर्माया[५] च नादश्चाधृष्यत्वं[६] नियमो[७] दश[८]।
एते दश गुणाः[९] शम्भोः तेषां लक्षणमुच्यते[१०] ॥ २८८ ॥

ऊरू च जानुजङ्घे च प्रत्यङ्गं चेति कीर्तितम्। मूर्तीनां गुणरूपं च साङ्गं चेति प्रकीर्तितम् ॥
गुणश्चिह्नमिति ज्ञेयं तद्गुणो दशधा भवेत्। त्रिगुणं शक्तिः खड्गं च दुर्भेद्योऽनुग्रहस्तथा ॥
विधिर्माया विवरणं वर्णं संहार एव च। एते दश गुणाः प्रोक्तास्तेषां लक्षणमुच्यते ॥
त्रिगुणं शूलमित्युक्तं शक्तिः परशुरीरितः। खड्गस्त्वीशप्रतापः स्याद्दुर्भेद्यो वज्रमिष्यते ॥

---

[१] गुणश्चिह्नमिति ज्ञेयं] em.; गुणश्चिन्नमि...यं N, ...णश्चिह्नमिति ज्ञे... O

[२] स्वगुणो दशधा भवेत्] N; ...णे ... ...त् O

[३] गुणः] N; ...O

[४] दुर्भेद्यत्वमनुग्रहः] O; द...त्वमनुग्रहः N

[५] भूतिर्माया] em; ...र्माया N, हृदिर्माया O

[६] नादश्चाधृष्यत्वं] em.; नादश्च ...ष्यत्व N, O

[७] नियमो] N; निय... O

[८] दश] O; ... N

[९] एते दश गुणाः] O; ... N

[१०] लक्षणमुच्यते] O; ल...ते N

कामिकतन्त्रसारे –

त्रिगुणाः[1] शूलमित्युक्तं[2] सत्यं[3] चात्रपरश्वथम्[4]।

प्रतापः[5] शाम्भवः खड्गोऽभेद्यत्वं[6] वज्रमिष्यते ॥ २८९ ॥

अनुग्रहोऽभयं[7] सर्वलोकानां परिपालनम्[8]।

शक्तिः संहारिणी वह्निः[9] पाशानां भस्मसात्करी[10] ॥ २९० ॥

289-293. The *Kāmikatantrasāra* is not known to us. But for this passage, cf. *Pūrva-Kāmika*, 4:335c-340b.

त्रिशूलं त्रिगुणं प्रोक्तं सत्ता परशुरुच्यते ॥

खड्गमीशप्रतापः स्याद्वज्रं दुर्भेद्यता भवेत्। वह्निः संहारिणी शक्तिः पाशानां भस्मसात्करी ॥

प्रकाशिका पदार्थानां महामायोर्ध्ववर्तिनाम्। नागोपधृष्टता शक्तिस्सर्वेषां च विधायिका ॥

पाशं पाशत्रयं विद्यान्मायाकर्ममलात्मकम्। घण्टा नादात्मकं रूपं मन्त्रविग्रहबोधकम् ॥

अभयं सर्वलोकानां शक्तिर्वै परिपालिनी। यद्भोग्ये ह्यात्मनः प्राप्तिस्त्वत्रैव नियमोऽङ्कुशम् ॥

एवम्भूतस्वरूपाणि स्मर्यन्ते चायुधानि वै।

---

[1] त्रिगुणाः] em.; त्रिगुणाः N, ...गुणाः O

[2] ०मित्युक्तं] N; ०मि...क्तं O

[3] सत्यं] O; सत्य... N

[4] चात्र०] ; चाप्र N, चान्द्र०O

[5] प्रतापः] O; ...पः N

[6] शाम्भवः खड्गो०] em.; ...म्भवः खड्गो० N, शाम्... ख...ो० O

[7] अनुग्रहो०] em.; ...नुग्रहो० N, अ...हो० O

[8] सर्वलोकानां परिपालनम्] N; ... O

[9] वह्निः] em.; व... N, वह्नि O

[10] पाशानां भस्मसात्करी] em.; पाशा...स्मसात्करी N, पाशाना ...त्करी O

प्रकाशिका पदार्थानां[१] स च मायोर्ध्ववर्तिनाम्[२] ।
माया तु पाश एव स्यादीशाशेति[३] सा स्फुटम्[४] ॥ २९१ ॥
नादो घण्टामणिः[५] प्रोक्तो मन्त्रविग्रहबोधकः[६] ।
अधृष्यत्वं ही नागः[७] स्याच्छक्तिः सर्वभयङ्करी ॥ २९२ ॥
यद्भोग्ये[८] ह्यात्मनः[९] प्राप्तिस्तत्रैव नियमोऽङ्कुशः[१०] ।
एवमुक्तं[११] स्वरूपं स्याद् दशायुधानां[१२] तु देशिकैः[१३] ॥ २९३ ॥

290c-291b. Cf. also *Kriyākramadyotikā*, p. 99. Cf. also *Dhyānaratnāvali*, v. 123.
वह्निः संहारिणी शक्तिः पाशानां भस्मसात्करी ।
प्रकाशिका पदार्थानां महामायोर्ध्ववर्तिनाम् ।

---

[१] प्रकाशिका पदार्थानां] em.; प्रका... ...र्थानां N, ...काशिका प...र्था... O

[२] स च मायोर्ध्ववर्त्तिनाम्] em.; स च ...योध्व...नाम् N, ...च ...योध्ववत्तिनाम् O

[३] तु पाश एव स्यादीशाशेति] conj.; तु पा... ए...स्या...श्येति N, ...श एव...ा... O

[४] सा स्फुटम्] N; एव...ा ...टम् O

[५] नादो घण्टामणिः] N; ...O

[६] प्रोक्तो मन्त्रविग्रहबोधकः] em.; प्रो...ा मन्त्रवि...ध... N, ...क्तो मन्त्रविग्र...बोधकः O

[7] नागः] em.; नागं N,O

[८] यद्भोग्ये] N; य...भोग्ये O

[९] ह्यात्मनः] O; ह्या...नः N

[१०] नियमोऽङ्कुशः] em.; निय...ङ्कुशः N, नियमा...शः O

[११] एवमुक्तं] N; ...क्तं O

[१२] स्वरूपं स्याद् दशायुधानां] em.; स्वरूपस्यादा...धानां N, ...रू...स्य ...शायु...नां O

[१३] तु देशिकैः] conj.; ... N, ...शिकः O

शूलं परश्वसी[1] वज्राभयेऽग्निः पाश एव च[2] ।
घण्टा[3] नागोऽङ्कुशश्चेति[4] सदाशिवदशायुधम्[5] ॥ २९४ ॥
एते दशगुणा[6] वत्स साङ्गमित्यभिधीयते[7] ।

[१६.३.५.४. उपाङ्गम्]

वस्त्रोपवीतमाल्यादिगन्धाश्चाभरणानि[8] च ॥ २९५ ॥
आसनावरणाद्यं[9] यदुपाङ्गमिति तत्प्रभौ[10] ।
एवमुक्त्याङ्गप्रत्यङ्गसाङ्गोपाङ्गसमन्वितम्[11] ॥ २९६ ॥

---

294. Cf. *Pūrva-Kāmika*, 4:332.
शूलं परशुखड्गं च वज्रं वह्निं च दक्षिणे । अभयं पाशमन्यच्च घण्टां नागाङ्कुशौ तथा ॥
295. Cf. *Vātulaśuddha* 1: 100.
एतानि गुणरूपाणि साङ्गानि च यथाक्रमम् । वस्त्रोपवीतमाल्यानि गन्धाश्चाभरणं तथा ॥

---

[1] परश्वसी] O; प...स N
[2] पाश एव च] O; पा... N
[3] घण्टा] O; ...ण्टा N
[4] नागोऽङ्कुशश्चेति] em.; नादेऽङ्कु... N, ना...ऽङ्कुशश्चेति O
[5] सदाशिवदशायुधम्] em.; ...शिवदशा...तम् N, सदाशिवदशायुतम् O
[6] एते दशगुणा] em.; एते दशगु...I N, ...दशगु...I O
[7] साङ्गमित्यभिधीयते] em.; स...त N, साङ्गमित्यभिधि... O
[8] वस्त्रोपवीतमाल्यादिगन्धाश्चाभरणानि] em.; वस्त्रोपवीतम...भरणानि N, व...ोपवी...दिगन्धाश्चाभरणानि O
[9] आसनावरणाद्यं] O; आ...णा... N, आसनावारणाद्यः O
[10] यदुपाङ्गमिति तत्प्रभौ] O; य...ङ्गमि... ...भा N
[11] एवमुक्त्याङ्गप्रत्यङ्गसाङ्गोपाङ्गसमन्वितम्] em.; ...वमुक्त्याङ्गप्रत्य...ङ्गे...ङ्गस...तम् N, एवमु...प्रत्यङ्गसाङ्गोपाङ्ग...मन्वितम् O

[१६.३.६. धूपदीपमहानैवेद्यदानम्]

सादाख्यस्वामिनं ध्यात्वा[१] दद्याद्धूपं च दीपिकाम्[२] ।
अस्मिन्नवसरे देयं[३] महानैवेद्यमुत्तमम् ॥ २९७ ॥
पञ्चावृत्यर्चनापक्षे तदन्ते हि निवेदनम्[४] ।

[१६.३.७. पञ्चावरणपूजा]

तत्कथं यदि वक्ष्यामः[५] पञ्चावरणपूजनम्[६] ॥ २९८ ॥
प्रथमावरणे चोक्तं[७] ब्रह्माङ्गध्यानपूर्वकम् ।
द्वितीयावरणेऽनन्तदेवादेरष्टकं[८] यजेत् ॥ २९९ ॥
प्रागाद्यष्टदलाग्रेषु[९] तत्तन्नाम्ना तु तद्यथा[१०] ।
विद्येश्वराश्चतुर्वक्त्रा[११] हरवद्दशबाहवः[१२] ॥ ३०० ॥

---

[१] सादाख्यस्वामिनं ध्यात्वा] em.; ...न ...त्व N, सादा...मिन ...I O

[२] दद्याद्धूपं च दीपिकाम्] O; दद्या...पं च ...ाम् N

[३] अस्मिन्नवसरे देयं] O; अस्मिन्न...र... दयं N

[४] पञ्चावृत्यर्चनापक्षे तदन्ते हि निवेद०] O; पञ्चावत्यर्चनापक्षे तद...हि नि...० N

[५] वक्ष्यामः] O; ... N

[६] पञ्चावरणपूजनम्] em.; पञ्चावर... N, पञ्चाव...पू...म् O

[७] प्रथमावरणे चोक्तं] em.; ...थमावरणे चोक्ता N, प्रथम...रणार्च्चोक्ता O

[८] द्वितीयावरणेऽनन्तदेवादेरष्टकं] O; ...तीया...रणेऽनन्तदेवादे...ष्टकं N

[९] प्रागाद्यष्टदलाग्रेषु] O; प्रागा...द...ग्रेष N

[१०] तत्तन्नाम्ना तु तद्यथा] em.; ...म्ना ... तद्य...I N, तत्तन्नाम्न ...था O

[११] विद्येश्वराश्चतुर्वक्त्रा] em.; वि...रा...र्वक्त्रा N, विद्येश्व...श्चतुर्वक्त्र O

[१२] हरवद्दशवाहवः] em.; हरवद्दश...ाहवम् N, हरवद्दशवाह... O

खण्डेन्दुमौलयः[१] सौम्याः[२] पद्मस्था विविधायुधाः।
हेमाग्निनीलभृङ्गेन्दुहिमरक्तसिताः[३] क्रमात्।
पञ्चावरणस्तोत्रे तु तद्ध्यानं[४] स्पष्टमीरितम्[५] ॥ ३०१ ॥

[१६.३.७.१. द्वितीयावरणे-विद्येशध्यानम्]

पञ्चावरणस्तोत्रे –

खड्गं बाणमथाक्षसूत्रमभयं[६] पद्मं च सव्यैः करैः
वामैः खेटधनुःकमण्डलुवरान्[७] शूलान्वितान् बिभ्रतः[८]।

300c-301b. Cf. *Kriyākramadyotikā*, p. 226.
विद्येश्वराश्चतुर्वक्त्रा हरवद्दशवाहवः। खण्डेन्दुमौलयस्सर्वे पद्मस्था विविधायुधाः॥
खड्गखेटधनुर्बाणकमण्डल्वक्षसूत्रिणः। वराभयकरोपेताः शूलपङ्कजपाणयः॥
हेमाग्निनीलभृङ्गेन्दुहिमरक्तसिताः क्रमात्। विद्येश्वराः ककुब्वर्णाः प्रबद्धाञ्जलिपाणयः॥
एकानना जटायुक्ता ध्येयाः पूर्वादिषु क्रमात्। त्र्यक्षाश्च शक्तिशूलाढ्याश्चन्द्ररेखाजटान्विताः॥

---

[१] खण्डेन्दुमौलयः] N; ...ण्डेन्दु... O
[२] सौम्याः] em.; सौम्यां N, ... O
[३] हेमाग्निनीलभृङ्गेन्दुहिमरक्तसिताः] em.; हेमा...नीलभृ...हिमरक्त...ताः N, हेमाग्निनी...भृ ...न्दुहिमरक्त... O
[४] तद्ध्यानं] O; तद्ध्यान N
[५] स्पष्टमीरितम्] O; स्पष्टमी...तम् N
[६] खड्गं बाणमथाक्षसूत्रमभयं] N; ...मथ... O
[७] ०कमण्डलुवरान्] em.; ०कमण्डलवरान् N, ०कमण्ड... O
[८] बिभ्रतः] em.; विभ्रतःN; भिभ्रतः O

पद्मस्थांश्चतुराननान् प्रतिमुखं[१] नेत्रत्रयेणान्वितान्[२]

विद्येशान्[३] रुचिराननान्धृतजटाचूडेन्दुखण्डान्[४] भजे ॥ ३०२॥

यद्वैकास्यान् स्मरेत्सर्वान्[५] करद्वयकृताञ्जलीन्[६]।

अनन्तं च तथा सूक्ष्मं शिवोत्तममतः[७] परम्[८] ॥ ३०३॥

एकनेत्रैकरुद्रौ च त्रिमूर्तिं श्रीकण्ठमेव च[९]।

शिखण्डिनमिति[१०] प्रोक्तानष्टदिक्षु[११] यजेत्क्रमात्[१२] ॥ ३०४॥

तत्तन्मन्त्रैः सहृदयैश्चतुर्थ्यन्तैः[१३] प्रपूजयेत्।

---

302. Quoted from *Pañcāvaraṇastava*, v. 65.

---

[१] प्रतिमुखं] N; प्र...मुख O

[२] नेत्रत्रयेणान्वितान्] O; नेत्रत्रयेणा...न् N

[३] विद्येशान्] em.; वि...शान् N, विद्ये... O

[४] रुचिराननान्धृतजटाचूडेन्दुखण्डान्] em.; रुचिरानना...चूडेन्दुखण्डान् N, ...चूडेन्दुख... O

[५] यद्वैकास्यन् स्मरेत्सर्वान्] em.; ...का...रे...न् N, यद्वैकांस्यत्स्मरेत्सर्वा... O

[६] करद्वयकृताञ्जलीन्] N; कर...ताञ्जलीन् O

[७] शिवोत्तममतः] em.; शि...त्तमम... N, ...वोत्तममतः O

[८] परम्] N; प... O

[९] एकनेत्रैकरुद्रौ च त्रिमूर्त्तिं श्रीकण्ठमेव च] conj.; ए...नेत्रै...रुद्रा च त्रमूर्त्तिं श्रीक...मेव N, एकने...करु... च...कण्ठमेव O

[१०] शिखण्डिनमिति] N; ...मिति O

[११] प्रोक्तानष्टदिक्षु] em.; प्रोक्तानष्टदीक्ष N, प्रो...नष्टदीक्षु O

[१२] यजेत्क्रमात्] O; य...त्क्रमात् N

[१३] तत्तन्मन्त्रैः सहृदयैश्चतुर्थ्यन्तैः] em.; तत्तन्म... सहृदयैश्चतु...न्तैः N, ...त्तन्मन्त्रैः सहृद...न्तैः O

सुप्रभेदागमोक्त्यैषां कालकण्ठीं[1] प्रदर्शयेत्॥ ३०५॥

[१६.३.७.२. तृतीयावरणे–गणेश्वराणां पूजनम्]

तृतीयावरणे[2] पूज्याः[3] प्रागाद्यष्टौ गणेश्वराः[4]।

रक्तो नन्दी चतुर्बाहुरेकवक्त्रस्त्रिदृग्जटी[5]॥ ३०६॥

साक्षसूत्रस्त्रिशूली[6] च वराभयविराजितः[7]।

इति नन्दिनमैन्द्रेऽथ[8] महाकालं[9] तथानले॥ ३०७॥

त्रिणेत्रः[10] पीनकृष्णाङ्गो[11] बभ्रुश्मश्रुशिरोरुहः[12]।

305cd. Cf. *Suprabheda, kriyāpāda*, 8:150cd. विघ्नेशानां गणेशानां कालकण्ठं तु दर्शयेत्।

306c-307b. Cf. *Kriyākramadyotikā*, p. 226.

रक्तो नन्दी चतुर्वाहुरेकवक्त्रस्त्रिदृग्जटी। साक्षसूत्रस्त्रिशूली च वराभयकरान्वितः॥

---

[1] सुप्रभेदागमोक्त्यैषां कालकण्ठीं] em.; ...दाग...क्त्यैषां... N, सुप्रभेदाग...क्त्यै... का...ण्ठीं O

[2] तृतीयावरणे] em.; तृतीया...र... N, तृती...व... O

[3] पूज्याः] em.; पूज्यां N, O

[4] प्रागाद्यष्टौ गणेश्वराः] N; प्र... ...राः O

[5] ०स्त्रिदृग्जटी] em.; ०...टी N, ०...क् ज... O

[6] साक्षसूत्रस्त्रिशूली] em.; ...सू...त्रशू... N, साक्ष ...शूली O

[7] वराभयविराजितः] O; व...यवि...ः N

[8] नन्दिनमैन्द्रेऽथ] em.; नन्दि...मैन्द्रैथ N, नन्दिन...न्द्रैथ O

[9] महाकालं] N; महा... O

[10] त्रिणेत्रः] N; ...णे... O

[11] पीनकृष्णाङ्गो] N; ...ष्णाङ्गो O

[12] बभ्रुश्मश्रुशिरोरुहः] em.; सभृश्म... N, ...शिरोरुहः O

मुण्डखड्गौ खेटशूले महाकालो वहन्[1] करैः ॥ ३०८ ॥

इति[2] ध्यात्वा[3] महाकालमर्चयेदथ दक्षिणे ।

निर्मांसविग्रहो[4] भृङ्गी शुभ्रो दण्डाक्षसूत्रधृक्[5] ॥ ३०९ ॥

नृत्यंस्त्रिनेत्रः[6] सशिखो देवालोकनतत्परः[7] ।

इति[8] भृङ्गिं[9] गणेशानमर्चयेदथ[10] नैरृते[11] ॥ ३१० ॥

त्रिणेत्रो वामनाकारो गजवक्त्रश्च तुन्दिलः[12] ।

---

308. Cf. *Kriyākramadyotikā*, p. 226.
309c–310b. Cf. *Kriyākramadyotikā*, p. 226.
निर्मांसविग्रहो भृङ्गी श्वेतो दण्डाक्षसूत्रधृक् । नृत्यंस्त्रिनेत्रः सशिखो देवालोकनतत्परः ॥

---

[1] मुण्डखड्गौ खेटशूले महाकालो वहन्] em.; ...ले म...ले ...न् N, ...ण्डखगौ खेट...शूले महाक...हन् O

[2] इति] em.; इ... N, ... O

[3] ध्यात्वा] O; ध्या... N

[4] निर्मांसविग्रहो] em.; निर्मांगविग्रहो N, निर्मां विग्र... O

[5] शुभ्रो दण्डाक्षसूत्रधृक्] conj.; शुभ्रोद...त् N, शुभ्रोदण्डा... O

[6] नृत्यंस्त्रिनेत्रः] em.; द्द...त्रिनेत्रः N, द्दत्य...त्रः O

[7] सशिखो देवालोकनतत्परः] em.; सशिखा ...लोक...त्परः N, सशिखो देवालोक...तत्परः O

[8] इति] em.; ... N, ...ति O

[9] भृङ्गिं] conj.; भृङ्गि N, O

[10] गणेशानमर्चयेदथ] O; गणेशानमर्च...द... N

[11] नैरृते] em.; नै...ते N, नैरृ... O

[12] वामनाकारो गजवक्त्रश्चतुन्दिलः] em.; ...नाकारो ... N, वामनाका... ...क्त्रश्चतु... O

पाशाङ्कुशौ[1] स्वकं[2] दन्तं पक्वमाम्रफलं[3] वहन्[4] ॥ ३११ ॥
शुण्डावामकराभ्यां च रक्ताङ्गो[5] विघ्ननायकः[6] ।
इति विघ्नेश्वरं[7] ध्यायंश्चार्चयेताथ[8] पश्चिमे ॥ ३१२ ॥
वृषो वृषाकृतिस्त्र्यक्षो[9] रुद्रैकगतमानसः[10] ।
साक्षाद्धर्मस्वरूपी[11] च शुद्धस्फटिकनिर्मलः[12] ॥ ३१३ ॥

311-312b. Cf. *Kriyākramadyotikā*, p. 226. त्रिनेत्रो वामनाकारो गजवक्त्रो महोदरः। पाशाङ्कुशौ स्वदन्तञ्च पक्वमाम्रफलं वहन् ॥ शुण्डावामकराभ्यां च रक्ताङ्गो विघ्ननायकः।
313. Cf. *Kriyākramadyotikā*, p. 227.
वृषो वृषाकृतिस्त्र्यक्षो रुद्रैकगतमानसः। साक्षाद्धर्मस्वरूपश्च शुद्धस्फटिकनिर्मलः ॥

---

[1] पाशाङ्कुशौ] O; पा... N

[2] स्वकं] O; ... N

[3] पक्वमाम्रफलं] O; ...त्र...लं N

[4] वहन्] em.; ... N, व... O

[5] शुण्डावामकराभ्यां च रक्ताङ्गो] O; ...ण्डाव... च ...क्ताङ्गो N

[6] विघ्ननायकः] em.; ...घ्न...यकः N, ...घ्ननायकः O

[7] विघ्नेश्वरं] O; विघ्ने... N

[8] ध्यायंश्चार्चयेताथ] em.; ...य...थ N, ध्या...र्चयेताथ O

[9] वृषाकृति॰] O; ...त N

[10] रुद्रैकगतमानसः] em.; रुद्रै...तमानसः N, रुत्रै...नसः O

[11] साक्षाद्धर्मस्वरूपी] em.; साक्षाद्धर्म...रूपी N, सा...रूपी O

[12] शुद्धस्फटिकनिर्मलः] em.; ...द्धस्फटिक...र्मलः N, ...स्फटिकनिर्मलः O

इति ध्यात्वा तु वृषभं पूजयेदथ[१] मारुते[२]।

बालवेषश्चतुर्बाहुः[३] स्कन्दः कनकसुप्रभः[४] ॥ ३१४ ॥

शक्तिकुक्कुटहस्तश्च वराभयसमन्वितः[५]।

इति स्कन्दं[६] यजेद्वायोर्दिश्यनन्तरमुत्तरे[७] ॥ ३१५ ॥

सिंहोपरि स्थिता पीता[८] शूलादर्शकरद्वया[९]।

करण्डमकुटोपेता[१०] मुक्तादिभिरलङ्कृता ॥ ३१६ ॥

इति ध्यायन् यजेद्देवी[११] पश्चादीशानदेशतः[१२]।

314c-315b. Cf. *Kriyākramadyotikā*, p. 227.

चतुर्भुजो वालवेषस्स्कन्दः कनकसुप्रभः। शक्तिकुक्कुटहस्तश्च वराभयसमन्वितः॥

316. Cf. *Kriyākramadyotikā*, p. 227.

सिंहोपरि स्थिता पीता शूलादर्शकरद्वया। करण्डमकुटा देवी मुक्तादिभिरलङ्कृता॥

---

[१] पूजयेदथ] O; ...ये... N

[२] मारुते] Npc; मारुतो Nac, मा...ते O

[३] वालवेषश्चतुर्वाहुः] em.; वाल...तुर्वाहु N, वा...वेषश्चतु...हु O

[४] कनकसुप्रभः] em.; क...क...प्रभः N, कुनकसप्रभः O

[५] शक्तिकुक्कुटहस्तश्च वराभयसमन्वितः] N; शक्तिकुक्कुट...स्तश्च ... O

[६] इति स्कन्दं] N; ... O

[७] यजेद्वायोर्दिश्यनन्तरमुत्तरे] em.; यजे...दिंश्य...र... N, ...जेद्वायोर्दिश्यनन्तरमुत्त... O

[८] सिंहोपरिस्थिता पीता] em.; ...परि... पी...। N, ...हो...ता पीत O

[९] शूलादर्शकरद्वया] em.; ...लादर्शकरद्व... N, ...ला...करद्वया O

[१०] करण्डमकुटोपेता] em.; करण्डमकुटापीता N, ...ण्डमकु...पीता O

[११] यजेद्देवी] N; य...त्... O

[१२] पश्चादीशानदेशतः] em.; पश्चादीशा...शतः N, ... O

चण्डेश्वरश्चतुर्बाहुरेकवक्त्रस्त्रिलोचनः[1] ॥ ३१७ ॥
बिभ्रत्कमण्डलुं[2] शूलमक्षसूत्रं परश्वथम् ।
महोरगोपवीताढ्यस्तन्निवर्त्तितकङ्कणः[3] ॥ ३१८ ॥
ध्येयो नवाम्बुदाभासः समयादिनियामकः[4] ।
इति चण्डेश्वरं ध्यात्वा[5] यजेतेत्थ[6] गणेश्वरान्[7] ॥ ३१९ ॥
विमानस्था[8] गणास्तेषां मूषकस्थो[9] गजाननः[10] ।
मयूरवाहनः स्कन्दो वृषभः[11] केवलः स्थितः ॥ ३२० ॥

317c-319b. Cf. *Kriyākramadyotikā*, p. 227.
चण्डेश्वरश्चतुर्बाहुश्चतुर्वक्त्रस्त्रिलोचनः । बिभ्रत्कमण्डलुं शूलमक्षसूत्रं परश्वथम् ॥
महोरगोपवीताढ्यस्तन्निर्वर्त्तितकङ्कणः । ध्येयो नवाम्बुदाभासः समयादिनियामकः ॥
320. Cf. *Kriyākramadyotikā*, p. 227.
विमानस्था गणास्त्वेषां मूषकस्थो गजाननः । मयूरवाहनः स्कन्दो वृषभः केवलस्थितः ॥

---

[1] चण्डेश्वरश्चतुर्बाहुरेकवक्त्रस्त्रिलोचनः] em.; चण्डेश्वरश्च...र्बाहुरेव...स्त्रि...चनः N, चण्डे...र...तुर्बाहुरेकवक्त्रस्त्रिलो... O

[2] बिभ्रत्कमण्डलुं] em.; ...भ्रत्कमण्डलुं N, बिभ्रत्क...ण्डलुं O

[3] महोरगोपवीताढ्यस्तन्निव०ः] conj.; महो...पवी...स...० N, मह...गोपवी...स्तन्निव० O

[4] नवाम्बुदाभासः समयादिनियामकः] em.; ...या...क N, ...वाम्बुधा...सः समया...या...का O

[5] चण्डेश्वरं ध्यात्वा] N; ...श्व...त्वा O

[6] यजेतेत्थ] conj.; यजेतेऽत्र N, यजेते O

[7] गणेश्वरान्] conj.; गणपेश्वराः N, गणेश्वराः O

[8] वीमानस्था] N; वी...नस्था O

[9] गणास्तेषां मूषकस्थो] O; गणास्ते... मू...कस्थो N

[10] गजाननः] N; ग... O

[11] स्कन्दो वृषभः] O; स्क... वृ...भः N

सुप्रभेदे –

विद्येशानां गणेशानां कालकण्ठीं[१] प्रदर्शयेत्।

इत्युक्त्याष्टगणेशानां[२] देया स्यात् कालकण्ठिका[३] ॥ ३२१ ॥

[१६.३.७.३. चतुर्थावरणे–लोकपालपूजनम्]

चतुर्थावरणे पूज्याः[४] पीठपादे दिगीश्वराः।

ऐरावतगजारूढं स्वर्णवर्णं किरीटिनम्[५] ॥ ३२२ ॥

सहस्रनयनं[६] शक्रं[७] वज्रपाणिं विभावयेत्[८]।

सप्तार्चिषं च बिभ्राणमक्षमालां[९] कमण्डलुम् ॥ ३२३ ॥

ज्वालामालाकुलं रक्तं शक्तिहस्तं[१०] छगासनम्।

321ab. Quoted from *Suprabheda*, *kriyāpāda*, 8:150cd.
विद्येशानां गणेशानां कालकण्ठीं तु दर्शयेत्। Cf. also *Śambhupuṣpāñjali* 3:305cd.

---

[१] कालकण्ठीं] O; कालण्ठी N

[२] इत्युक्त्याष्टगणेशानां] O; इत्युक्त्याष्ट...श...ं N

[३] कालकण्ठिका] O; का...क... N

[४] चतुर्थावरणे पूज्याः] O; ...ज्य N

[५] किरीटिनम्] conj.; ...री...तम् N, किरीटितम् O

[६] सहस्रनयनं] N; ...यनं O

[७] शक्रं] em.; वक्त्रं N, ... O

[८] विभावयेत्] em.; विभ...त् N, ...व... O

[९] बिभ्राणमक्षमालां] em.; विभ्राणमक्षमालां O; वि...णम...ळां N

[१०] शक्तिहस्तं] N; ...क्ति... O

कृतान्तं महिषारूढं[1] दण्डहस्तं भयानकम् ॥ ३२४ ॥

कालपाशधरं कृष्णं[2] ध्यायेद्दक्षिणदिक्पतिम्[3] ।

रक्तनेत्रं शवारूढं नीलोत्पलदलप्रभम् ॥ ३२५ ॥

कृपाणपाणिमस्त्रौघं[4] पिबन्तं राक्षसेश्वरम्[5] ।

नागपाशधरं[6] हृष्टं रत्नौघद्युतिविग्रहम्[7] ॥ ३२६ ॥

शशाङ्कधवलं[8] ध्यायेद्वरुणं मकरासनम्[9] ।

आपीनं हरितच्छायं[10] विलोलध्वजधारिणम्[11] ॥ ३२७ ॥

प्राणभूतं च भूतानां हरिणस्थं[12] समीरणम्[13] ।

---

[1] महिषारूढं] em.; ...षारूडं N, महिषा... O

[2] कृष्णं] Npc; पुष्णकृष्णं Nac, ...ष्णं O

[3] ध्यायेद्दक्षिणदिक्पतिम्] em.; ध्यायेद्दक्षिणदिक्प... N, ...यददक्षि ...म् O

[4] कृपाणपाणिमस्त्रौघं] em.; ...पाणं पाणि...घं N, कृपाणं पाणिम...ौघं O

[5] राक्षसेश्वरम्] em.; रा...श्वरम् N, राक्षसे... O

[6] ०पाशधरं] N; ०पाश...रं O

[7] रत्नौघद्युतिविग्रहम्] N; रत्नौघद्युतिविग्र... O

[8] शशाङ्कधवलं] N; ...शाङ्कधव... O

[9] ध्यायेद्वरुणं मकरासनम्] em.; ध्यायेद्वरु... ...सनम् N, ...येद्वरुणं ...करासनम् O

[10] हरितच्छायं] O; हरि...यं N

[11] विलोलध्वजधारिणम्] N; ...लालध्वजधा...णम् O

[12] भूतानां हरिणस्थं] O; भू... ...णस्थं N

[13] समीरणम्] em.; ...ीरिणम् N, ...मीरणम् O

कुबेरं मनुजासीनं सगर्वं[1] खर्वविग्रहम्[2] ॥ ३२८ ॥

स्वर्णच्छायं गदाहस्तमुत्तराशापतिं[3] यजेत्[4] ।

ईशानं[5] वृषभारूढं त्रिशूलव्यालधारिणम्[6] ॥ ३२९ ॥

शरच्चन्द्रावदातं[7] च चन्द्रमौलिं त्रिलोचनम्[8] ।

इति पूर्वादिदिङ्नाथानष्टाभ्यर्च्येशदक्षिणे[9] ॥ ३३० ॥

पीनं[10] पीतं चतुर्बाहुं[11] ब्रह्माणं चतुराननम् ।

हंसयानं च बिभ्राणं[12] दण्डाक्षस्रुक्कमण्डलून्[13] ॥ ३३१ ॥

322c-330b. Cf. *Kriyākramadyotikā*, pp. 227-228.
Also *Somaśambhupaddhati* IV, 2:129-136.
331. Cf. *Kriyākramadyotikā*, p. 228. Also *Somaśambhupaddhati* IV, 2:138.

---

[1] सगर्वं] O; ...गं N, सर्वगं O

[2] खर्वविग्रहम्] em.; ख...विग्र... N, ...म् O

[3] स्वर्णच्छायं गदाहस्तमुत्तराशापतिं] em.; स्वर्णृ... गदा...त्त... N, स्वर्णच्छ... ...स्तमुक्त...शापतिं O

[4] यजेत्] O; ...जत् N

[5] ईशानं] O; ईशान N

[6] वृषभारूढं त्रिशूलव्यालधारिणम्] em.; ...त्र...धा...णम् N, ...भारूडं त्रिशू...लधारिणम् O

[7] ०वदातं] N, Opc; ०वतातं Oac

[8] त्रिलोचनम्] em.; ...चनम् N, त्रिलो... O

[9] पूर्वादिदिग्नाथानष्टाभ्यर्च्येशदक्षिणे] em.; प...दि...ग्न...भ्यर्च्येशदक्षिणे N, पूर्वादिदिग्नाथानष्टा...र्च्येशद... O

[10] पीनं] N; ... O

[11] चतुर्बाहुं] O; च...सं N

[12] बिभ्राणं] em.; वि...णं N, विभ्राण O

[13] दण्डाक्षस्रुक्कमण्डलून्] em.; दण्डाक्षस्र...मण्डलन् N, द...क्षस्रुक्मण्डलून् O

इति ब्रह्माणमभ्यर्च्य पश्चान्निर्ऋतिवामतः[1]।
अनन्तं पुण्डरीकाक्षं फणादशशतैर्युतम्[2]।
विद्युद्दामप्रतीकाशं[3] कूर्मारूढं[4] कृताञ्जलिम्[5] ॥ ३३२ ॥

यद्वा –

शङ्खचक्रगदापद्महस्तं गरुडवाहनम्।
श्याममेकाननं[6] विष्णुं वनमालाविभूषितम् ॥ ३३३ ॥
अधोदिगधिपं[7] कान्तं पीतवस्त्रं[8] श्रियान्वितम्[9]।
अथैषां[10] दिक्पतीनां[11] च मुद्रा देया त्रिशूलिका[12] ॥ ३३४ ॥

332cdef. Cf. *Kriyākramadyotikā*, p. 228. Also cf. *Somaśambhupaddhati* IV, 2:137.
333-334b. Quoted from *Pañcāvaraṇastava*, vv. 84-85b.

[1] पश्चान्निर्ऋतिवामतः] em.; पश्चाग्निरुतिवामतः N, पश्चाग्निरुति...तः O
[2] फणादशशतैर्युतम्] O; गणादशशतैर्युतम् N
[3] विद्युद्दामप्रतीकाशं] O; ...द्दामप्रतीकाशं N
[4] कूर्मारूढं] O; कूर्मारूडा N
[5] कृताञ्जलिम्] em.; ...ताञ्जलिम् N, कृ...लिं O
[6] श्याममेकाननं] O; श्याममेकान्तगं N
[7] अधोदिगधिपं] O; अधो...गधिपं N
[8] कान्तं पीतवस्त्रं] N; ...न्तं पीतव... O
[9] श्रियान्वितम्] em.; श्रियान्वि... N, श्रि...ान्वितम् O
[10] अथैषां] em.; ...थैषां N, ... O
[11] दिक्पतीनां] O; ...क्पतीनां N
[12] त्रिशूलिका] em.; त्रशूलिका N, ...शूलिका O

[१६.३.७.४. पञ्चमावरणे-लोकपालास्त्रपूजनम्]

पञ्चमावरणे[१] पूज्या पीठाधोऽस्त्राण्यनुक्रमात्[२] ।
वज्रं च पुरुषं[३] स्थूलं दृढं[४] कर्कशविग्रहम्[५] ॥ ३३५ ॥
बलिनं[६] वज्रमूर्धानं दीप्तं प्राचि[७] कृताञ्जलिम्[८] ।
शक्तिं[९] च योषिदाकारामाग्नेय्यां[१०] दिशि लोहिताम्[११] ॥ ३३६ ॥
पूजयेच्छिरसा शक्तिं[१२] त्रिकोणस्थां[१३] कृताञ्जलिम् ।
दण्डं[१४] दक्षिणदिग्भागे कृष्णं पुरुषविग्रहम्[१५] ॥ ३३७ ॥
दण्डाकारशिरोयुक्तं[१] यजेल्लोहितलोचनम्[२] ।

---

[१] पञ्चमावरणे] O; पञ्चमा...र... N

[२] पीठाधो०] em.; पीठाथो० N, O

[३] पुरुषं] O; ...षं N

[४] दृढं] em.; मृडं N, O

[५] ०विग्रहम्] O; ०वि...हम् N

[६] बलिनं] em.; विलिनं N, O

[७] प्राचि] em.; प्राची N, O

[८] कृताञ्जलिम्] em.; ...ता...लिम् N, कृताञ्ज...म् O

[९] शक्तिं] em.; ... N, श... O

[१०] योषिदाकारा०] N; यो...दाकारा० O

[११] लोहिताम्] N; ...ोहिताम् O

[१२] शक्तिं] em.; शक्ति N, O

[१३] त्रिकोणस्थां] N; ...कोणस्थां O

[१४] दण्डं] em.; दण्ड N, O

[१५] पुरुषविग्रहम्] em.; पुरु...ग्रहम् N, पुरुष...ग्रहम् O

नैर्ऋत्यां पुरुषाकारं खड्गं श्यामं[३] कृताञ्जलिम्[४] ॥ ३३८ ॥
खड्गालङ्कृतमूर्धानं क्रुद्धं[५] क्रूरदृशं[६] यजेत् ।
नाभ्यधो[७] भुजगाकारं तदूर्ध्वं पुरुषाकृतिम्[८] ॥ ३३९ ॥
पाशं[९] सप्तफणोपेतमूर्धानं[१०] पश्चिमेऽर्चयेत् ।
प्रपद्ये वायुदिग्भागे ध्वजं मूर्ध्नि ध्वजान्वितम्[११] ॥ ३४० ॥
[८] प्रपूजयेत्] O; ...पूजयेत् N

[९] ०कथमुच्यते] em.; ०कथम...ते N, ०कथ...च्यते O

[१०] विद्यापीठं] O; ...द्या...ीठं N

[११] स्वसंहिताम्] conj.; सु...हिताम् N, सुसंहिताम् O

गन्धपुष्पादिमालादिनैवेद्यैः[1] शिववत्सुधीः ॥ ८६ ॥

मृगेन्द्रे -

विद्यापीठेऽपि[2] मत्वैवमेकोच्चारेण[3] पूजयेत् ।

गन्धस्रग्धूपनैवेद्यैः समाधिरुचिरीश्वरम् ॥ ८७ ॥

शिवभेदे शिवः[4] पूज्यो रुद्रभेदे स एव[5] हि ।

इति सम्पूजयेत् । तद्यथा- ओं हां सर्वेभ्यो शिवज्ञानेभ्यो नमः । इति सम्पूज्य ।

सर्वज्ञानप्रदं[6] शम्भुं[7] सर्वाज्ञानविघातकम् ॥ ८८ ॥

कायेन मनसा वाचा विद्यापीठाश्रयं भजे ।

---

86. Quoted from *Jñānaratnāvalī*, GOML MS R 14898, p. 140.

विद्यापीठं कोटिमात्रं पूजयेद्वा स्वसंहिताम् । गन्धपुष्पादिमालादिनैवेद्यैः शिववत्सुधीः ॥

87. Quoted from *Mṛgendra, Kriyāpāda* 3:56c-57b. Our 88ab appears not to belong to the *Mṛgendra*, but is also quoted along with 87 (with attribution to the *Mṛgendra*) in the *Ātmārthapūjāpaddhati*, T. 55, p. 527:

विद्यापीठेऽपि मत्वैवमेकोच्चारेण पूजयेत् । स्रग्गन्धधूपनैवेद्यैः समासरुचिरीश्वरम् ॥

शिवभेदे शिवः पूज्यो रुद्रभेदे स एव हि ।

88ab. Cf. *Uttara-Kāmika*, 67:45cd.

---

[1] गन्धपुष्पादिमालादिनैवेद्यैः] O; ग...पुष्पादिमा...दिनै...द्येः N

[2] विद्यापीठेऽपि] em.; विद्यापीठेऽभि N, वि...पीठेऽभि O

[3] मत्वैवमेकोच्चारेण] em.; मद्वेश...कोच्चरण N, मद्वेशमेके... O

[4] शिवः] O; शि... N

[5] स एव] O; ... व N

[6] सर्वज्ञानप्रदं] O; ...र्वज्ञानं...दं N

[7] शम्भुं] N; शम्भ... O

इति नमस्कृत्य[1] स्तुत्वा[2] क्षमस्वेति ब्रूयात्। इदं त्वर्चनं प्रत्यक्षीभूत-स्थापितपुस्तकलिखितशिवागमकोशविषयकम्[3]। वातुलरीत्यात्र[4] मण्डला-र्चनमुच्यते[5]।

योगपीठस्य पूर्वे[6] तु मण्डलं चतुरश्रकम्॥ ८९॥
लिखित्वास्मिन्[7] लिखेत्पद्मं[8] सदशाष्टादशच्छदम्[9]।
तस्य मध्ये तु वागीश्यै[10] शिवाय च[11] नमोऽर्चयेत्॥ ९०॥
पूर्वादिदशपत्रेषु[12] कामिकादिदशार्चयेत्।
तदावृताष्टादशके जयाद्यष्टादशार्चयेत्[13]॥ ९१॥

88c-89b. Occurs on p. 528 of T. 55 in the *Ātmārthapūjāpaddhati.*

[1] इति नमस्कृत्य] O; ...ति न...त्य N
[2] स्तुत्वा] em.; ...त्वा N, स्तु... O
[3] ०विषयकम्] conj.; ०विषयकञ्च N, O
[4] वातुलरीत्यात्र] em.; क्ष...ातुलरीत्यात्र N, वातुलरीत्यामृ O
[5] मण्डलार्चनमुच्यते] O; म...ला...नमु... N
[6] योगपीठस्य पूर्वे] O; ...यागपीठस्य ...र्वे N
[7] लिखित्वास्मिन्] N; ...खित्वास्मिन् O
[8] लिखेत्पद्मं] O; ...पद्मं N
[9] सदशाष्टादशच्छदम्] em.; स...शा...दशच्छदम् N, स...शष्टादशच्छ... O
[10] मध्ये तु वागीश्यै] em.; म... ... वतीश N, ...ध्ये तु व... O
[11] शिवाय च] Npc; शिवायय च Nac, शिवाय O
[12] पूर्वादिदशपत्रेषु] em.; पूर्वा...शपत्रेषु N, पूर्वादि...शपत्रेषु O
[13] जयाद्यष्टादशार्चयेत्] O; जयाद्य...शार्चयेत् N

तत्तन्नाम्ना चतुर्थ्यन्तं प्रत्येकमथवेति[१] च।
संक्षेपे समुदितरूपेण सम्पूज्य[२] तदनु हृद्यञ्जलिकरः सन्,

[२०.२. गुरुपूजनम्]

सकलाज्ञानघं[३] विश्वविज्ञानप्रदमीश्वरम्॥ ९२॥
विद्यापीठस्थमादृत्य[४] मनोवाग्विग्रहैर्नमः।
अथाग्नेय्यां तु[५] गुर्वर्चा षडुत्थासनमध्यतः[६]॥ ९३॥
स्वगुरोर्मूर्तिमभ्यर्च्य[७] तस्मिन्नावाहयेच्छिवम्[८]।

[२०.२.१. स्तोत्रैः पूजनम्]

गन्धादिभिरलंकृत्य[९] शिवं सम्पूज्य साञ्जलिः[१०]॥ ९४॥
शिवागमपुराणोक्तिपञ्चाङ्गपठनादिभिः[११]।

---

[१] प्रत्येकमथवेति] em.; प्रत्येकमयिपेति N, प्र...कमथवेति O
[२] समुदितरूपेण सम्पूज्य] N; स...दितर...पे... म्पूज्य O
[३] सकलाज्ञानाघं] O; स...लाज्ञानाघं N
[४] °मादृत्य] em.; °माहृत्य N, O
[५] अथाग्नेय्यां तु] em.; अथा... N, अ...ग्नेयां तु O
[६] गुर्वर्चा षडुत्थासनमध्यतः] em.; गर्वच्चष ...सनमध्य... N, ...र्वर्चाषदुर्थासनमध्यतः O
[७] स्वगुरोर्मुक्तिमभ्यर्च्य] em.; स्वगुरो...मभ्यर्च्य N, ...गुरोर्मुक्ति... O
[८] तस्मिन्नावाहयेच्छिवम्] em.; तस्मिन्नावाहये...वः N, तां...न्नावाहये...वम् O
[९] गन्धादिरलंकृत्य] O; ग...लंकृत्य N
[१०] शिवं सम्पूज्य साञ्जलिः] conj.; अथ श्रीपुष्पाञ्जलिभिः शिवं सम्पूज्य साञ्जलिः N, O
[११] शिवागमपुराणोक्तिपञ्चाङ्गपठना°] conj.; शिवां पूरणे...ञ्चाङ्ग...° N, शिवां पुरणोक्तिपञ्चाङ्गपनो° O

संस्कृतैश्चाथ[1] तेवारैः स्तोत्रैर्नानाविधैः[2] शुभैः।
भक्त्या स्तुत्वा[3] महादेवमथोत्थायासनात्स्वयम्[4] ॥ ९५ ॥

[२०.२.२. नमनादि]

त्रिः प्रदक्षिणमाक्रम्य[5] साष्टाङ्गं दण्डवन्नमेत्[6]।
पश्चादुत्थाय सम्प्रार्थ्य[7] शिवं विज्ञापयेदिति ॥ ९६ ॥

[२१. अग्निकार्यम्]

[२१.१.अग्निकार्यप्रतिज्ञा]

अग्निकार्यं करिष्येऽहमस्मिन्नवसरे[8] शिव[9]।
प्रसीद मम शम्भो श्रीप्राप्तये[10] तृप्यतेऽनलः[11] ॥ ९७ ॥

---

[1] संस्कृतैश्चाथ] em.; संकस्कृतैश्च N, संस्कृतैश्च O

[2] तेवारैः स्तोत्रैर्नानाविधैः] em.; तेवारैः स्तोत्रै...ान...धैः N, त...ः ...तोत्रेर्ना...वि...ः O

[3] भक्त्या स्तुत्वा] N; भ... ...त्वा O

[4] ०मथोत्थायासनात्स्वयम्] em.; ०मथोर्त्थाया...नात्स्वयम् N, ०मथोर्त्थायासनात्स्वयम् O

[5] प्रदक्षिणमाक्रम्य] conj. ; प्र... णम...म्य N, प्रदक्षिणमानम्य O

[6] साष्टाङ्गं दण्डवन्नमेत्] O; स...ङ्ग दण...वन्नमे... N

[7] पश्चादुत्थाय सम्प्रार्थ्य] O; ...श्चादुत्था... सम्प्रा... N

[8] करिष्येऽहमस्मिन्नवसरे] em.; करिष्यऽहमस्मिन्न...स... N, करि...ऽहमस्मि...व...रे O

[9] शिव] em.; शिवः N, O

[10] श्रीप्राप्तये] Npc, O; ...प्राप्तते Nac

[11] तृप्यतेऽनलः] O; ...तऽन... N

[२१.२. अग्निकार्यनिर्वर्तनम्]

तदनु वक्ष्यमाणप्रकारेण[1] वह्निकार्याधिकारी[2] तदुक्तविधिना तत्र वा। तत्र चेत्पूर्वास्यस्सन् तदन्यत्र चेदुत्तराभिमुखस्सन्[3]– साङ्गमग्निकार्यं[4] निर्वर्त्य तत्फलं शम्भवे समर्प्य शिवं सन्तोषयित्वा[5] शिवपूजां समापयेत्।

[२१.३. शिवाय पूजाहोमादिपुण्यसमर्पणम्]

अथवानधिकार्यस्य वह्निकार्यस्य पूजकः।
यजेत कुसुमैः[6] शम्भुमग्निकार्यार्थमादरात्[7] ॥ ९८ ॥
न करोत्यधिकारी[8] चेद्धोमसंख्यादशांशतः[9]।
जप्त्वा दद्याच्छिवायाथ हुतञ्चेदथवा[10] तदा ॥ ९९ ॥

[1] वक्ष्यमाणप्रकारेण] O; ...माणप्र...रेण N
[2] वह्निकार्याधिकारी] Opc; ...ह्निकार्यादधिकारी N, वह्निकार्यादधिकारी Oac
[3] चेदुत्तराभिमुखस्सन्] em.; च...त्तराभि...ख...न् N चदुत्तरा...मु...स्स... O
[4] साङ्गमग्निकार्यं] em.; साङ्गमग्निक... N, स्थाङ्गम...कार्य O
[5] सन्तोषयित्वा] O; सन्तो...I N
[6] यजेत कुसुमैः] conj.; यजेसु... N, यजेसुमैश् O
[7] शम्भुमग्निकार्यार्थमादरात्] em.; ...मग्निकार्या...दरात् N, शम्भुम...कार्यार्थमा...त् O
[8] करोत्यधिकारी] O; ...रा...धि...ारि N
[9] °दशांशतः] O; °...शतः N
[10] हुतञ्चेदथवा] N; हुतञ्चे...थवा O

गुरुः शिवान्तिकं[१] गत्वा[२] समासीनस्ततः[३] परम्।
तद्धोमफलमीशाय[४] दातव्यं[५] तद्यथोच्यते ॥ १०० ॥
यत्कृतं यत्करिष्यामि[६] तत्सर्वं सुकृतं तव।
विश्वगोप्ता त्वमेवासि नान्यो[७] नाथो हि मे शिव[८] ॥ १०१ ॥

तथान्यत्र -

पूजाहोमाग्निकार्याद्यैः[९] सुकृतं यन्मया कृतम्।
तत्फलं परमेशान मया[१०] तुभ्यं[११] समर्पितम् ॥ १०२ ॥

---

101. This ritual formula occurs almost identically elsewhere, e.g. on p. 129 of *Aghoraśiva's Kriyākramadyotikā*.

---

[१] गुरुः शिवान्तिकं] O; गुरुः ...न्तिकं N

[२] गत्वा] em.; ग...। N, ...त्वा O

[३] समासीनस्ततः] O; समवा...स्ततः N

[४] तद्धोमफलमीशाय] em.; त...ोमफल...ीशाय N, तद्धो...फलमीशाय O

[५] दातव्यं] N; द...व्यं O

[६] यत्करिष्यामि] em.; यः करिष्यामि N, O

[७] त्वमेवासि नान्यो] O; ...मवासि...न्या N

[८] शिव] em.; शिवः N, O

[९] °ग्निकार्याद्यैः] em.; °ग्नि...र्याद्यै N, °ग्निका...द्यै O

[१०] परमेशान मया] O; पर...न म... N

[११] तुभ्यं] em.; तु... N, O

तद्गृहाण स्वयं[1] प्रीत्या[2] भुक्तिमुक्त्यर्थमस्तु[3] मे ।
इति[4] श्लोकत्रयं सार्धं पठित्वा सजलं सुमम् ॥ १०३ ॥
पूजाहोमादिजं[5] पुण्यं मूलेनोद्भवमुद्रया[6] ।
भूमिष्ठदक्षजानुस्सन्[7] शिवसव्यकरेऽर्पयेत्[8] ॥ १०४ ॥

[२२. विसर्जनम्]

[२२.१. अष्टपुष्पिकादानम्]

अथाष्टपुष्पैरभ्यर्च्य[9] सद्य आद्यैश्च[10] मूलतः ।
पराङ्मुखार्घ्य[11] स्वाहेति साङ्गाय[12] सह मूलतः ॥ १०५ ॥

102-103b. Cf. *Jñānaratnāvalī*, GOML MS. R 14898, p. 135. Also *Śaivabhūṣaṇa*, p. 56.
103. The three and half verses are presumably 4:96 and 4:100-102b.

---

[1] तद्गृहाण स्वयं] O; ...द्ग्रहण... N
[2] प्रीत्या] em.; ...। N, ...त्या O
[3] ०मुक्त्यर्थमस्तु] O; ०मुक्त्य...स्तु N
[4] इति] N; ...ति O
[5] पूजाहोमादिजं] O; पूजाहो...जं N
[6] मूलेनोद्भवमुद्रया] em.; मूले...द्भव...द्रया N, मूलेनोद्भव...द्रया O
[7] भुमिष्ठदक्षजानुस्सन्] em.; भुमि...दक्ष...स... N, भुमिष्ठदक्षजानुस्स... O
[8] शिवसव्यकरेऽर्पयेत्] O; ...वसव्यकरेऽर्प... N
[9] अथाष्टपुष्पै०] em.; ...थाष्टपुष्पै० N, अथा...पुष्पै० O
[10] आद्यैश्च] O; कृद्यैश्च N
[11] पराङ्मुखार्घ्यं] O; पराङ्मु... N
[12] स्वाहेति साङ्गाय] O; सा... ...ङ्गाय N

दद्यादावृतिकाम्यार्थदेवानां च[१] पराङ्मुखम्[२]।

अर्थेऽस्मिन् लिख्यतेऽस्माभिरंशुमद्वचनं[३] परम्[४] ॥ १०६ ॥

[२२.२. लयाङ्गपूजनं पराङ्मुखार्घ्यं च]

अंशुमति -

{{लयाङ्गयजनं कृत्वा पराङ्मुखार्घ्यं ददेद्बुधः।

सद्यादीशान्तमभ्यर्च्य व्युत्क्रमेणैव योजयेत्॥ १०७॥

सद्यो वाममघोरं च पुरुषैशानकं क्रमात्।

अस्त्रादि हृदयान्तां चाङ्गान्यङ्गे तु योजयेत्॥ १०८॥

चतुर्दिक्ष्वस्त्रमभ्यर्च्य सोमादीन्द्रान्तमेव च।

नेत्रमग्रे समभ्यर्च्य कवचं वायुदेशके॥ १०९॥

नैर्ऋते च शिखां चैव शिरस्त्वीशानदेशके।

आग्नेय्यां हृदयं चैव अर्चयेत्तु लयाङ्गकम्॥ ११०॥}}

†...†

107-110. Quotation supplied from *Ātmārthapūjāpaddhati*, T. 55, p. 544. Perhaps the trigger for an eyeskip was the repetition of the attribution *Aṃśumati* before what is now verse 111. The lines above are supplied from *Ātmārthapūjāpaddhati*, T. 323, pp. 297-298.

[१] दद्यादावृतिकाम्यार्थदेवानां च] conj.; ...दावृतिका...र्थ देवा... N, दद्यादावृतिकात्यार्थदेवानां च O

[२] पराङ्मुखम्] em.; प...ङ्मुखम् N, पर...खम् O

[३] लिख्यतेऽस्माभि॰] em.; लिख्य...ऽस्माभि॰ N, लख्यतेऽस्म...॰ O

[४] परम्] O; ...रम् N

अंशुमति –

दक्षिणं मणिबन्धं[१] च वामहस्तं तथैव[२] च।
मध्यमादि त्रयं तत्तन्मूलमध्ये[३] तु योजयेत्॥ १११॥
अङ्गुष्ठतर्जनीयुक्तं पुष्पत्रयविसर्जनम्[४]।
तत्पुष्पं वर्जयित्वा[५] तु निरोधाह्वयमुद्रया[६]।
†एवं विसर्जनी मुद्रा शिरस्यञ्जलिमाचरेत्† ॥ ११२॥

सुप्रभेदे –

कृत्वाञ्जलिं[७] कराभ्यां[८] तदङ्गुष्ठानामिकाग्रतः[९]।

111-112. Quoted from *Aṃśumat*, T. 273, pp. 98–99. Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 547:
दक्षिणे मणिबन्धश्च वामहस्तं तदूर्ध्वतः। मध्यमादि त्रयङ्गुल्यं तलमध्ये तु योजयेत्॥
अङ्गुष्ठतर्जनीयुक्तं पुष्पत्रयं विवर्जयेत्। तत्पुष्पं वर्जयित्वा तु निरोधेन तु मुद्रया॥
एवं विसर्जनीमुद्रा शिरस्यञ्जलिमाचरेत्।

---

[१] दक्षिणं मणिवन्धं] O; ...क्षिणं ...न्धं N

[२] वामहस्तं तथैव] em.; ...हस्त ...व N, वामहस्त ...थैव O

[३] तत्तन्मूलमध्ये] em.; ...त्तन्मू...ध्ये N, तत्तमूलमध्ये O

[४] पुष्पत्रयविसर्जनम्] em.; ...ष्प...य...सर्जन N, पुष्पत्रयवि...नम् O

[५] वर्जयित्वा] N; ...ज... O

[६] निरोधाह्वयमुद्रया] em.; निराधाह्वय...या N, ...रोधा...मु...या O

[७] कृत्वाञ्जलिं] em.; कृत्वाञ्जलि N, O

[८] कृत्वाञ्जलिकराभ्यां] em.; कृ...I...लकरभ्यां N, कृत्वाञ्जलिक...भ्यां O

[९] तदङ्गुष्ठानामिकाग्रतः] O; तदङ्गुष्ठानाा...ाग्रत N

प्रसारयेत्ततः[1] शेषान् मुद्रेयं दिव्यरूपिणी[2] ॥ ११३ ॥

कामिके –

संहारमुद्रयास्त्रेण[3] देवानावरणस्थितान्[4] ।
समस्तानर्चितान्देवांस्तान् लिङ्गे[5] सह योजयेत्[6] ।
आसनार्चितमन्त्रांस्तु पीठेनैव तु[7] योजयेत् ॥ ११४ ॥

कालोत्तरे –

विद्युद्वदुत्थितान्[8] ध्यायेत्स्वस्वस्थाने[9] लयङ्गतान् ।

---

113. Quoted from *Suprabheda*, *kriyāpāda*, 9:15:

कृत्वाञ्जलिं कराभ्यान्तु अङ्गुष्ठानामिकान्वितम्। प्रसारयेत्ततश्शेषान्मुद्रेयं द्रव्यरूपिणी॥

114ab. Quoted from *Pūrva-Kāmika*, 4:518cd: संहारमुद्रयास्त्रेण देवानावरणस्थितान्।

115ab. Untraced in the *Kālottara*. But quoted with attribution to the *Kālottara* in the *Prabhāvyākhyā* on the *Kriyākramadyotikā* (p. 130) and also in the *Ātmārthapūjā-paddhati*, T. 55, p. 548, in this form:

विद्युद्वदुत्थितान् ध्यात्वा स्वस्वस्थाने लयङ्गतान्।

---

[1] प्रसारयेत्ततः] O; प्र...रयेत्ततः N

[2] दिव्यरूपिणी] O; दिव्यरू... N

[3] संहारमुद्रयास्त्रेण] N; ...हार...यास्त्र... O

[4] देवानावरणस्थितान्] em.; दवाना...रणस्थितान् N, देवाना...र...स्थितान् O

[5] समस्तानर्चितान्देवांस्तान् लिङ्गे] O; सम...नर्चितान्देवा...न् लि... N

[6] योजयेत्] O; योजयोजयेत् N

[7] पीठेनैव तु] O; पी... N

[8] विद्युद्वदुत्थितान्] em.; विद्यद्वदुत्थितां N, ...द्वदुत्थि... O

[9] ध्यायेत्स्वस्वस्थाने] conj.; ध्यायेत्स्व...स्थाने N ...येत्स्वससाने O

इत्यादिवचनार्थज्ञः[१] पश्चान्नत्यन्तमूलतः[२] ॥ ११५ ॥

शिवं सम्पूज्य शस्त्रेण रक्षां[३] वर्मावकुण्ठनम् ।

कृत्वा वौषड्युजः[४] शक्तिमन्त्राद्धेनुं[५] प्रदर्श्य तु ॥ ११६ ॥

न्यूनं[६] वाप्यधिकं वापि[७] यन्मया मोहतः[८] कृतम् ।

सर्वं तदस्तु सम्पूर्णं[९] त्वत्प्रसादात्प्रभो[१०] मम ॥ ११७ ॥ ॥

[२२.२.१. क्षमाप्रार्थना]

अपराधसहस्राणि[११] क्रियन्तेऽहर्निशं[१२] मया ।

116cd. Perhaps *Saundaranātha* is using शक्तिमन्त्रात् as though it were equivalent to शक्तिमन्त्रतः and therefore with the sense of the instrumental. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 549: वौषडन्त शक्तिमन्त्रेण धेनुमुद्रा प्रदर्श्यो ।

---

[१] इत्यादिवचनार्थज्ञः] em.; ...त्यादिव...थज्ञः N, ...ादिवचनार्थज्ञः O

[२] पश्चान्नत्यन्तमूलतः] O; ...न्नत्यन्तमू...तः N

[३] शिवं सम्पूज्य शस्त्रेण रक्षां वर्मावकुण्ठनम्] O; ...वं सं...ज्य ...ण रक्षां N

[४] वौषड्युजः] em.; ...षडजः N, वौषस्युजः O

[५] शक्तिमन्त्राद्धेनुं] conj.; शक्तिः म... N, शक्तिमन्त्रार्धेनुं O

[६] न्यूनं] em.; ... N, न्यू... O

[७] वापि] em.; वाप N, वपि O

[८] मोहतः] O; ...तः N

[९] सम्पूर्णं] em.; स... N, सम्पूर्ण O

[१०] त्वत्प्रसादात्प्रभो] O; ...सादात्प्रभो N

[११] अपराधसहस्राणि] O; अपरा...स्रा... N

[१२] क्रियन्तेऽहर्निशं] em.; ...न्तेऽहर्णि... N, क्रियन्तेऽहर्णिशं O

दासोऽहमिति[१] मां मत्वा[२] क्षमस्व परमेश्वर[३] ॥ ११८ ॥

स्वामिन् क्षुद्रेण[४] दासेन मलीमसधिया[५] मया ।

कदर्थितोऽसि यद्भक्तिलेशात्प्रीतः क्षमस्व[६] तत् ।

इत्युक्त्वा दासभावेन पश्चादुद्वासयेद्यथा[७] ॥ ११९ ॥

कामिके[८] -

चललिङ्गे[९] तु सापेक्षोऽनापेक्षः[१०] स्थण्डिलादिषु[११] ।

118-119. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 549. Almost the same formulaic lines occur on p. 105 of the *Śivāranacandrikā*.

120. Quoted from *Pūrva-Kāmika*, 4:522:

चललिङ्गेऽपि सापेक्षो नपेक्षस्स्थण्डिले सदा । सर्वत्राप्यनपेक्षस्तु प्रत्यहं तु विधीयते ॥

Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 550:

चललिङ्गे तु सापेक्षोऽनापेक्षः स्थण्डिलादिषु । सर्वत्र वानपेक्षस्तु प्रत्यहं विहितो यतः ॥

---

[१] दासोऽहमिति] O; दासाऽह...त N

[२] मत्वा] em.; म... N, मत्व O

[३] परमेश्वर] em.; ...रमेश्व... N, पर..श्वर O

[४] क्षुद्रेण] em.; ...द्र... N, ...द्रेण O

[५] दासेन मलीमसधिया] N; दासे... ...लीम...धिया O

[६] कदर्थितोसियद्भक्तिलेशात्प्रीतः क्षमस्व] O; कदर्थि...ोसियद्भतिलेशात...त क्ष... N

[७] दासभावेन पश्चादुद्वासयेद्यथा] N; ...स...वे... ...श्चादुद्वास...था O

[८] कामिके] O; कामक N

[९] चललिङ्गे] em.; ...ललिङ्गे N, ...ललि.. O

[१०] सापेक्षोऽनापेक्षः] conj.; सापेक्षं नापे... N, O

[११] स्थण्डिलादिषु] em.; ...ण्डिलादिषु N, स्थ...ादि... O

सर्वत्र[१] वानपेक्षस्तु[२] प्रत्यहं[३] विहितो[४] यतः ॥ १२० ॥

विसर्जनं[५] तु सर्वत्र कार्यं प्रोक्तेन वर्त्मना[६] ।

इत्यादिवचसां[७] मध्ये पुरोक्तांशुमदुक्तितः[८] ॥ १२१ ॥

द्विहस्तोद्वासमुद्राभ्यां क्षिप्त्वा[९] मूर्तौ सुमद्वयम्[१०] ।

मस्तकेऽञ्जलिमाबध्य[११] दद्यादर्घ्यं पराङ्मुखम्[१२] ॥ १२२ ॥

[२२.३. पराङ्मुखार्घ्योद्वासनम्]

अथवा दिव्यमुद्राभ्यां[१३] क्षिप्त्वा मूर्तौ सुमद्वयम्[१४] ।

---

[१] सर्वत्र] em.; स... N, सर्व... O

[२] वानपेक्षस्तु] conj.; चानपेक्षातः N, O

[३] प्रत्यहं] O; प्रत्य... N

[४] विहितो] conj.; सहितो N, O

[५] विसर्जनं] em.; ...सर्जनं N, विसर्ज... O

[६] वर्त्मना] N; वत्मना O

[७] इत्यादि॰] O; इ...ादि॰ N

[८] पुरोक्तांशुमदुक्तितः] em.; पुरोक्तांशु...दुतित N, पुरो...ांशम...क्तितः O

[९] द्विहस्तोद्वासमुद्राभ्यां क्षिप्त्वा] O; ...स्तद्व समुद्राभ्यां ि...पा N

[१०] मूर्तौ सुमद्वयम्] em.; द्वुक्त ...मद्वय... N, मूक्तौ सुम...यम् O

[११] मस्तकेऽञ्जलिमाबध्य] em.; ...ञ्जलिमाबध्य N, मस्तकाञ्जलिमा...ध्य O

[१२] पराङ्मुखम्] O; ...राङ्मुखम् N

[१३] दिव्यमुद्राभ्यां] O; दिव्य...ुद्राभ्यां N

[१४] मूर्तौ सुमद्वयम्] em.; ..ूतौ स...म् N, मूतो ...यम् O

मस्तकाञ्जलिमाबध्य[१] दद्यादर्घ्यं[२] पराङ्मुखम् ॥ १२३ ॥

तद्यथादाय[३] सामान्यपात्रं[४] हस्ते तदम्भसा[५] ।

पराङ्मुखार्घ्यं[६] स्वाहेति[७] गुर्वादीनां प्रदाय[८] च ॥ १२४ ॥

पश्चादुद्वास्य गुर्वादीन्मन्त्रान्संहारमुद्रया[९] ।

[२२.४. पेट्यां परिवारदेवानां प्रवेशनम्]

कृत्वान्तःस्थानथो[१०] पेट्यां परिवारान्[११] प्रवेशयेत् ॥ १२५ ॥

123-125. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 551:

ततः स्वगुरुविद्यापीठसप्तगुरुमहालक्ष्मीं गणपतिद्वारपालांश्चार्चयित्वा तेषां पराङ्मुखार्घ्यं दत्त्वा स्वस्वमन्त्रेण संहारमुद्रयात्मनि विसर्जयेत्। तथा रामनाथपद्धत्यां–

सामान्यार्घ्यं गृहीत्वा तु गुर्वादीनां पराङ्मुखम्।

संहारमुद्रयात्मस्थ कृत्वार्घ्याण्युपसंहरेत् ॥

गणेश्वरादिक्षेत्रपालान्तवेराणां पराङ्मुखार्घ्यं दत्त्वा समन्त्रेण प्रत्येकं वस्त्रमाच्छाद्य पेटकस्य पार्श्वेऽस्त्रेण निवेशयेत्।

---

[१] मस्तकाञ्जलिमाबध्य] em.; ...त...लिमावध्य N, मस्तकाञ्ज...मावध्य O

[२] दद्यादर्घ्यं] O; दद्या...र्घ्यं N

[३] तद्यथादाय] em.; ...था... N, ...दाय O

[४] सामान्यपात्रं] N; सामान्य...त्र O

[५] तदम्भसा] em.; ...भसा N, तदम्भस O

[६] पराङ्मुखार्घ्यं] Npc, O; परा...मुखामुखर्घ्यं Nac

[७] स्वाहेति] em.; स्वाह... N, स्वाहे... O

[८] प्रदाय] Opc; ...य N, प्राय Oac

[९] गुर्वादीन्मन्त्रान्संहारमुद्रया] O; गु...न्त्रान्संहारमुद्र... N

[१०] कृत्वान्तःस्थानथो] conj.; कृत्वान्तस्थानयो N, O

[११] कृत्वान्तस्थानयो पेट्यां परिवारान्] O; ...न्तस्थानयो पेन्यां ...रिवारा... N

कथं प्रक्षाल्य[1] हस्तौ संमृज्य तौ हेतितः[2] पुनः ।
प्रत्येकं तु[3] समादाय सर्वबेरं सपुष्पकम्[4] ॥ १२६ ॥
वस्त्रेण वर्मणाच्छाद्य[5] पेटिकापार्श्वतो न्यसेत् ।
गजास्यादि यथान्यायं पश्चाद्देवं तु मध्यतः[6] ॥ १२७ ॥

अंशुमति –

शिवमन्त्रमनुस्मृत्य लिङ्गं सङ्गृह्य[7] देशिकः ।
चित्रवस्त्रेण संवेष्ट्य पेटिकामध्यमे[8] न्यसेत् ॥ १२८ ॥
अपिधानं तु संयोज्य भीमरुद्रं[9] स्मरेत्तदा ।
इति कृत्वाथ पूर्वास्यो[10] लिखेद्देशे तु मण्डलम्[11] ॥ १२९ ॥

128–129b. Quoted from *Aṃśumat*, T. 273, p. 99. Cf. also *Ātmārthapūjāpaddhati*, T. 55, p. 553, where these lines are quoted with the same attribution.

---

[1] कथं प्रक्षाल्य] em.; ...थं प्रक्षल N, ...थ ...क्षाल्य O

[2] हेतितः] em.; हेतितं N, O

[3] प्रत्येकं तु] O; प्र...कं ... N

[4] सर्ववेरं सपुष्पकम्] O; सव... ...ष्पकम् N

[5] वस्त्रेण वर्मणाच्छाद्य] O; वस्त्रे... वर्मणा...द्य N

[6] पश्चाद्देवं तु मध्यतः] em.; ...द्दे... तु ...ध्यतः N, प...द्देवं तु म...: O

[7] शिवमन्त्रमनुस्मृत्य लिङ्गं सङ्गृह्य] O; शि...मनुस्मृत्य लि... ... N

[8] पेटिकामध्यमे] O; ...कामध्यमे N

[9] संयोज्य भीमरुद्रं] O; सयो... ...मरुद्रं N

[10] पूर्वास्यो] em.; पूव...ो N, ...स्यो O

[11] तु मण्डलम्] em.; ... म...लम् N, तु ...म् O

[२३. पूजासमापनम्]

[२३.१. चण्डपूजा]

अंशुमति[1] -

आत्मार्थयजनान्ते तु सन्ध्यां प्रति विशेषतः ।
देवस्येशानदिग्भागे[2] गोमयालिप्तभूतले[3] ॥ १३० ॥
टङ्काभमर्धचन्द्राभं लिखेच्चण्डस्य मन्त्रतः[4] ।
धुनिचण्डेश्वरायेति[5] हुंफडन्तेन[6] मन्त्रवित्[7] ॥ १३१ ॥
इत्युक्त्या स्वस्य वामे तु[8] लिखेदर्धेन्दुमण्डलम्[9] ।
तत्र चण्डेश्वरार्चायै षडुत्थासनमर्चयेत्[10] ॥ १३२ ॥

130-131. Untraced in the *Aṃśumat*. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 557, where these lines are quoted with the same attribution.

130ab. For धुनि० see Who is Caṇḍeśa?, by Goodall 2009, p. 351, in Genesis and Development of Tantrism, edited by Shingo Einoo.

---

[1] अंशुमति] conj.; अं...म... N, ...शुमतिः O

[2] देवस्येशानदिग्भागे] O; देवस्येश...भाग N

[3] ०भूतले] em.; ०भूतल N, ०भूत...े O

[4] लिखेच्चण्डस्य मन्त्रतः] em.; लिखच्चण्डस ...न्त्रतः N, लि...च्चण्डस्य ...त्र...ः O

[5] धुनिचण्डेश्वरायेति] O; ...श्वरायेति N

[6] हुं फडन्तेन] N; ...डन्ते... O

[7] मन्त्रवित्] em.; म... N, मन्त्रवि... O

[8] वामे तु] O; वमे तु N

[9] लिखेदर्धेन्दुमण्डलम्] em.; ...खेद...ें तु ...ण्डलम् N, लिखेदर्धेन्तुमण्डलम् O

[10] षडुत्थासनमर्चयेत्] O; षडु...सनम...त् N

तद्रुपरि ओं धुनिचण्डासनाय[1] हुंफण्णमः[2]। तदुपरि ओं धुनिचण्डेश्वर-मूर्त्तये[3] हुं फण्णमः इति धुनिचण्डमूर्तिं[4] सम्पूज्य।

[२३.२. चण्डध्यानम्]

तद्ध्यानम् –

रुद्रकोपाग्निसम्भूतं चण्डं[5] कज्जलसन्निभम्।
शूलटङ्कधरं रौद्रं साक्षसूत्रकमण्डलुम्[6] ॥ १३३ ॥
व्यालयज्ञोपवीताढ्यं[7] चतुर्वक्रं चतुर्भुजम्।
मुखोद्गीर्णमहाज्वालारक्तं[8] द्वादशलोचनम्[9] ॥ १३४ ॥

133-135. Cf. *Somaśambhupaddhati* I, 5:2-4.

रुद्राग्निप्रभवं चण्डं कज्जलभं भयानकम्। शूलटङ्कधरं रौद्रं चतुर्वक्त्रं चतुर्भुजम्॥
मुखोद्गीर्णमहाज्वालं रक्तद्वादशलोचनम्। जटामकुटखण्डेन्दुमण्डितं फणिकङ्कणम्॥
व्यालयज्ञोपवीतं च साक्षसूत्रकमण्डलुम्। श्वेतपद्मासनासीनं भक्तिप्रह्वार्तिनाशनम्॥

---

[1] तदुपरि ओ धुनि॰] O; ओं धनि॰ N

[2] हुंफण्णमः] em.; हुंफ...मः N, हुं...म O

[3] धुनिचण्डेश्वरमूर्त्तये] em; ...वनिचण्डे...रम...ये N, ध्वनिच...डे...वरमूर्त्तये O

[4] धुनि॰] em.; ध्वनि॰ N, O

[5] रुद्रकोपाग्निसम्भूतं चण्डं] O; ...कोपा...म्भू... च... N

[6] साक्षसूत्रकमण्डलुम्] em.; साक्षसूत्र...म् N, साक्षिसूत्रकमण्डलुम् O

[7] व्यालयज्ञोपवीताढ्यं] em.; ...लयज्ञोपवीताढ्यं N, ...यज्ञो...वीता... O

[8] मुखोद्गीर्णमहाज्वालारक्तं] em.; मुखोद्गीणमहाज्व...क्त N, मुखोद्गीर्णमहात्वालाररक्तं O

[9] द्वादशलोचनम्] O; ...लाचनम् N

जटामकुटखण्डेन्दुमण्डितं[१] फणिकङ्कणम्[२] ।

श्वेतपद्मासनासीनं[३] भक्तिप्रह्वार्तिनाशनम्[४] ॥ १३५ ॥

यद्वा अंशुमति -

द्विनेत्रं द्विभुजं[५] चैकवक्त्रं विशदवाससम्[६] ।

प्रलम्बमानदक्षाङ्घ्रिं शयनान्यपदान्वितम्[७] ॥ १३६ ॥

जानूर्ध्वविलसत्पाणिं[८] सव्यहस्तेन टङ्कधृक्[९] ।

136-137. Quoted from *Aṃśumat*, where the text reads thus in T. 273, pp. 99-100:

द्विनेत्रं चतुर्भुजश्चैव शुक्लवस्त्रसमन्वितम् । जटामकुटसंयुक्तं चन्द्रार्धकृतशेखरम् ॥

लम्बितं दक्षिणं पादं शयितं वामपादकम् । जानूर्ध्वे वामहस्तन्तु सव्यहस्तन्तु गानधृक् ॥

Cf. *Ātmārthapūjāpaddhati*, T. 55, pp. 616-617 (quotation without attribution):

द्विनेत्रं द्विभुजं चैव शुक्लवस्त्रसुधारिणम् । जटामकुटसंयुक्तं शश्यर्धकृतशेखरम् ॥

लम्बितं दक्षिणं पादं शयनं वामपादकम् । जानूर्ध्वौ वामपादं तु सव्यहस्तं तु टङ्कधृक् ॥

पीठादिचण्डपर्यन्तं सेवां कुर्याच्चु देशिकम् ।

---

[१] जटामकुटखण्डेन्दुमण्डितं] em.; ज...मकुटख...न्दुम... N, जटामकुटाखण्डेन्दुमण्डितं O

[२] फणिकङ्कणम्] O; ...णिकङ्कणम् N

[३] श्वेतपद्मा०] O; शे...पद्मा० N

[४] भक्तिप्रह्वार्तिनाशनम्] em.; भतिप्रह्वार्त्ति...शनम् N, भक्तिप्रह्वा...शनम् O

[५] द्विभुजं] em.; ... N, चतुर्भुजं O

[६] विशदवाससम्] Opc; ...दवा...सम् N, विंशदस्ववाससम् Oac

[७] शयनान्य०] O; ...नान्य० N

[८] जानूर्ध्वविलसत्पाणिं] O; ज...ल...त्पणिं N

[९] सव्यहस्तेन टङ्कधृक्] em.; सव्यस्तेन टङ्कगं N, हव्यहस्तेन टङ्कगं O

हृदञ्जलिकरं वाथ ध्यायेच्चण्डेश्वरं[1] त्विति ॥ १३७ ॥

इति ध्यात्वा समावाह्य धुनिचण्डेश्वरं यजेत्।

[२३.३. चण्डेश्वरमन्त्राः]

धुनिचण्डेश्वराय हुं फट् स्वाहा इति मूलतः ॥ १३८ ॥

इत्यनेनावाहनस्थापनसन्निधानसन्निरोधनानि[2] विधाय। ओं चां चण्ड-हृदयाय[3] हुं फण्णमः। ओं चीं चण्डशिरसे[4] हुं फण्णमः[5]। ओं चूं चण्डशिखायै हुं[6] फण्णमः। ओं चैं चण्डकवचाय हुं फण्णमः[7]। ओं चौं[8] चण्डनेत्रेभ्यो हुं फण्णमः। ओं चं चण्डास्त्राय हुं फण्णमः[9]। इति षडङ्गन्यासं[10] विधाय पूर्तिं विधाय[11] हृदा धेनुमुद्रयामृतीकृत्य[12] ततः तस्मै हृदा धूपदीपौ दत्वा अथवा

---

[1] वाथ ध्यायेच्चण्डेश्वरं] em.; ......येच्चण्डेश्वरं N, वा... ...येच्चण्डे...रं O

[2] इत्यनेनावाहनस्थापनसन्निधानसन्निरोधनानि] O; इत्यनेना...ाहनस्थपनस...धा...धनानि N

[3] चण्डहृदयाय] em.; ...दयाय N, चण्डहृ... O

[4] चण्डशिरसे] em.; चण्डशि... N, ...शिरसे O

[5] फण्णमः] O; फ... N

[6] ०शिखायै हुं] O; ०शिखाय ... N

[7] चण्डकवचाय हुं फण्णमः] O; चण्डक... हुं फ ...मः N

[8] चौं] em.; omits N, O

[9] चण्डास्त्राय हुं फण्णमः] em.; च...त्राय हुं ...ण्ण ...: N, चण्डास्त्रा... हुं फ ...मः O

[10] षडङ्गन्यासं] em.; ष...ङ्गन्यासं N, ...ङ्गन्यासं O

[11] पूर्तिं विधाय] em.; पूत वि...ाय N, पू... ...वा... O

[12] धेनुमुद्रायामृतीकृत्य] O; धेनु...ती... N

आसनमूर्तिमूलैरभ्यर्च्य तदथो[१] शिवनिर्माल्यभूताः[२] पुष्पेण्डामालिकाः समर्प्य[३] तदनु शिवनिवेदितान्नादिपानीयताम्बूलं निवेदयेत्।

[२३.४. निर्माल्यार्पणम्]

लेह्यचोष्यान्नपानादि ताम्बूलं[४] स्रग्विलेपनम्[५]।
निर्माल्यभोजनं तुभ्यं प्रदत्तं तु शिवाज्ञया[६] ॥ १३९ ॥
इत्युक्त्वा धुनिचण्डाय[७] दद्याच्छिवनिवेदितम्[८]।

[२३.५. क्षमाप्रार्थना]

सर्वमेतत्क्रियाकाण्डं[९] मया चण्ड तवाज्ञया ॥ १४० ॥
न्यूनाधिकं[१०] कृतं मोहात्परिपूर्णं तदस्तु[११] मे।

---

139. Cf. *Somaśambhupaddhati* I, 5:7. KSTS 297c-298b. Also *Aṃśumat*, T 273, p. 100.
140c-141b. Cf. *Somaśambhupaddhati* I, 5:8. Also *Aṃśumat*, T 273, p. 100.

---

[१] आसनमूर्तिमूलैरभ्यर्च्य तदथो] O; आ...नमूर्तिमूलैर...र्च्य ...थो N

[२] ०भूताः] em.; ०भूतः N, O

[३] पुष्पेण्डामालिकाः समर्प्य] em.; पुष्पेण्यामालिकाः स...प N, पुष्पेण्यामालिकाः स...प्य O

[४] ०चोष्यान्नपानादिताम्बूलं] em.; ...ष्यान्न...ानादिताम्बूलं N, ०शोष्यान्नपानादिताम्बूलं O

[५] स्रग्वि०] em.; सृग्वि० N, O

[६] प्रदत्तं तु शिवाज्ञया] O; प्रद... तु ...या N

[७] इत्युक्त्वा धुनिचण्डाय] O; इत्य... धानिचण्डाय N

[८] दद्याच्छिवनिवेदितम्] em.; दद्याच्छिवनि...दितम् N, द...ाच्छिवनिवे...तम् O

[९] ०क्रियाकाण्डं] N; ०कियाकाण्डं O

[१०] न्यूनाधिकं] em.; ...नाधिकं N, न्यूनाधिक O

[११] तदस्तु]em.; ततस्तु N, O

[२३.६. पूजोपसंहारः]

इत्युक्त्वा धुनिचण्डेशं[1] स्वस्य हृद्युपसंहरेत् ॥ १४१ ॥

तथार्घ्यपात्रमन्त्रांश्च[2] ततो निर्माल्यशोधनम् ।

तत्तत्स्थानञ्च संशोध्य लेपयेद्गोमयाम्भसा[3] ॥ १४२ ॥

अथ धौताङ्घ्रिराचम्य धृत्वा भस्म जलं विना ।

कराङ्गन्यासं[4] कृत्वाथ संहिताघोरमभ्यसेत्[5] ॥ १४३ ॥

कालोत्तरे –

विसृज्य चार्घ्यपात्राणि समाचम्योपसंस्पृशेत् ।

न्यासं कृत्वा यथान्यायं[6] जप्तव्या शिवसंहिता ॥ १४४ ॥

कामिके –

स्थण्डिलात्संहरेत्पूजां[7] त्रिभिर्गोमयगोलकैः[8] ।

144. Quoted from *Bṛhatkālottara*, NGMPP B 24/59, 13:121.

[1] धुनिचण्डेशं] em.; ...चण्डे... N, ध्वनिचण्डेशं O

[2] तथार्घ्य०] O; त...० N

[3] ०मयाम्भसा] O; ०मवाभसा N

[4] कराङ्गन्यासं] em.; कराङ्गन्यास N, करां...न्यासं O

[5] संहिताघोरमभ्यसेत्] em.; स...घो...मभ्यसेत् N, संहि...घोरंमभ्यसेत् O

[6] यथान्यायं] em.; यथान्यासं N, ययथान्या... O

[7] स्थण्डिलात्संहरेत्पूजां] em.; स्था...लात्संह...त्पूजां N, स्थण्डिलात...हरेत्पूजां O

[8] त्रिभिर्गोमयगोलकैः] O; निभिर्गोमयगोलकैः N

च्युतस्खलितशुद्ध्यर्थमभ्यसेन्मन्त्रसंहिताम्[1] ॥ १४५ ॥

अहन्यहनि[2] योऽधीते विधिस्थः शिवसंहिताम्[3] ।

नास्य सन्तिष्ठते पापं दिवेवार्काहतं तमः ।

तस्मात्सर्वप्रयत्नेन संहिताजपमभ्यसेत् ॥ १४६ ॥

षड्सहस्त्रिकायां[4] –

त्रिसप्तवारमावर्त्त्य[5] पूजान्ते नियमेन तु ।

पूजाफलं तदाप्नोति अघोरं शास्त्रभाषितम् ॥ १४७ ॥

अघोरान्नापरो मन्त्रो कलिमासाद्य सिद्धिदः ।

अघोरार्पितचेता[6] यो मुक्तिभाक् स च नान्यथा ॥ १४८ ॥

---

145. Quoted from *Pūrva-Kāmika*, 4:536ab, 537ab.

च्युतास्खलितशुध्यर्थमभ्यसेन्मन्त्रसंहिताम् । चललिङ्गेऽप्ययं न्यायो विहितो यज्ञमन्दिरे ॥

स्थण्डिले संहरेत्पूजां त्रिभिर्गोमयगोलकैः । पाणिपादौ च प्रक्षाल्याप्याचम्य विधिना ततः ॥

प्रणम्य दण्डवद्भूमौ क्षमस्वेति च वै वदेत् ।

147-148. Untraced in the Ṣaṭsahasrikā. But quoted from *Bṛhatkālottara*, NGMPP B 29/59 f. 81v. Cf. *Ātmārthapūjā-paddhati*, T. 55, p. 570, *Trilocana's Prāyaścitta-sammuccaya*, 809 and the *Vimalāvatī*, f. 56v, NGMPP A 186/10.

---

[1] च्युतस्खलितशुद्ध्यर्थमभ्यसेन्मन्त्रसंहिताम्] O; च्युतस्खलि...र्थम...येन्मन्त्रसं... N

[2] अहन्यहनि] em.; अ...न्यहनि N, अहन्य...नि O

[3] ॰संहिताम्] N; ॰संहि... O

[4] षड्सहस्त्रिकायां] O; षट्सह...कायं N

[5] त्रिसप्तवारमावर्त्त्य] em.; त्रिसप्तवारमव...य N, त्रिसप्तवारमावरत्त्य O

[6] अघोरार्पितचेता] em.; ...घोरर्पितचेता N, अघोरा...तचेता O

[२३.८. चण्डार्चा कुत्र कार्या?]

कालोत्तरे -

किन्तु देहावसानं[1] तु यः पूजयति शङ्करम्।
स शिवः सर्वकृद्यज्वा जीवन्मुक्तः स कथ्यते[2] ॥ १४९ ॥
इत्याद्यत्र[3] तु चण्डार्चा कार्येशार्चावसानके[4]।
इति कुत्रागमे प्रोक्ता तर्हि कालोत्तरादिषु ॥ १५० ॥

कालोत्तरे -

स्थिरे चले तथा[5] रत्नमृद्दारूपलकल्पिते[6]।
लोहचित्रमये बाणे स्थितश्चण्डो[7] नियामकः[8] ॥ १५१ ॥

149. Untraced in the *Kālottara*. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 571, where it occurs in this corrupt form: किन्तु देहावसानं तु यः पूजयति भक्तितः। स शिवस्सुकृद्यत्त्वा जीवन्मुक्तस्स कथ्यते ॥

151. Untraced in the *Kālottara*. See note on 4:156 below. Cf. also *Sakalāgamasaṅgraha*, T. 351, p. 165, where it appears thus:
स्थिरे चले तथा रत्ने मद्दारौ शैलकल्पिते। लौहे चित्रमये वाणे स्थितचण्डो नियामकः ॥
Also cf. *Kriyākramadyotikā*, p. 350.

[1] देहावसानं] N, Opc; देहहावसानं Oac

[2] जीवन्मुक्तः स कथ्यते] O; ...ीवन्मुक्त......ते N

[3] इत्याद्यत्र] em.; ...त्या...त्र N, इ...द्यतुत्र O

[4] कार्येशार्चावसानके] em.; कार्येशार्चे...सानके N, ...र्येशार्चेवसानके O

[5] स्थिरे चले तथा] O; स्थि...े च... ... N

[6] रत्न॰] O; रक्ता N

[7] वाणे स्थितश्चण्डो] N; ब...े स्थित...ण्डो O

[8] नियामकः] em.; नायमकः N, नायाम... O

कामिके -

अव्यक्तव्यक्तके[१] लिङ्गे मण्डले स्थण्डिलेऽनले ।
चले स्थिरे तथा रत्ने धातुचित्रमये तथा[२] ॥ १५२ ॥
गन्धान्नसम्भवे[३] लिङ्गे[४] मृद्भस्मफलकल्पिते ।
तथा पुष्पमये[५] लिङ्गे चण्डपूजा नियामिका ॥ १५३ ॥

स्वायम्भुवे[६] -

अथान्यथा[७] प्रवृत्तानां[८] शिवाज्ञाभङ्गकारिणाम्[९] ।

152-153. Untraced in the *Kāmika*. Appears in the *Bṛhatkālottara*, NGMPP B 24/59, f. 43v: व्यक्ताव्यक्तादिके लिङ्गे मण्डले स्थण्डिलेऽनले । चले स्थिरे तथा रत्ने मणिचित्रादिके तथा ॥ गन्धान्नसम्भवे लिङ्गे सृद्भस्मफलकल्पिते । तथा पुष्पमये लिङ्गे चण्डपूजा नियामिका ।
Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 559:
अव्यक्तव्यक्तके लिङ्गे मण्डले स्थण्डिलेऽनले । चण्डे स्थिते तथा रक्ते मणिचित्रादिके तथा ॥
गन्धान्नसम्भवे लिङ्गे मृद्भस्मफलकल्पिते । तथा पुष्पमये लिङ्गे चण्डपूजा नियामके ।
Also Cf. *Jñānaratnāvalī*, see, Goodall, 2009, p. 209.

---

[१] अव्यक्तव्यक्तके] em.; अव्य...व्यक्त... N, ...व्यक्तके O

[२] तथा रत्ने धातुचित्रमये तथा] O; त... र.ॅ. धातु...ये ...था] N

[३] गन्धान्न०] O; ग... N

[४] लिङ्गे] em.; लिङ्ग N, O

[५] पुष्पमये] em.; ...ष्पमये N, पुष्पमुये O

[६] स्वायम्भुवे] em.; स्वा...म्भुवे N, स्वायम्भु.ॅ. O

[७] अथान्यथा] O; ...थान्य...I N

[८] प्रवृत्तानां] em.; प्रवर्त्तानां N, प्रवृक्तानां O

[९] शिवाज्ञाभङ्गकारिणाम्] O; शि...ज्ञ...ङ्ग...णाम् N

शास्ता[1] चण्डेश्वरस्तेषां[2] दीक्षितानामपि प्रभुः[3] ॥ १५४ ॥

चण्डेश्वरप्रपन्ना[4] ये न तेषां[5] भयकारणम्[6] ।

तस्मात्तदर्चनं[7] कुर्याच्छैवपन्थानमाश्रितः[8] ॥ १५५ ॥

कालोत्तरे –

सिद्धान्ते नेतरे[9] तन्त्रे न वामे न च[10] दक्षिणे[11] ।

154-155. Quoted from *Svāyambhuvasūtrasaṅgraha* 15:10-11. Cf. *Bṛhatkālottara*, NGMPP B 24/59, f. 43v:

अतोऽन्यथा प्रवृत्तानां शिवाज्ञां भङ्गकारिणाम् । शास्ता चण्डेश्वरस्तेषा दीक्षितानामपि प्रभुः ॥

चण्डेश्वरप्रयत्नानां न भयं विद्यते क्वचित् । तस्मादाराधकानां तु शैवं पन्थानमाश्रिताः ॥

Also cf. *Ātmārthapūjāpaddhati*, T. 55, pp. 559-560.

अथान्यथा प्रवृत्तानां शिवाज्ञाभङ्गकारिणाम् । शास्ता चण्डेश्वरस्तेषां दीक्षितानामभि प्रभुः ॥

चण्डेश्वरप्रसन्ना ये न तेषां भयकारणम् । तस्मादाराधनं कुर्युश्शैवं पन्थानमाश्रिताः ॥

156. *Bṛhatkālottara*, NGMPP B 24/59, f. 254r. Cf. *Ātmārthapūjāpaddhati*, T. 55, p. 559, where this line is quoted, with 4:151 before it, the whole unit being attributed to the *Kālottara*.

---

[1] शास्ता] O; ...। N

[2] °तेषां] N; °तेषा O

[3] प्रभुः] O; ... N

[4] चण्डेश्वरप्रपन्ना] O; चण...श्व...प्र...न्ना N

[5] तेषां] em.; ते... N, O

[6] भयकारणम्] N; भ...रणम् O

[7] तस्मात्तदर्चनं] em.; तस्मा...र्चनं N, त...दर्चनं O

[8] कुर्याच्छैवपन्थानमाश्रितः] em.; कुर्याच्छैवपत्थान...तः N, ...र्याच्छैवपडानमाश्रितः O

[9] सिद्धान्ते नेतरे] em.; न च सिद्धान्तरे N, O

[10] वामे न च] O; वा... N

[11] दक्षिणे] em.; ...णेः N, दक्षिणेः O

चण्डार्चनं[1] प्रकर्तव्यं तस्माच्छैवार्चने[2] वरम्[3] ॥ १५६ ॥

इत्यादिवचनैः शम्भुपूजान्ते[4] चण्डपूजनम् ।

कुर्यादवश्यमात्मार्थे[5] शम्भोरर्चाफललब्धये[6] ॥ १५७ ॥

[२३.८. कपिलापूजा]

पश्चात्कपिलापूजायै[7] दद्याद्ग्रासमिदं पठन् ।

अमृतमथनोत्पन्ने सुरभे लोकधारिणि[8] ॥ १५८ ॥

इमं ग्रासं गृहाण त्वमिदं मे व्रतमुत्तमम् ।

इति दत्वाल्पग्रासं च[9] त्रेधाऽथो पुस्तकार्चनम् ॥ १५९ ॥

[२३.९. गुरोश्च तत्परिवारस्य च पूजनम्]

पश्चाद्गुरुनमस्कारः तत्पत्नीनतिरत्र[10] तु ।

---

[1] चण्डार्चनं] conj.; चण्डार्चतं N, O

[2] तस्माच्छैवार्चने] O; तस्माच्छ्रेयार्चने N

[3] वरम्] N; ... O

[4] शम्भुपूजान्ते] em.; शम्भु...जान्ते N, शम्भु...जाभे O

[5] कुर्यादवश्यमात्मार्थे] em.; ...र्यादवश्यमात्मार्थे N, कुकुर्यादव...मात्मार्थे O

[6] शम्भोरर्चाफललब्धये] em.; शम्भोर्चाफललस्तये N, शम्भोर्चाफललब्धये O

[7] पश्चात्कपिलापूजायै] conj.; प...त्कपिलपूजाये N, पश्चात्कपिलपूजायै O

[8] लोकधारिणि] conj.; लोक...णि N, लोकधारिणी O

[9] दत्वाल्पग्रासं च] em.; ...त्वालपग्रासं N, दत्वोलपग्रास O

[10] °पत्नीनति°] conj.; °पत्नीनिति° N, O

तदङ्घ्रिकमलद्वन्द्वमस्पृष्ट्वैव[१] नतिर्वरा ॥ १६० ॥

तत्कुमारनतिः पश्चात्तद्दासप्रियभाषणम्[२] ।

[२३.१०. मध्याह्नकार्याणि]

ततः सूर्यावलोकोऽथ श्रीशिवालयसेवनम् ॥ १६१ ॥

पश्चात्स्वगृहमागत्य[३] शिवागमपरायणम् ।

तत उत्थाय मध्याह्ने सन्ध्यार्चासाक्षिभोजनम् ॥ १६२ ॥

अपि नित्यं यथाशक्ति कुर्याद्ब्राह्मणभोजनम्[४] ।

प्रत्यहं भक्तितः[५] कुर्याच्छ्रीमहेश्वरपूजनम् ॥ १६३ ॥

[२३.११. सायंकालकृत्यानि]

अथ[६] सायं महादेवविरुदावलिकीर्त्तनम्[७] ।

महादेवादिनाम्नां हि पठनं[८] श्रवणं मुदा[९] ॥ १६४ ॥

---

[१] तदङ्घ्रिकमलद्वन्द्वमस्पृष्ट्वैव] O; तद...कम...द्वद्वमस्पृ...ैव N

[२] पश्चात्तद्दास] em.; प...त्तद्दा...प्रियभाषणम N, ...श्चात्तद्दासप्रियभा...णम् O

[३] पश्चात्स्वगृहमागत्य] conj.; पश्चात्स्व मम मोगत्य] N, पश्चात्स्व ममोगत्य O

[४] कुर्याद्ब्राह्मणभोजनम्] em.; कुर्याद्ब्राह्मण...जनम् N, ...द्ब्राह्मणभो...नम् O

[५] प्रत्यहं भक्तितः] O; ...हं भ...: N

[६] अथ] em.; अथा N, O

[७] सायं महादेव॰] N; सायममहादेव॰ O

[८] ॰नाम्नां हि पठनं] conj.; नामानापदान N, O

[९] श्रवणं मुदा] N; श्रवणम मुदा O

ततस्तु सायानुष्ठानं शिवपूजा[१] च पूर्ववत्।
सुप्त्वोत्थायाथ[२] चान्येद्युरुदयादिक्रियेतिवत्[३] ॥ १६५ ॥

[२३.१२. ग्रन्थसमाप्तिः]

शिवपूजाविधिः[४] प्रोक्तः[५] सदास्तु मम मङ्गलम्।
एतस्यां पद्धतौ नाम शम्भुपुष्पाञ्जलिः[६] स्वयम्।
शिवपूजाधिकारोऽयं[७] प्रचारोऽस्त्वस्य[८] सर्वतः ॥ १६६ ॥

{इति सौन्दरनाथदेवविरचिते शम्भुपुष्पाञ्जलौ अग्निकार्यगुरुपूजाविद्यापीठपूजाविधिर्नाम चतुर्थोधिकारोऽयम् ॥}

॥ इति[९] सौन्दरनाथदेवविरचितः[१०] शिवपूजासत्कुसुमाञ्जलिः[११] समाप्तः ॥

---

[१] शिव॰] O; सिव॰ N

[२] सुप्त्वोत्थायाथ] N; ...पो...ाथ O

[३] चान्येद्युरुदयादिक्रियेति॰] O; चा...द्युरुद...ादिक्रियें...॰ N

[४] शिवपूजाविधिः] em.; शिवपूजाविधि N, O

[५] प्रोक्तः] em.; ...ोक्त N, प्रोक्त O

[६] ॰पुष्पाञ्जलिः] em.; ॰पुष्पाञ्जलि N, O

[७] शिवपूजाधिकारोऽयं] N; शिव...ाधिकारोयं O

[८] प्रचारोऽस्त्वस्य] em.; ...चारो स्वस्य N, ...चारे स्वस्यO

[९] इति] O; ...ति N

[१०] ॰चितः] em.; ॰...ते N, ॰...कृते O

[११] शिवपूजासत्कुसुमाञ्जलिः] N; शिव...जासत्कुसुमाञ्जलिः O

Appendix I.

South Indian Terms and Spellings

Several of the terms below are simply listed without discussion, since they have been discussed, sometimes at length, in the list of South Indian expressions that is presented in GOODALL forthcoming C: 'On the influence of the language and culture of the Tamil-speaking South on the Temple Āgamas of the Saivasiddhānta: an annotatedlist of distinctive vocabulary'. The termsghana and *peṭṭaka* are not discussed in that article, and so are accompanied by a few remarkshere.

ālavaṭṭaka – "round peacock feather fan" (4:29). Cf. Tamil *ālavaṭṭam*.

iṇḍā – "garland" (3:234 and before 4:139). Cf. Tamil *iṇṭai*.

ghana – "thickness" (2:138). Used as an adjective meaning "dense" or "thick", *ghana* is of course common; but its use, in passages giving the measurements of objects, as a noun meaning "breadth" seems not to be common except in South Indian Temple Āgamas. The same usage may be found, for instance, in 51:4–13 of the *kriyāpāda* of the *Suprabheda*; in *Dīpta* 94:339, 94:394 and in verses 2, 19 and 22 of the appendix to *Dīpta* 16; and in the *Ajitapassim* (e.g.10:2).

taṭṭī – "plate" (4:17 and 4:21–23). Cf. Tamil *taṭṭu*.

timbu – "lime" (2:154)

tevāra – "hymn of the *Tēvāram*" (2:119 and 4:95).

dhurddhūra – "thorn-apple" (3:112).

paccaḍikā – "pickle" (3:372). Cf. Tamil *paccaṭi*.

peṭṭaka – "box" (3:7). In modern Hindī, a single *ṭ* is used (पेटी), and Monier-Williams records other orthographies with a single *ṭ*, such as *peṭaka* (which we also find in the *Śambhupuṣpāñjali* in 3:13 and 3:30) and *peṭikā* (which we also find in 3:12 and 4:131–132). The doubling of the *ṭ* may be influenced by that in the common Tamil form of the word, namely *pĕṭṭi*.

bera – "image for worship" (3:13, 3:21–22, 4:27).

maṇipravāla – a literary mixture of Sanskit vocabulary and Tamil inflections (1:78).

mātuḷaṅga – "citron" (3:291).

māṇikka – "sapphire" (3:89).

APPENDIX II. QUOTATIONS

अचिन्त्यविश्व, T. 7, p. 220 (without attribution).

इडयापूरकाकृष्य सुधया च शिवाणुभिः ॥ 2:120 ॥

अचिन्त्यविश्व, T. 7, p. 212-213 (without attribution).

शशिनी चाङ्गदा चेष्टा मरीची ज्वालिनी तथा।

एताः पञ्चकलाशक्तीः पञ्चमूर्धोपरि न्यसेत् ॥ 3:129 ॥

निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च।

एवं चतुष्कलाशक्तिरीरिता चोर्ध्ववक्त्रके ॥ 3:130 ॥

तमो मोहा जया निद्रा धृतिः क्षान्तिः स्मृतिः क्षया।

अघोरे चाष्टशक्तीश्च वामदेवस्तथोच्यते ॥ 3:131 ॥

रजा रतिः पाली रक्षा कला स्यात्संयमी क्रिया।

तृष्णा मोहा क्षया चिन्ता मोहिनी भ्रामिणी तथा ॥ 3:132 ॥

वामदेवकलाशक्तिस्त्रयोदश समीरिताः।

सिद्धिर्द्युतिश्च लक्ष्मी वा मेधा कान्तिः स्वधा प्रजा।

सद्यश्चाष्टकलाशक्तिरीरिता नन्दिकेश्वर ॥ इति ॥ 3:133 ॥

अजित, 22:33-50.

श्वेतै रक्तैस्तथा पीतैः पुष्पैश्च कुसुमैः शुभैः।

अपर्युषितनिश्छिद्रैः कृमिकेशादिवर्जितैः ॥ 3:208 ॥

सर्वैरेतैः कृतं यच्च पत्रैश्चैव तथाविधैः।

श्रेष्ठमभ्यर्चनं प्रोक्तं पुष्पैः कृष्णैर्विना कृतम् ॥ 3:209 ॥

मध्यमं यजनं प्रोक्तं सितरक्तैस्तु कन्यसम् ।

पुष्पाणि तानि वक्ष्यामि श्वेतादीनि यथाक्रमम् ॥ 3:210 ॥

सितपद्मं सितार्कं च मन्दारं करवीरकम् ।

नन्द्यावर्तं च पुन्नागं मल्लिका जातिरेव च ॥ 3:211 ॥

माधवी कुरवं चैव द्रोणं धुर्धूरमेव च ।

सकलं पुष्पं भद्रा च गिरिकर्णी तथैव च ॥ 3:212 ॥

श्रीपुष्पं वकुलं चैव लोध्रपुष्पं तथैव च ।

सिन्धुवारं शमीपुष्पं सितान्युक्तानि तानि तु ॥ 3:212 ॥

रक्तपुष्पं पलाशं च हयमारं च पाटली ।

सुरक्तबृहती चैव पिण्डीतकमतः परम् ॥ 3:214 ॥

पट्टिका चोत्पलं रक्तं मुनिपुष्पं तथैव च ।

कदम्बं चेति रक्तानि पीतानि च ततः शृणु ॥ 3:215 ॥

चम्पकं कर्णिकारं च तथारग्वधमेव च ।

हेमधुत्तूरकं चैव कुरण्डं गोक्षुरं तथा ॥ 3:216 ॥

असनं शिखिनी चैव पीतपुष्पं प्रकीर्तितम् ।

नीलोत्पलं विष्णुक्रान्तिरतसीपुष्पमेव च ॥ 3:217 ॥

कुरण्डं कृष्णवर्णं च चतुर्वर्णं प्रकीर्तितम् ।

कनकानि कदम्बानि जातीपुष्पं तथैव च ॥ 3:218 ॥

रात्रौ दद्याच्छिवे शेषं दद्याद्देवे दिवानिशम् ।

नन्द्यावर्तं भवेत्प्रातः द्रोणं मध्यदिने तथा ॥ 3:219 ॥

जातिः साये विशेषेण दातव्या स्याच्छिवाय वै ।

निर्गन्धान्युग्रगन्धानि कुसुमानि विवर्जयेत्॥ 3:220 ॥

अजित, 20:240.

अर्घ्योदकं समापाद्य दक्षिणे हस्तसम्पुटे।

गन्धपुष्पाक्षतोपेतं हृदि तत्सन्निवेश्य च ॥ 4:60 ॥

अंशुमति, Untraced. Cf. सोमशम्भुपद्धति, VI. 2:118cd.

पश्चिमं पूजयेद्वारं शेषद्वाराणि घट्टयेत्॥ 2:31cd ॥

अंशुमति, T. 4, p. 134.

गर्भगेहं प्रविश्याथ पिधानोद्घाटनात्पुरा।

गर्भाग्रे भीमरुद्रन्तु स्थितमासीनमेव वा ॥ 3:8 ॥

चतुर्भुजं त्रिनेत्रं च वरदाभय संयुतम्।

पिञ्चचामरसंयुक्तं भीमरुद्रं विभावयेत्॥ 3:9 ॥

अंशुमति, T. 4, pp. 134-135.

निशाचरान्त कृद्देवदेवेश यजनार्थकम्।

शुद्धद्वारस्य सव्ये तु गच्छत्वं हि प्रसीदमे ॥ 3:11 ॥

अंशुमति, T. 4, pp. 135- 136.

सर्वबेरासनार्थं तु तत्तत्स्थाने समर्चयेत्।

पेटिकात्सर्वबेराणि पृथक् सङ्गृह्य बुद्धीमान्॥ 3:13 ॥

आच्छादनं तु गलितं प्रोक्षयेदस्त्रवारिणा।

निर्माल्यञ्च विसृज्याथ मानसं स्नानमाचरेत्॥ 3:14 ॥

गणेशं नैर्ऋते न्यस्त्वा स्कन्दं वायुदिशिन्यसेत्।

महेशं दक्षिणे देशे पूर्वाशाभिमुखन्यसेत्॥ 3:15 ॥

लिङ्गस्य तूक्तनृत्तमूर्त्यादीन् दक्षिणाननान्।

चक्रस्य दक्षिणेऽन्यस्य भस्माधाराक्षमालिके ॥ 3:16 ॥

भस्माधारे तु मायाख्यं भस्मितेलकुलीश्वरम् ।

वासुकिं तस्य सूत्रे तु गन्धपुष्पैः समर्चयेत ॥ 3:17 ॥

लिङ्गाग्रे वृषभन्यस्य लिङ्गाभिमुखमेव च ।

पीठस्य वामभागे तु भोगशक्तिञ्च विन्यसेत् ॥ 3:18 ॥

अंशुमति, T. 4, p. 137 and T. 745, p. 23.

ओं नमो देवदेवेश सर्वलोकैकनयक ।

उत्तिष्ठात्राभिषेकार्थमात्मरक्षार्थमेव च ॥ 3:29 ॥

अंशुमति, Untraced. ज्ञानरत्नावली, GOML MS R 14898, p. 102.

समुत्क्षिप्य विशेषार्घ्यभाजनं वामपाणिना ।

पद्भ्यां निवेदयेत्पाद्यं दक्षहस्तेन सम्मुखम् ॥ 3:184 ॥

अंशुमति, quotation supplied from आत्मार्थपूजापद्धति, T. 55, p. 544.

लयाङ्गयजनं कृत्वा पराङ्मुखार्घ्यं ददेद्बुधः ।

सद्यादीशान्तमभ्यर्च्य व्युत्क्रमेणैव योजयेत् ॥ 4:107 ॥

सद्यो वाममघोरं च पुरुषैशानकं क्रमात् ।

अस्त्रादि हृदयान्तां चाङ्गान्यङ्गे तु योजयेत् ॥ 4:108 ॥

चतुर्दिक्ष्वस्त्रमभ्यर्च्य सोमादीन्द्रान्तमेव च ।

नेत्रमग्रे समभ्यर्च्य कवचं वायुदेशके ॥ 4:109 ॥

नैर्ऋते च शिखां चैव शिरस्त्वीशानदेशके ।

आग्नेय्यां हृदयं चैव अर्चयेत्तु लयाङ्गकम् ॥ 4:110 ॥

†.....................................†

अंशुमति, T. 273, pp. 98-99.

दक्षिणं मणिबन्धं च वामहस्तं तथैव च।

मध्यमादि त्रयं तत्तन्मूलमध्ये तु योजयेत्॥ 4:107 ॥

अङ्गुष्ठतर्जनीयुक्तं पुष्पत्रयविसर्जनम्।

तत्पुष्पं वर्जयित्वा तु निरोधाह्वयमुद्रया।

एवं विसर्जनी मुद्रा शिरस्यञ्जलिमाचरेत्॥ 4:107 ॥

अंशुमति, T. 273, p. 99.

शिवमन्त्रमनुस्मृत्य लिङ्गं सङ्गृह्य देशिकः।

चित्रवस्त्रेण सम्वेष्ट्य पेटिकामध्यमे न्यसेत्॥ 4:128 ॥

अपिधानं तु संयोज्य भीमरुद्रं स्मरेत्तदा। 4:129ab ॥

अंशुमति, Untraced. Cf. आत्मार्थपूजापद्धति, T. 55, p. 557.

आत्मार्थयजनान्ते तु सन्ध्यां प्रति विशेषतः।

देवस्येशानदिग्भागे गोमयालिप्तभूतले ॥ 4:130 ॥

टङ्काभमर्धचन्द्राभं लिखेच्चण्डस्य मन्त्रतः।

धुनिचण्डेश्वरायेति हुंफडन्तेन मन्त्रवित्॥ 4:131 ॥

अंशुमति, T. 273, pp. 99-100.

द्विनेत्रं द्विभुजं चैकवक्त्रं विशदवाससम्।

प्रलम्बमानदक्षाङ्घ्रिं शयनान्यपदान्वितम्॥ 4:136 ॥

जानूर्ध्वविलसत्पाणिं सव्यहस्तेन टङ्कगम्।

हृदञ्जलिकरं वाथ ध्यायेच्चण्डेश्वरं त्विति ॥ 4:137 ॥

अर्चनायाम्, Untraced.

पुष्पभेदात्पत्रभेदात्फलभेदोऽस्ति तद्यथा ॥ 3:203cd ॥

आत्मार्थपूजापद्धति, T. 55, pp. 412-413 (without attribution).

मुखेष्वाचमनं दद्यादर्घ्यं पञ्चसु मूर्धसु ।

दूर्वापुष्पाक्षतादीनि पश्चाल्लोकोपचारतः ॥ 3:185 ॥

नमस्कारस्स्वधास्वाहावषड्जातिचतुष्टयम् ।

चतुष्टयमिदं तत्र परिपाट्या निवेदयेत् ॥ 3:186 ॥

आत्मार्थपूजापद्धति, T. 55, p. 421 (without attribution).

स्फटिकाभं जगद्धेतुं त्रिनेत्रं चन्द्रमौलिनम् ॥ 3:250cd ॥

सौम्यं प्रसन्नमीशनं त्रिशूलाभयधारिणम् । 3:251ab ॥

आत्मार्थपूजापद्धति, T. 55, p. 422 (without attribution).

त्र्यक्षं मौलीन्दुहृत्सौम्यं कुण्डलालङ्कृतं ततः ।

बभ्रुभ्रूश्मश्रुकेशाढ्यं दंष्ट्रया विकटाननम् ॥ 3:255 ॥

कपालमालाभरणं सर्पवृश्चिकभूषणम् ।

खट्वाङ्गं च कपालं च खेटकं पाशमेव च ॥ 3:256 ॥

वामहस्तचतुष्केऽथ दक्षहस्तचतुष्टये ।

त्रिशूलं परशुं खड्गं दण्डं चैवारिमर्दनम् ॥ 3:257 ॥

ध्यायेन्नवाम्बुदाभासमघोरं सर्वकामदम् । 3:258ab ॥

आत्मार्थपूजापद्धति, T. 55, p. 423 (without attribution).

वामं रक्तं सुरक्ताभमाल्यवस्त्रोपवीतकम् ।

तुङ्गनासारुणोष्णीषं खड्गखेटलसत्करम् ॥ 3:260 ॥

आत्मार्थपूजापद्धति, T. 55, p. 528 (without attribution).

सर्वज्ञानप्रदं शम्भुं सर्वाज्ञानविघातकम् ॥ 4:88cd ॥

कायेन मनसा वाचा विद्यापीठाश्रयं भजे । 4:89ab ॥

ईश्वरवचनम्, Untraced.

मम्माभिषेकान्त उमे क्षुदुत्था जगत्त्रयं दग्धुमलं समर्था।

तत्कालनैवेद्यमतः प्रदेयं नोचेत्तदायुर्बलवीर्यभुक् स्यात्॥ 3:195॥

उत्तरकामिक, 4:246 (without attributation).

एलालवङ्गकर्पूरजातीतक्कोलचूर्णयुक्॥ 3:388cd॥

मञ्जिष्ठखण्डसम्मिश्रं मुखवासमिदं भवेत्। 3:389ab॥

कामिक (पूर्वकामिक), 4:20ab

यस्यां दिशि भवेद्द्वारं तां प्राचीं परिकल्पयेत्॥ 2:31ab॥

कामिक (पूर्वकामिक), 4:180ab, p. 31.

नाभिकुण्डे स्वभावोत्थैं तर्पयेत्परमामृतैः। 2:120ab॥

कामिक (पूर्वकामिक), 8:42.

ईक्षणं मूलमन्त्रेण प्रोक्षणं चास्त्रमन्त्रतः।

ताडनं ह्यास्त्रमन्त्रेण वर्मणाभ्युक्षणं भवेत्॥ 2:161॥

कामिक (पूर्वकामिक), 4:325.

मूर्त्तिमीश्वरतत्वान्तां लिङ्गनाहे तु विन्यसेत्।

हृत्सम्पुटश्च शान्तोयं मूर्त्तिमन्त्र उदाहृतः॥ 3:125॥

कामिक (उत्तरकामिक), 3:26.

षष्ठौकारसमोपेतं बिन्दुनादसमन्वितम्।

सान्तं हृत्सम्पुटितं कृत्वा विद्यादेहं प्रकल्पयेत्॥ 3:139॥

कामिक (उत्तरकामिक), 3:15.

या तस्य विमला शक्तिः शिवस्य समवायिनी।

सैव मूर्त्तिः क्रियाभेदात्सदाशिवतनुर्मता॥ 3:146॥

कामिक, Untraced. ध्यानरत्नावलि, v. 150 and शैवभूषण, v. 94.

अस्तित्वमधिकत्वं च स्वातन्त्र्यं सर्वगोप्तृता ।

सर्वज्ञत्वमधृष्यत्वं षडङ्गानां गुणाः क्रमात् ॥ 3:171 ॥

कामिक (पूर्वकामिक), 4:492.

एकावरणपूजा स्यादङ्गैर्ब्रह्मभिरर्चनम् ।

अथवा केवलैरङ्गैः कैवलैः ब्रह्मभिस्तु वा ॥ 3:244 ॥

ब्रह्माङ्गैः लोकपैरस्तुर्भवेदावरणत्रयम् । 3:244b ॥

कामिक, Untraced. Cf. पूर्वकामिक, 4:459-460.

संस्काराष्टकमात्रं तु ब्रह्माङ्गानां प्रकीर्तितम् ।

नावकुण्ठनमेतेषां नामृतीकारणं तथा ॥ 3:277 ॥

कामिक (उत्तरकामिक), 68:2cd-4ab (without attribution).

एकवक्त्रा द्विनेत्राश्च करण्डमकुटान्विताः ।

कृताञ्जलिपुटोपेताः सद्विहस्ताः सलक्षणाः ॥ 3:346 ॥

जाये शक्तिगदे विद्यात्पाशपद्मे नपुंसके ।

शेषाः पुमांसो विज्ञेया ध्यातव्याश्चास्त्रमूर्तयः ॥ 3:347cd ॥

कामिक, Untraced. दीक्षादर्श, T. 372, p. 1383.

हूं हूमिति द्वयोपेतं वज्राय तदनन्तरम् ।

हुं फण्णमोन्तसंयुक्तं मन्त्रैरेवं समर्चयेत् ।

इत्युक्त्या सम्प्रदायज्ञः पूजयेच्च दशायुधम् ॥ 3:348 ॥

कामिक (पूर्वकामिक), 6:8-9.

शालीनां तण्डुलाः श्रेष्ठा यवव्रीह्यादिकाः समाः ।

व्रीहीणामवशिष्टानां तण्डुलाश्चाधमाः स्थिताः ॥ 3:342 ॥

सिततण्डुलका ये च ते सर्वे शालयः स्मृताः ।

इतरे व्रीहयः प्रोक्ताः फलं तेषां पृथक् पृथक् ॥ 3:343 ॥

कामिक (पूर्वकामिक), 4:498.

तृप्तावाचमनं दद्याद्धस्तोद्वर्तनकं ततः । 3:387ab ॥

मुखवासं च ताम्बूलं देवयोग्यं प्रदापयेत् । 3:388ab ॥

कामिक (उत्तरकामिक), 7:24b-28.

सितं पूतं सुगन्धञ्च भस्म निर्वालुकं तथा ।

अङ्गुष्ठानामिकाभ्यां तु तिलकं मुखपञ्चके ॥ 4:24 ॥

फाललोचनमध्ये तु रक्षया किं प्रयोजनम् ।

ललाटनयनस्योर्ध्वे रक्षां शम्भोः प्रदापयेत् ॥ 4:25 ॥

देवीं व्यक्तस्वरूपा चेत्तिलकं प्रथमं गले ।

ततो ललाटे मूलेन हृदयेनाथवा नयेत् ॥ 4:26 ॥

बेराणां तु ललाटे तु हृद्बाह्वादिषु पुण्ड्रकम् । 4:27ab ॥

कामिक (पूर्वकामिक), 4:508cd.

मूलाद्दशांशतो ब्रह्माङ्गानां कार्यो जपः तथा । 4:67ab ॥

कामिक (उत्तरकामिक), 33:17-20.

सुधाकलशमध्यस्थः श्वेतपद्मासनस्थितः ।

चतुर्भुजस्त्रिनेत्रश्च जटाखण्डेन्दुमण्डितः ॥ 4:73 ॥

व्याघ्रचर्मपरीधानो नागेन्द्रोरोविभूषणः ।

त्रिशूलं चाभयं चोर्ध्वे सुधाकलशमन्ययोः ॥ 4:74 ॥

दधानः षड्भुजश्चेत्स त्रिशूलं चाक्षमालिकम् ।

कपालं कुण्डिकां वामे योगमुद्रां करद्वये ॥ 4:75 ॥

अनेन सदृशो मन्त्रो नास्तीति प्राणरक्षणे ।

न भविष्यति भूतश्च सत्यमेतदुदाहृतम् ॥ 4:76 ॥

कामिक (पूर्वकामिक), 4:518cd.

संहारमुद्रयास्त्रेण देवानावरणस्थितान् । 4:114ab ॥

कामिक (पूर्वकामिक), 4:522.

चललिङ्गे तु सापेक्षोऽनापेक्षः स्थण्डिलादिषु ।

सर्वत्र वानपेक्षस्तु प्रत्यहं विहितो यतः ॥ 4:120 ॥

कामिक (पूर्वकामिक), 4:536ab and 537ab.

स्थण्डिलात्संहरेत्पूजां त्रिभिर्गोमयगोलकैः ।

च्युतस्खलितशुद्ध्यर्थमभ्यसेन्मन्त्रसंहिताम् ॥ 4:145 ॥

कामिक, Untraced. Occurs in the बृहत्कालोत्तर NGMPP B 24/59, f. 43v.

अव्यक्तव्यक्तके लिङ्गे मण्डले स्थण्डिलेऽनले ।

चले स्थिरे तथा रत्ने धातुचित्रमये तथा ॥ 4:152 ॥

गन्धान्नसम्भवे लिङ्गे मृद्भस्मफलकल्पिते ।

तथा पुष्पमये लिङ्गे चण्डपूजा नियामिका ॥ 4:153 ॥

कामिकतन्त्रसार, Untraced. cf. पूर्वकामिक, 4:335c-340b.

त्रिगुणाः शूलमित्युक्तं सत्यं चात्रपरश्वथम् ।

प्रतापः शाम्भवः खड्गो ऽभेद्यत्वं वज्रमिष्यते ॥ 3:289 ॥

अनुग्रहोऽभयं सर्वलोकानां परिपालनम् ।

शक्तिः संहारिणी वह्निः पाशानां भस्मसात्करी ॥ 3:290 ॥

प्रकाशिका पदार्थानां स च मायोर्ध्ववर्तिनाम् ।

माया तु पाश एव स्यादीशाशेति सा स्फुटम् ॥ 3:291 ॥

नादो घण्टामणिः प्रोक्तो मन्त्रविग्रहबोधकः ।

अधृष्यत्वं ही नागः स्याच्छक्तिः सर्वभयङ्करी ॥ 3:292 ॥

यद्योग्ये ह्यात्मनः प्राप्तिस्तत्रैव नियमोऽङ्कुशः ।

एवमुक्तं स्वरूपं स्याद् दशायुधानां तु देशिकैः ॥ 3:293 ॥

कारण, Untraced. Quoted with attribution to the कारण in the आत्मार्थपूजापद्धति, T. 55, p. 391.

आधारशक्तिपद्मान्तं स्थिरासनमुदाहृतम् । 3:95ab ॥

कारण, Untraced. Occurs in the पूर्वकामिक, 6:24-25b.

चतुः प्रस्थद्वयं प्रोक्तं हविराढकमुच्यते ।

प्रस्थं कूडुबसम्युक्तं पैशाचाशनमुच्यते ॥ 3:365 ॥

सकलानां तु नैवेद्यं भवेत्प्रस्थद्वयाधिकम् । 3:366ab ॥

कारण, Untraced. Cf. आत्मार्थपूजापद्धति, T. 55, p. 511.

दक्षिणं हस्तमाकुंच्य चतुरङ्गुलमानतम् ।

पुष्पवारि गृहीत्वा तु पादमूले प्रदापयेत् ।

चुलुकोदकमाख्यातं पूजान्ते तु प्रजापते ॥ 4:58 ॥

कालोत्तर, T. 17, p. 320. सिद्धन्तसारावलिः, p. 122.

वितस्तिमात्रं हृत्पद्मं कर्णिका चतुरङ्गुला ।

अङ्गुष्ठपर्वतुल्योच्चा कर्णिका केसरैर्युता ॥ 2:106 ॥

कालोत्तर, T. 59, p. 346.

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भावयेत् ।

एतं समाधिमुत्कृष्टं प्रविदन्ति मनीषिणः ॥ 2:127 ॥

कालोत्तर, Untraced. (सिद्धन्तसारावलिः, p. 121).

अकृत्वा मानसं यागं यो बहिर्यागमारभेत् ॥ 2:96ab ॥

कालोत्तर, 7:18ab, T. 59, p. 29 (without attribution).

प्राकृतं भावमुत्सृज्य शिवोऽहमिति भाव्य च ॥ 2:97ab ॥

कालोत्तर (बृहत्कालोत्तर), 13:96c-97 (NGMPP B 24/59, f. 120r).

पूज्यं नीलोत्पलाद्यैश्च कुन्दचम्पकजातिभिः ।

कूष्ण्डधुर्धूरकबकैः करवीरैः सपाटलैः ॥ 3:222 ॥

कदम्बदमनाद्यैश्च अखण्डैरजुगुप्सितै । 3:223ab ॥

कालोत्तर, Untraced. क्रियाक्रमद्योतिका (प्रभाव्याख्या), p. 107 and also आत्मार्थपूजापद्धति, T. 55, pp. 493-494.

एकनादस्तु मोक्षाय विरक्तानां प्रशस्यते ।

घण्टाताडनमेवं स्याद्विनादो भोगमोक्षदः ॥ 3:239 ॥

जानुनाभ्योरधो नादः कर्तव्यो न कदाचन ।

नाभेरूर्ध्वं तु कर्तव्यं घण्टाताडनमुत्तमम् ॥ 3:240 ॥

उत्तमः स्निग्धघोषः स्यान्मध्यमो मध्यमः स्मृतः ।

अधमो घर्घराघोषो घण्टाघोषस्य लक्षणम् ॥ 3:241 ॥

कालोत्तर, Untraced. Attribution to the सुप्रभेद in the आत्मार्थपूजापद्धति, T. 55, p. 453.

पूगमेकं प्रतिप्रस्थं द्विगुणं त्रिगुणं तु वा ।

अधमादिक्रमेणैव पत्रं तत्त्रीगुणं भवेत् ॥ 3:390 ॥

शैलचूर्णं सदा देयं शङ्खचूर्णमथापि वा । 3:391ab ॥

कालोत्तर, Untraced. Cf. आत्मार्थपूजापद्धति, T. 55, p. 500.

उभयोश्चन्द्रयोर्मध्ये स्वदेहं चिन्तयेत्सुधीः।
तेनामृतमयो देहोऽधृष्यः स्यात् त्रिदशैरपि ॥ 4:34 ॥
आत्मरक्षेयमाख्याता मन्त्ररक्षा निगद्यते।
शक्तिहस्ते न्यसेन्मन्त्रं न पुंसि न शिवे तथा ॥ 4:35 ॥
अशक्ताः पुरुषस्थाः स्युः शिवस्थाः शान्ततेजसः।
तस्माच्छक्तिगता मन्त्राः भुक्तिमुक्तिफलप्रदाः ॥ 4:36 ॥
पुंस्तत्त्वे जडतां यान्ति परतत्त्वे तु निष्फलम्।
निष्प्रपञ्चे परे तत्त्वे मन्त्रो भवति निष्फलः ॥ 4:37 ॥
शक्तिराद्या परा विद्या शैवी चैव फलप्रदा।
शिवादभिन्ना सा ज्ञेया सर्वदा रविरश्मिवत् ॥ 4:38 ॥
मन्त्रमाता परा शक्तिराद्या कुण्डलिनी स्मृता।
हृत्प्रदेशस्थिता नित्यं रविचन्द्राग्निसन्निभा ॥ 4:39 ॥
एका त्रिधा तु ज्ञेया स्यादिडाख्या पिङ्गलाह्वया।
सुषुम्नान्तर्गता गूढा ज्ञेया गुरुमुखेन सा ॥ 4:40 ॥
आनाभेर्द्वादशान्तान्तं व्याप्ता प्राणेन वर्तते।
त्रिशूलमार्गतो याति द्वादशान्तं तु योगिनाम् ॥ 4:41 ॥
गमागमप्रभेदेन याति सा शाङ्करे पदे। 4:42ab ॥

